भक्तिरसामृतसिन्धुः

४३७७

भाक्तिरसामृत सिन्धु
४३

६

॥ई०॥ॐ॥ श्रीगोविंदाय नमः॥ ॥नमः श्रीकृष्णाय॥ ॥अखिलरसामृतमूर्त्तिः प्रसृमररुचिरु
द्धतारकापालिः। कलितश्यामाललितो राधाप्रेयान्विधुर्जयति॥१॥ हृदि यस्य प्रेरणया प्र
वर्त्तितोहं वराकरूपोपि। तस्य हरेः पदकमलं वंदे चैतन्यदेवस्य॥२॥ विश्राममंदिरतया तस्य
सनातनतनोर्मदीशस्य। भक्तिरसामृतसिंधुर्भवतु सदायं प्रमोदाय॥३॥ भक्तिरसामृतसिंधौ
चरतः परिभूतकालजालभियः। भक्तमकरानशीलितमुक्तिनदीकान्नमस्यामि॥४॥ मीमांस

श्री०

कवडवाग्नेः कठिनामपि कुंठयन्नसौ जिह्वां। स्फुरतु सनातन सुचिरं तव भक्तिरसामृतां
भोधिः॥५॥ भक्तिरसस्य प्रस्तुतिरखिलजगन्मंगलप्रसंगस्य। अज्ञेनापि मयास्य क्रियते
सुहृदां प्रमोदाय॥६॥ एतस्य भगवद्भक्तिरसामृतपयोनिधेः। चत्वारः खलु वक्ष्यंते भा
गाः पूर्वादयः क्रमात्॥ तत्र पूर्वे विभागेस्मिन्भक्तिभेदनिरूपके। अनुक्रमेण वक्तव्यं

१

लहरीणां चतुष्टयं॥७॥ आद्या सामान्यभक्त्याढ्या द्वितीया साधनान्विता। भावाश्रितातृतीयातुर्या
[illegible] ...वैशिष्ट्यं [illegible]स्याः कथयितुं स्फुटं। लक्षणं क्रियते भक्तेरुत्तमायाः सतां

मतं॥ अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतं। आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा॥ तथा
नारदपंचरात्रे॥ सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलं। हृषीकेण हृषीकेशसेवनं भक्तिरुच्य-
ते॥ श्रीभागवतस्य तृतीयस्कंधे॥ अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे। स एव भक्तियोगाख्य
आत्यंतिक उदाहृत इति॥ सालोक्येत्यादिपद्यं तु मध्यस्थमपि नोद्धृतं। भक्तेर्माहात्म्यवाचित्वान्ना-
त्रस्यादुपयोगि यत्॥ क्लेशघ्नी श्रेयसां हेतुर्मोक्षादिलघुताकरी। दुर्लभा सांद्रसौख्यात्मा श्रीकृष्णा-
कर्षिणी च सा॥ तत्रास्याः क्लेशघ्नत्वं॥ क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा॥ तत्र पापं॥ अ-
प्रारब्धं भवेत्पापं प्रारब्धं चेति तद्द्विधा॥ तत्राप्रारब्धहरत्वं यथैकादशस्कंधे॥ यथाग्निः सुसमिद्धार्चिः
करोत्येधांसि भस्मसात्। तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः॥ प्रारब्धहरत्वं यथा॥ तृती-
ये॥ यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित्। श्वादोऽपि सद्यः सवनाय क-
ल्पते कुतः पुनस्ते भगवन्नु दर्शनादिति॥ दुर्जातिरेव सवनायोग्यत्वे कारणं मतं। दुर्जात्यारंभकं पा-
पं यत्स्यात्प्रारब्धमेव तत्॥ पाद्मे च पुराणे॥ अप्रारब्धफलं पापं कूटं बीजं फलोन्मुखं। क्रमेणैव प्रलीये-

तविलुत्ताक्तिरतात्मनां॥ वीजहरत्वंयथाषष्ठे॥ तैस्तान्यघानिपूयंतेतपोदानव्रतादिभिः॥ नाधर्म
जंतद्धृदयंतदपीशांघ्रिसेवया॥ अविद्याहरत्वंयथा॥ चतुर्थे॥ यत्पादपंकजपलाशविलास
भक्त्याकर्माशयंग्रथितमुद्ग्रथयंतिसंतः॥ तद्वन्नरिक्तमतयोयतयोनिरुद्धस्रोतोगणास्तमरणं
भजवासुदेवं॥ पाद्मेपुराणे॥ कृतानुयात्राविद्याभिर्हरिभक्तिरनुत्तमा॥ अविद्यांनिर्दहत्याशुदाव
ज्वालेवपन्नगीं॥ श्रेयोहेतुत्वं॥ श्रेयांसिप्रीणनंसर्वजगतामनुरक्तता॥ सद्गुणाःसुखमित्यादीन्या
ख्यातानिमनीषिभिः॥ तत्रजगत्प्रीणनादिहेतुत्वं॥ यथापाद्मे॥ येनार्चितोहरिस्तेनतर्पि
तानिजगंत्यपि॥ रज्यंतिजंतवस्तत्रजंगमास्थावराअपि॥ सद्गुणहेतुत्वंयथापंचमे॥ यस्यास्तिभ
क्तिर्भगवत्यकिंचनासर्वैर्गुणैस्तत्रसमासतेसुराः॥ हरावभक्तस्यकुतोमहद्गुणामनोरथेनासतिधा
वतोवहिः॥ सुखहेतुत्वं॥ सुखंवैषयिकंब्राह्ममैश्वरंचेतितत्त्रिधा॥ यथातंत्रे॥ सिद्धयःपरमाश्चर्याभु
क्तिर्मुक्तिश्चशाश्वती॥ नित्यंचपरमानंदंभवेद्गोविंदभक्तितः॥ हरिभक्तिसुधोदयेच॥ भूयोपियाचे
देवेशत्वयिभक्तिर्दृढास्तुमे॥ यामोक्षांतचतुर्वर्गफलदासुखदालतेति॥ मोक्षादिलघुताकरी॥ भ

सेवा॰ दिसा॰ भ॰ नशातेः ४

नागेवप्ररूढायांहृदयेन्भगवद्रतो॥ पुरुषार्थास्तुचत्वारस्तृणायंतेसमंतन्न॥ यथानारदपंचरात्रे॥ हरिभक्तिमहादेव्याःसर्वामुक्त्यादिसिद्धयः॥ मुक्तयश्चाद्भुतास्तस्याश्चेटिकावदनुव्रताइति॥ दुर्लभा॥ साधनौघैरनासंगैःसुचिरादप्यलभ्यता॥ श्रीहरेश्चाश्वदेयत्वमितिदुर्लभता॥ द्विधा॥ तत्राद्यायथातंत्रे॥ ज्ञानतःसुलभामुक्तिर्भुक्तिर्यज्ञादिपुण्यतः॥ सेयंसाधनसाहस्रैर्हरिभक्तिः सुदुर्लभा॥ द्वितीयायथापंचमे॥ राजन्पतिर्गुरुरलंभवतांयदूनांदैवंप्रियःकुलपतिःक्वचकिंकरोवः॥ अस्त्वेवमंगभजतांभगवान्मुकुंदोमुक्तिंददातिकर्हिचित्स्मनभक्तियोगं॥ सांद्रसौख्यात्मा॥ ब्रह्मानंदोभवेदेष [illegible] राईगुणीकृतः॥ नैतिभक्तिसुधांभोधेःपरमाणुतुलामपि॥ यथाहरिभक्तिसुधोदये॥ त्व[illegible]णाह्लादविशुद्धाब्धिस्थितस्यमे॥ सुखानिगोष्पदायंतेब्राह्माण्यपिजगद्गुरो॥ तथाभावार्थदीपिकायां॥ त्वत्कथामृतपाथोधौविहरंतोमहामुदः॥ कुर्वंति कृतिनःकेचिच्चतुर्वर्गंतृणोपमं॥ श्रीकृष्णाकर्षणी॥ कृत्वाहरिंप्रेमभाजंप्रियवर्गसमन्वितं॥ भक्तिर्वशीकरोतीतिश्रीकृष्णाकर्षणीमता॥ यथैकादशे॥ नसाधयतिमांयोगोनसांख्यंधर्म

दानस्वाध्यायस्तपस्त्यागोयथाभक्तिर्ममोर्द्धिति॥ सप्तमेचनारदोक्तौ॥ यूयंनृलोकेवतभू
रिभागाल्लोकंपुनानामुनयोभियंति। येषांगृहानावसतीतिसाक्षात्गूढंपरंब्रह्ममनुष्यलिंग
मिति॥ अग्रतोवक्ष्यमाणायास्त्रिधाभक्तेरनुक्रमात्॥ द्विशः षड्भिः पदैरेतन्माहात्म्यंपरिकीर्त्ति
तं॥ केंच॥ स्वल्पापिरुचिरेवस्याद्भक्तितत्त्वाववोधिका। युक्तिस्तुकेवलानैवयदस्याअप्रतिष्ठिता
॥ तथाप्राचीनैरप्युक्तं। यत्नेनापादितोप्यर्थः कुशलैरनुमातृभिः अभियुक्ततरैरन्यैरन्यथैवो
पपाद्यते॥ ॥ इतिश्रीभक्तिरसामृतसिंधोपूर्वविभागेभक्तिसामान्यलहरी॥ १॥ ॥श्री॥ ॥
॥ साभक्तिः साधनंभावः प्रेमाचेतित्रिधोदिता॥ तत्रसाधनभक्तिः॥ कृतिसाध्याभवेत्साध्यभा
वासासाधनाभिधा। नित्यसिद्धस्यभावस्यप्राकट्यंहृदिसाध्यता॥ साभक्तिः सप्तमस्कंधेभंग्यादे
वर्षिणोदिता॥ यथा॥ तस्मात्केनाप्युपायेनमनः कृष्णेनिवेशयेदिति। वैधीरागानुगाचेतिसाद्वि
धासाधनाभिधा॥ तत्रवैधी॥ यत्ररागानवाप्तत्वात्प्रवृत्तिरुपजायते॥ शासनेनैवशास्त्रस्य
सावैधीभक्तिरुच्यते॥ यथाद्वितीये॥ तस्माद्भारतसर्वात्माभगवान्हरिरीश्वरः॥ श्रोतव्यः कीर्त्ति

रस॰पा॰

यत्ने =

श्री॰

२

तव्यश्च स्मर्त्तव्यश्चेच्छताभयं॥ पाद्मे च। स्मर्त्तव्यः सततं विष्णुर्विस्मर्त्तव्यो न जातुचित्। सर्वे विधिनिषेधाः
स्युरेतयोरेव किंकराः॥ इत्यसौ स्याद्विधिर्नित्यः सर्ववर्णाश्रमादिषु। नित्यत्वेप्यस्य निर्णीतमेकादश्य-
ऽऽदिवत्फलं॥ एकादशे तु वाक्यमेवोक्तं॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह। चत्वारो
जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक्॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं। न भजंत्यवजानं-
ति स्थानाद्भ्रष्टाः पतंत्यधः॥ तत्फलं च तत्रैव॥ एवं क्रियायोगपथैः पुमान् वैदिकतांत्रिकैः॥
अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां॥ पंचरात्रे च॥ सुरर्षे विहिता शास्त्रे हरिमुद्दिश्य या ।
क्रिया। सैव भक्तिरिति प्रोक्ता तया भक्तिः परा भवेदिति॥ अत्राधिकारी॥ यः केनाप्यतिभाग्येन जा-
तश्रद्धोस्य सेवने। नातिसक्तो न वैराग्यभागस्यामधिकार्यसौ॥ यथैकादशे॥ यदृच्छया मत्कथादौ
जातश्रद्धस्तु यः पुमान्। न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिद इति॥ उत्तमो मध्यमश्चेति क-
निष्ठश्चेति स त्रिधा॥ तत्रोत्तमः॥ शास्त्रे युक्तौ च निपुणः सर्वथा दृढनिश्चयः। प्रौढश्रद्धोऽधिकारी
यः स भक्तावुत्तमो मतः॥ मध्यमः॥ यः शास्त्रादिष्वनिपुणः श्रद्धावान् स तु मध्यमः॥ कनिष्ठः॥ यो

यथेनः शौनकादि

नवैकोमलश्रद्धः सकनिष्ठोनिगद्यते॥ तत्रगीतादिषूक्तानांचतुर्णामधिकारिणां। मध्येयस्मिन्
भगवतः कृपास्यात्तत्प्रियस्यवा॥ सक्षीणतत्तद्भावस्याच्छुद्धभक्त्यधिकारवान्॥ यथाभागवतेद्वितीये
योध्रुवः सचवतुः सनः। भुक्तिमुक्तिस्पृहा यावत् पिशाचीहृदिवर्त्तते। तावद्भक्तिसुखस्यात्र
कथमभ्युदयोभवेत्। तत्रापिचविशेषेणगतिमण्वीमनिच्छतः। भक्तिर्हृतमनः प्राणान् प्रेक्षाता
न्कुरुतेजनान्॥ तथाचतृतीये॥ तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः हृ
तात्मनोहृतप्राणांश्चभक्तिरनिच्छतोमेगतिमण्वीप्रयुंक्तइति॥ श्रीकृष्णचरणांभोजसेवानि
र्वृतचेतसां। एषांमोक्षायभक्तानांनकदापिस्पृहाभवेत्॥ यथातत्रैवश्रीमदुद्धवोक्तौ॥ कोन्वी
शतेपादसरोजभाजांसुदुर्लभोर्थेषुचतुर्ष्वपीह। तथापिनाहंप्रवृणोमिभूमन्भवत्पदां
भोजनिषेवणोत्सुकः॥ तत्रैवश्रीकपिलदेवोक्तौ॥ नैकात्मतांमेस्पृहयंतिकेचिन्मत्पादसेवाभिरतामद
दीहाः। येन्योन्यतोभागवताः प्रसज्यसभाजयंतेममपौरुषाणि॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैक
त्वमप्युत। दीयमानंनगृह्णंतिविनामत्सेवनंजनाः॥ चतुर्थेश्रीध्रुवोक्तौ॥ यानिर्वृतिस्तनुभृतांतवपाद

४

एकैकं मंत्रविद्वाद्विरकीनक्यं गानुच्येत ।

थानस्पृशातो ... मोपासकं विधिपूर्वकं ॥ एकादशस्कंधएव ॥ स्वपादमूलंभजतः प्रियस्यत्यक्तान्यभावस्य हरिःप
रेशः ॥ विकर्मयच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि संनिविष्ट इति ॥ हरिभक्तिविलासे ऽस्याभक्तेरंगानि लक्ष
शः ॥ ... किंतु तानि प्रसिद्धानि निर्दिश्यंते यथामति ॥ तत्रांगलक्षणं ॥ आश्रितावांतरानेकभेदं केवलमेव वा ॥
॥ अथांगानि ॥ गुरुपादाश्रय १ स्तस्मात्कृष्णदीक्षादिशिक्षणं २ ॥ विश्रंभेण गुरोः सेवा ३ साधुवर्त्मानुवर्त्तनं ४ ॥ सद्धर्म
पृच्छा ५ भोगादित्यागः ६ कृष्णस्य हेतवे ॥ ६ निवासो द्वारकादौ च गंगादेरपि सन्निधौ ॥ ७ व्यवहारेषु सर्वेषु यावदर्था
नुवर्त्तिता ॥ ८ हरिवासरसंमानो ९ धात्र्यश्वत्थादिगौरवं ॥ १० एषामत्र दशांगानां भवेत्प्रारंभरूपता ॥ संगत्यागो
विदूरेण भगवद्विमुखैर्जनैः ॥ ... १ शिष्याद्यननुबंधित्वं २ महारंभाद्यनुद्यमः ३ ॥ बहुग्रंथकलाभ्यासव्या
ख्यावादविवर्जनं ॥ ४ व्यवहारेऽप्यकार्पण्यं ५ शोकाद्यवशव ... र्तिता ॥ ६ ॥ अन्यदेवानवज्ञा च ७ भूतानुद्वेगदा
यिता ॥ सेवानामापराधानामुद्भवाभावकारिता ॥ ९ कृष्णतद्भक्तविद्वेषविनिंदाद्यसहिष्णुता ॥ १० व्यतिरेकि
तयामीषां दशानां स्यादनुष्ठितिः ॥ अस्यास्तत्र प्रवेशाय द्वारत्वेप्यंगविंशतेः ॥ त्रयं प्रधानमेवोक्तं गुरु
पादाश्रयादिकं ॥ धृतिर्वैष्णवचिह्नानां १ हरेर्नामाक्षरस्य च ॥ २ निर्माल्यादेश्च ३ तस्याग्रे तांडवं ४ दंड

श्रीरसामृ॰

वन्नतिः ५ । अन्युत्थानं ६ मनुव्रज्या ७ गतिंस्थाने ८ परिक्रमाः ९ । अर्चनं १० परिचर्या च ११ गीतं १२ संकीर्त्त-
नं १३ जपः १४ विज्ञप्तिः १५ स्तवपाठश्च १६ स्वादो नैवेद्य १७ पाद्ययोः १८ । धूपमाल्यादिसौरभ्यं । १९ श्री-
मूर्त्तेः स्पृष्टिः २० रीक्षणं । २१ आरात्रिकोत्सवादेश्च २२ श्रवणं २३ तत्कृपेक्षणं । २४ । स्मृतिः २५ र्ध्यानं २६ त-
था दास्यं २७ सख्यं २८ मात्मनिवेदनं । २९ । निजप्रियोपहरणं ३० तदर्थेऽखिलचेष्टितं । ३१ । सर्वथा श-
रणापत्तिः ३२ स्तदीयानां च सेवनं । तदीयास्तुलसी ३३ शास्त्र ३४ मथुरा ३५ वैष्णवादयः । ३६ । यथावै-
भवसामग्री ३७ सद्गोष्ठीभिर्महोत्सवः । ऊर्जादरो ३८ विशेषेण यात्राजन्मदिनादिषु । ३९ । श्रद्धा विशे-
षतः प्रीतिः श्रीमूर्त्तेरङ्घ्रिसेवने । ४० । श्रीमद्भागवतार्थानामास्वादो रसिकैः सह । ४१ । सजातीयाशये
स्निग्धे साधौ संगः स्वतो वरे । ४२ । नामसंकीर्त्तनं ४३ श्रीमन्मथुरामंडले स्थितिः । ४४ । अंगानां पंच-
कस्यास्य पूर्वं विलिखितस्य च । निखिलश्रैष्ठ्यबोधाय पुनरप्यत्र शंसनं ॥ इति कायहृषीकांतः-
करणानामुपासनाः । चतुःषष्टिः पृथक् सांघातिकभेदात् क्रमादिमाः ॥ अथार्षानुमतेनैषामु-
दाहरणमीर्यते ॥ तत्र गुरुपादाश्रयो यथा ॥ एकादशे ॥ तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं ॥

द्वि॰ श्री॰

पू॰

७

पृ॰ ३

शाब्देपरेचनिष्णातंब्रह्मण्युपशमाश्रयं॥३॥ कृष्णदीक्षादिशिक्षणंयथा॥ तत्रैव॥ तत्रभागवतान्धर्मान्
शिक्षेद्गुर्वात्मदैवतः। अमाययानुवृत्त्यायैस्तुष्येदात्मात्मदोहरिः॥२॥ विश्रंभेणगुरोःसेवायथा॥ तत्रै
व॥ आचार्यंमांविजानीयान्नावमन्येतकर्हिचित्। नमर्त्यबुद्ध्यासूयेतसर्वदेवमयोगुरुः॥३॥ साधु
वर्त्मानुवर्तनंयथास्कांदे॥ समृग्यःश्रेयसांहेतुःपंथाःसंतापवर्जितः। अनवाप्तश्रमंपूर्वेयेनसंतः
प्रतस्थिरे॥४॥ ब्रह्मयामलेच। श्रुतिस्मृतिपुराणादिपंचरात्रविधिंविना। ऐकांतिकीहरेर्भक्तिरुत्पातायै
वकल्पते॥ भक्तिरैकांतिकीवेयमविचारात्प्रतीयते। वस्तुतस्तुतथानैवयदशास्त्रीयतेक्ष्यते॥५॥ स
द्धर्मपृच्छायथानारदीये॥ अचिरादेवसर्वार्थःसिद्ध्यत्येषामभीप्सितः। सद्धर्मस्यावबोधाययेषांनिर्बंधि
नीमतिः॥५॥ कृष्णार्थेभोगादित्यागोयथापाद्मे॥ हरिमुद्दिश्यभोग्यानिकालेत्यक्तवतस्तव। विष्णुलोक
स्थितासंपदलोलासाप्रतीक्षते॥६॥ द्वारकादिनिवासोयथास्कांदे॥ संवत्सरंवाषण्मासान्मासंवमासार्द्ध
मेववा। द्वारकावासिनःसर्वेनरानार्यश्चतुर्भुजाः॥ आदिशब्देनपुरुषोत्तमवासश्च॥ यथाब्राह्मे॥ अहो
क्षेत्रस्यमाहात्म्यंसमंताद्दशयोजनं। दिविष्ठायत्रपश्यंतिसर्वानेवचतुर्भुजान्॥ गंगादिवासोयथा

श्रीरसामृ०

प्रथमे॥ यावेल्लसद्भीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांवुनेत्री। पुनातिलोकानुभयत्रसेशान्नूक
स्तांनसेवेतमरिष्यमाणः॥७॥ यावदर्थानुवर्त्तिता यथानारदीये॥ यावतास्यात्स्वनिर्वाहः स्वीकुर्या
त्तावदर्थवित्। आधिक्येन्यूनतायांच च्यवते परमार्थतः॥८॥ हरिवासरसंमानो यथा॥ ब्रह्मवैवर्त्ते॥ सर्वपा
पप्रशमनं पुण्यमात्यंतिकं तथा। गोविंदस्मारणं नृणां यदेकादश्युपोषणं॥९॥ धात्र्यश्वत्थादिगौरवं
यथास्कांदे॥ अश्वत्थतुलसीधात्रीगोभूमीसुरवैष्णवाः। पूजिताः प्रणताध्याताः क्षपयंति नृणामघं
॥१०॥ अथकृष्णविमुखसंगत्यागः॥ यथाकात्यायनसंहितायां॥ वरंहुतवहज्वालापंजरांतर्व्यवस्थितिः
। नशौरिचिंताविमुखजनसंवासवैशसं॥११॥ विष्णुरहस्ये च॥ आलिंगनं वरंमन्ये व्यालव्याघ्रजलौ
कसां। नशीसंगः शल्ययुक्तानांनानादेवैकसेविनां॥१२॥ शिष्याद्यननुबंधित्वादित्रयं यथासप्तमे।
। शिष्यान्नैवानुबध्नीयाद्ग्रंथान्नैवाभ्यसेद्बहून्। नव्याख्यामुपयुंजीत नारंभानारभेत्क्वचित्॥१४॥
व्यवहारेप्यकार्पण्यं यथापाद्मे॥ अलब्धेवाविनष्टेवाभक्ष्याच्छादनसाधने॥ अविक्लवमतिर्भूत्वा
हरिमेवधियास्मरेत्॥१५॥ शोकाद्यवशवर्त्तिता॥ यथातत्रैव॥ शोकामर्षादिभिर्भावैराक्रांतंय

श्री०

स्यमानसं।कथंतत्रमुकुंदस्यस्फूर्त्तिसंभावनाभवेत्॥१६॥अन्यदेवानवज्ञायथा।तत्रैव॥हरिरेवस
दाराध्यःसर्वदेवेश्वरेश्वरः।इतरेब्रह्मरुद्राद्यानावज्ञेयाःकदाचन॥१७॥भूतानुद्वेगदायिता॥
यथामहाभारते॥पितेवपुत्रंकरु[illegible]॥नोद्वेजयतियोजनं।विशुद्धस्यहृषीकेशस्तूर्णंतस्यप्रसीद
ति॥१८॥सेवानामापराधवर्ज्जनं।यथावाराहे॥ म मार्चनापराधायेकीर्त्तितावसुधेमया।वैष्णवे
नसदातेतुवर्ज्जनीयाःप्रयत्नतः॥१९॥पाद्मे॥नामाश्रयःकदाचित्स्यात्तरत्येवसनामतः।नाम्नोपिस
र्वसुहृदोह्य पराधात्पतत्यधः॥२०॥तन्निंदाद्यसहिष्णुतायथा॥श्रीदशमे॥निंदांभगवतःशृत्वा
तत्परस्यजनस्यवा।ततोनापैतियःसोपियात्यधःसुकृताच्च्युतः॥२०॥अथ वैष्णवचिह्नधृतिर्यथा।
पाद्मे॥येकंठसक्ततुलसीनलिनाक्षमालायेवाकुमूलपरिचिह्नितशंखचक्राः।येवाललाट फल
केलसदूर्ध्वपुंड्रास्तेवैष्णवाभुवनमाशुपवित्रयंति॥२१॥नामाक्षरधृतिर्यथा॥स्कांदे॥हरिनामाक्ष
रयुतंभालेगोपीमृदंकितं।तुलसीमालिकोरस्कंस्पृशेयुर्नयमोद्भवाः॥पाद्मेच॥कृष्णनामाक्षरैर्गा
त्रमंकयेच्चंदनादिना।सलोकपावनोभूत्वातस्यलोकमवाप्नुयात्॥२॥निर्माल्यधृतिर्यथैकादशे॥

॥त्वयोपयुक्तस्रग्गंधवासोलंकारचर्चिताः। उच्छिष्टभोजिनो दासास्तव मायां जयेम हि॥ स्कांदे च॥
कृष्णोत्तीर्णां यतु निर्माल्यं यस्यांगं स्पृशते मुने। सर्वरोगैस्तथा पापैर्मुक्तो भवति नारद॥३॥ अग्रे तां
डवं॥ यथा द्वारकामाहात्म्ये॥ यो नृत्यति प्रहृष्टात्मा भावैर्बहुसुभक्तितः। स निर्दहति पापानि मन्वंत
रशतैरपि॥ तथा। नारदोक्तौ च॥ नृत्यतां श्रीपतेरग्रे तालिकावादनैर्भृशं। उड्डीयंते शरीरस्थाः सर्वपा
तकपक्षिणः॥४॥ दंडवन्नतिः॥ नारदीये॥ एकोपि कृष्णाय कृतः प्रणामो दशाश्वमेधावभृथैर्न तुल्यः।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय॥५॥ अभ्युत्थानं। यथा ब्रह्मांडे॥ यानारूढं पुरः प्रेक्ष्य
समायांतं जनार्दनं। अभ्युत्थानं नरः कुर्वन् पातयेत्सर्वकिल्बिषं॥६॥ अथानुव्रज्या। भविष्योत्तरे॥ रथे
न सह गच्छंति पार्श्वतः पृष्ठतोऽग्रतः। विष्णुनैव समाः सर्वे भवंति श्वपचादयः॥७॥ स्थाने गतिः॥ स्थानं
तीर्थगृहं वास्य तत्र तीर्थगतिर्यथा॥ पुराणांत [illegible]रे॥ संसारमरुकांतारनिस्तारकरणक्षमौ॥ श्लाघ्यौ ताव
व चरणौ यौ हरेस्तीर्थगामिनौ॥ आलये यथा॥ हरिभक्तिसुधोदये॥ प्रविशन्नालयं विष्णोर्दर्शना
र्थं सुभक्तिमान्। न भूयः प्रविशेन्मातुः कुक्षिकारागृहं सुधीः॥८॥ परिक्रमा। तत्रैव॥ विष्णुं प्रदक्षि

णीकुर्वन्न्यत्तत्रावर्त्ततेपुनः॥तदेवावर्त्तनंतस्यपुनर्नावर्त्ततेभवे॥स्कांदेचातुर्मास्यमाहात्म्ये॥चतुर्वार
त्रमीस्तिस्तुजगत्सर्वंचराचरं॥क्रांतंनवतिविप्राश्च्यतत्तीर्थगमनाधिकमिति॥९॥अथार्चनं॥शुद्धिन्यासा
दिपूर्वांगकर्मनिर्वाहपूर्वकं॥अर्चनंतूपचाराणांस्यान्मंत्रेणोपपादनं॥तद्यथाश्रीदशमे॥स्वर्गापवर्गा
योःपुंसांरसायांभुविसंपदां॥सर्वासामपिसिद्धीनांमूलंतच्चरणार्चनं॥विष्णुरहस्येच॥श्रीविष्णोर
र्चनंयेतुर्कुर्वंतिनरात्तुवि॥तेयांतिशाश्वतंविष्णोरानंदंपरमंपदं॥१०॥परिचर्या॥परिचर्यातुसेवो
पकरणादिपरिष्क्रिया॥तथाप्रकीर्णकच्छत्रवादित्राद्यैरुपासना॥यथानारदीये॥मुहूर्त्तंवामुहूर्त्तार्
र्द्धंयस्तिष्ठेद्धरिमंदिरे॥सयातिपरमंस्थानंकिमुशुश्रूषणेरतः॥चतुर्थेच॥यत्पादसेवाभिरुचिस्तप
स्विनामशेषजन्मोपचितंमलंधियः॥सद्यःक्षिणोत्यन्वहमेधतीसतीयथापदंगुष्ठविनिःसृतासरि
दिति॥अंगानिविविधान्येवस्युःपूजापरिचर्ययोः॥नतानिलिखितान्यत्रग्रंथवाहुल्यभीतितः॥११॥अथगी
तं॥यथालैंगे॥ब्राह्मणोवासुदेवाख्यंगायमानोऽनिशंपरं॥हरेःसालोक्यमाप्नोतिरुद्रगानाधिकोभवे
त्॥१२॥संकीर्त्तनं॥नामलीलागुणादीनामुच्चैर्भाषातुकीर्त्तनं॥तत्रनामकीर्त्तनंयथा॥विष्णुधर्मे॥कृ

प्र =

श्रीरसा०पू०

श्रोतिमंगलंनामयस्य जात्विप्रवर्त्तितान्नस्मीन्नवंतिराजेंद्रमहापातककोटयः॥ लीलाकीर्त्तनंयथा।सप्तमे॥ सोहंपरस्यसुहृदःपरदेवतायालीलाकथास्तवनृसिंहविरिंचगीताः॥ अंजस्तितर्म्यनुगृणन्गुणविप्रमुक्तोदुर्गाणितेपदयुगालयहंससंगः॥ गुणकीर्त्तनंयथा॥ प्रथमे॥ इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धदत्तयोः॥ अविच्युतोऽर्थःकविभिर्निरूपितोयदुत्तमश्लोकगुणानुवर्णनं॥१३॥ जपः॥ मंत्रस्यसुलघूच्चारोजपइत्यभिधीयते॥ यथापाद्मे॥ कृष्णायनमइत्येषमंत्रःसर्वार्थसाधकः॥ न॥ भक्तानांजपतांनृप स्वर्गमोक्षफलप्रदः॥१४॥ विज्ञप्तिः॥ यथास्कांदे॥ हरिमुद्दिश्यपयत्किंचित्कृतंविज्ञपनंगिरा॥ मोक्षद्वारार्गलामोक्षस्तेनैवविहितस्तवेति॥ संप्रार्थनात्मिकादैन्यवोधिकालालसामयी॥ इत्यादिर्विविधाधीरैःकृष्णेविज्ञप्तिरीरिता॥ तत्रसंप्रार्थनात्मिका॥ यथापाद्मे॥ युवतीनांयथायूनियूनांचयुवतौयथा॥ मनोऽभिरमतेतद्वन्मनोमेरमतांत्वयि॥ दैन्यवोधिकायथा॥ तत्रैव॥ मत्तुल्योनास्तिपापात्मानापराधीचकश्चन॥ परीहारेपिलज्जामेकिंब्रुवेपुरुषोत्तम॥ लालसामयीयथा॥ श्रीनारदपंचरात्रे॥ कदागंभीरयावाचाश्रियायुक्तोजगत्पते।

श्री०

१०

चामरव्यग्रहस्तंमामेवंकुर्विति वक्ष्यसीति ॥ यथा वा ॥ कदाहं यमुनातीरेनामानि तव कीर्तयन्॥ उद्बाष्पः पुंडरीकाक्ष रचयिष्यामि तांडवं ॥ २५ ॥ स्तवपाठः ॥ प्रोक्ता मनीषिभिर्गीतास्तवराजादयः स्तवाः ॥ यथा ॥ स्कांदे ॥ श्रीकृष्णस्तवरत्नौघैर्येषां जिह्वा त्वलंकृता ॥ नमस्या मुनिसिद्धानां वंदनीया दिवौकसां ॥ नारसिंहे च ॥ स्तोत्रैः स्तवैश्च देवाग्रे यः स्तौति मधुसूदनं ॥ सर्वपापविनिर्मुक्तो विष्णुलोकमवाप्नुयात् ॥ २६ ॥ अन्ने नैवेद्यस्वादः ॥ यथा पाद्मे ॥ नैवेद्यमन्नं तुलसीविमिश्रं विशेषतः पादजलेन सिक्तं ॥ यो ऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यं ॥ २७ ॥ पाद्यस्वादः ॥ यथा पाद्मे तत्रैव ॥ न दानं न हविर्येषां स्वाध्यायो न सुरार्चनं ॥ ते ऽपि पादोदकं पीत्वा प्रयांति परमां गतिं ॥ २८ ॥ अथ धूपसौरभ्यं ॥ यथा तन्त्रे सुधोदये ॥ आघ्राणं यद्धरेर्दत्तधूपोच्छिष्टस्य सर्वतः ॥ तद्भवव्यालदष्टानां नस्यं कर्मविषापहं ॥ माल्यसौरभ्यं ॥ यथा तंत्रे ॥ प्रविष्टे नासिकारंध्रे हरेर्निर्माल्यसौरभे ॥ सद्यो विलयमायाति पापपंजरबंधनं ॥ अगस्त्यसंहितायां च ॥ आघ्राणं गंधपुष्पादेरर्चितस्य तपोधन ॥ विशुद्धिः स्यादनंतस्य घ्राणस्येहाभिधीयते ॥ २९ ॥ अथ श्रीमूर्तेः स्पर्शनं ॥ यथा विष्णुधर्मोत्तरे ॥ स्पृष्ट्वा विष्णोरधिष्ठानं पवित्रः

अ ५

६ श्रवणं नामचरितगुणादीनां श्रुतिर्भवेत्। तत्र नामश्रवणं यथा गारुडे॥ संसारसर्पसंदष्टनष्टचेष्टैकभेषजं। कृष्णेति वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नरः॥ ६ चरितश्रवणं ६

श्रीरसा०पू०

श्रद्धयान्वितः। पापबंधैर्विमुनिर्मुक्तः सर्वान्कामानवाप्नुयात्॥२०॥ अथ श्रीमूर्त्तेर्दर्शनं॥ यथा वाराहे॥ वृंदावने तु गोविंदं ये पश्यंति वसुंधरे। न ते यमपुरं यांति यांति पुण्यकृतां गतिं॥२१॥ आरात्रिकदर्शनं। यथा स्कांदे॥ कोटयो ब्रह्महत्यानामगम्यागमकोटयः। दहत्यालोकमात्रेण विष्णोः सारात्रिकं मुखं॥ उत्सवदर्शनं यथा॥ भविष्योत्तरे॥ रथस्थं ये निरीक्षंते कौतुकेनापि केशवं। देवतानां गणाः सर्वे भवंति श्वपचादयः॥ आदिशब्देन पूजादर्शनं यथा॥ आग्नेये॥ पूजितं पूज्यमानं वा यः पश्येद्भक्तितो हरिं। श्रद्धयामोदमानस्तु सोपि योगफलं लभेत्॥२२॥ अथ श्रवणं। यथा चतुर्थे॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूष... रितः परितः स्रवंति। ता ये पिवंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भयशोकमोहाः॥ गुणश्रवणं यथा द्वादशे॥ यस्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममंगलघ्नः। तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः॥२३॥ अथ तत्कृपेक्षणं यथा श्रीदशमे॥ तत्तेनुकंपां सुसमीक्षमाणो भुंजान एवात्मकृतं विपाकं। हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक्॥२४॥ स्मृतिः॥ यथा कथंचिन्मनसा संबंधः स्मृतिरुच्यते

श्री०

११

॥यथा विष्णुपुराणे॥ स्मृते सकलकल्याणभाजनं यत्र जायते। पुरुषस्तमजं नित्यं व्रजामि शरणं हरिं
॥यथा वा पाद्मे॥ प्रयाणे चाप्रयाणे वा यन्नाम स्मरतां नृणां। सद्यो नश्यति पापौघो नमस्तस्मै चिदात्मने॥२५
।ध्यानं॥ ध्यानं रूपगुणक्रीडासेवनं ४ सुष्ठु चिंतनं॥ तत्र रूपध्यानं। यथा नारसिंहे॥ नगनन्दनराणहृद्ध्या
नेनि ईद्धमीरितं। पापिनोपि प्र[illegible]नविदितं सुहितं परं॥ गुणध्यानं यथा॥ विष्णुधर्मे॥ ये कुर्वंति स
दा भक्त्या गुणानुस्मरणं हरेः४ क्षीणकलुषौघास्ते प्रविशंति हरेः४ पदं॥ क्रीडाध्यानं यथा पा
द्मे॥ सर्वमाधुर्यसाराणि सर्वाद्भुतमयानि च। ध्यायन्हरेश्चरित्राणि ललितानि विमुच्यते॥ से
वाध्यानं। यथा पुराणांतरे॥ मानसेनोपचारेण परिचर्य हरिं मुदा। परेवाङ्मनसागम्यं तं साक्षा
त्प्रतिपेदिरे॥२६॥ अथ दास्यं॥ दास्यं कर्मार्पणं तस्य कैंकर्यमपि सर्वथा॥ तत्राद्यं यथा स्कांदे॥ तस्मि
न्समर्पितं कर्म स्वाभाविकमपीश्वरे। न वेद्भागवतं धर्मं तत्कर्म किमुतार्पितमिति। कर्मस्वाभाविके
न्द्रं जपध्यानार्चनादि च। इतीदं द्विविधं कृष्णे वैष्णवैर्दास्यमर्पितं॥ मृदुश्रद्धस्य कथिता स्व
ल्या कर्माधिकारिता। तदर्पितं हरौ दास्यमिति कैश्चिदुदीर्यते॥ द्वितीयं यथा नारदीये॥ ईहा

रस ५   वि ४

भ॰रसा॰पू॰

यस्य हरेर्दास्ये कर्मणा मनसा गिरा। अखिलास्वप्यवस्थासु जीवन्मुक्तः स उच्यते॥२७॥ अथ स-
ख्यं॥ विश्वासो मित्रवृत्तिश्च सख्यं द्विविधमीरितं॥ तत्राद्यं यथा॥ श्रीमहाभारते॥ प्रतिज्ञा तव गो-
विंद न मे भक्तः प्रणश्यति। इति संस्मृत्य संस्मृत्य प्राणान् संधारयाम्यहं॥ एकादशे च॥ त्रिभु-
वनविभवहेतवेऽप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्। न चलति भगवत्पदारविंदाल्लवनिमिषार्द्ध-
मपि स वैष्णवाग्र्यः॥ इति॥ श्रद्धामात्रस्य तद्भक्तावधिकारित्वहेतुता। अंगत्वमस्य विश्वासविशेषस्य तु केश-
वे॥ द्वितीयं यथा अगस्त्यसंहितायां॥ परिचर्यापराः केचित्प्रासादेषु च शेरते। मनुष्यमिव तं द्रष्टुं व्यवह-
र्तुं च बंधुवदिति। रागानुगांगतास्य स्याद्विधिमार्गानपेक्षणात्॥ मार्गद्वयेन चैतेन साध्या सख्यरतिर्म-
ता॥२८॥ अथात्मनिवेदनं॥ यथैकादशे॥ मर्त्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे॥
तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वा इति॥ अर्थो द्विधात्मशब्दस्य पंडितैरुपपाद्यते
देहयहंतास्पदं कैश्चिद्देहः केश्चिन्ममत्वभाक्॥ तत्र देही यथा॥ यामुनाचार्यस्तोत्रे॥ वपुरादिषु योऽपि को-
ऽपि वा गुणतोऽसानि यथा तथाविधः। तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः॥ देहो यथा न

श्री॰   १२

(नवानि)१   कौपि ४

स्पर्शपादशौचासनादिभिः ॥ आदिपु[राणे] ॥ ये मे भक्तजनाः पार्थ न मे भक्ताश्च ते जनाः ॥ मद्भक्तानां च ये भ-
क्तास्ते मम भक्ता स्मृता नराः इति ॥ यावन्ति [भ]क्तेरङ्गानि कथितानि ह । प्रायस्तावन्ति तद्भक्तभक्तेरपि बुधा
विदुः ॥ ३६ ॥ अथ यथा वैभवमहोत्स[वः] ॥ पाद्मे ॥ यः करोति महीपाल हरेर्गेहे महोत्सवं । तस्यापि भवते
नित्यं हरिलोके महोत्सवः ॥ ३७ ॥ [अथ दामो]दरः ॥ पाद्मे ॥ यथा दामोदरो भक्तवत्सलो विदितो जनैः । तस्यायं
तादृशो मासः स्वल्पमप्युरुकारकः ॥ तत्रापि माथुरे विशेषो यथा तत्रैव ॥ भुक्तिं मुक्तिं हरिर्दद्यादर्चितो-
न्यत्र सेविनां । भक्तिं तु न ददात्येव यतो वश्यकरी हरेः ॥ सा त्वञ्जसा हरेर्भक्तिर्लभ्यते कार्त्तिके नरैः ॥ मथुरायां स-
कृदपि श्रीदामोदरसेवनात् ॥ ३८ ॥ श्रीजन्मदिनयात्रा ॥ यथा भविष्योत्तरे ॥ यस्मिन् दिने प्रसूतेयं देवकी
त्वां जनार्दन । तद्दिनं ब्रूहि वैकुण्ठ कुर्मस्ते तत्र चोत्सवं ॥ तेन सम्यक्प्रपन्नानां प्रसादं कुरु केशव ॥ ३९ ॥ अथ
श्रीमूर्त्तेरङ्घ्रिसेवने प्रीतिर्यथा ॥ आदिपुराणे ॥ मम नाम सदाग्राही मम सेवाप्रियः सदा । भक्तिस्तस्मै
प्रदातव्या न तु मुक्तिः कदाचन ॥ ४० ॥ श्रीभागवतास्वादो यथा ॥ प्रथमे ॥ निगमकल्पतरोर्गलितं फ-
लं शुकमुखादमृतद्रवसंयुतं । पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ द्वितीये च

श्रीरसा॰पू॰

॥परिनिष्ठितोपि नैर्गुण्य उत्तमश्लोकलीलया। गृहीतचेता राजर्षे आख्यानं यदधीतवान्॥४१॥ सजातीयवासनश्रीमत्साधुसंगो यथा॥ चतुर्थे॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवं। भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः॥ हरिभक्तिसुधोदये च॥ यस्य यत्संगतिः पुंसो मणिवत्स्यात्स तद्गुणः। स्वकुलर्द्ध्यै ततो धीमान् स्वयूथ्यानेव संश्रयेत्॥४२॥ नामसंकीर्त्तनं यथा द्वितीये॥ एतन्निर्विद्यमानानामिच्छतामकुतोभयं। योगिनां नृप निर्णीतं हरेर्नामानुकीर्त्तनं॥ आदिपुराणे च॥ गीत्वा तु मम नामानि विचरेन्मम संनिधौ। इति ब्रवीमि ते सत्यं क्रीतो हं तस्य चार्जुन॥ पाद्मे च॥ येन जन्मसहस्राणि वासुदेवो निषेवितः। तन्मुखे हरिनामानि सदा तिष्ठन्ति भारत॥ तत्रैव॥ नामचिंतामणिः कृष्णश्चैतन्यरसविग्रहः पूर्णः शुद्धो नित्यमुक्तो भिन्नत्वान्नामनामिनो॥४३॥ अतः श्रीकृष्णनामादि न भवेद्ग्राह्यमिंद्रियैः। सेवोन्मुखे हि जिह्वादौ स्वयमेव स्फुरत्यदः॥ श्रीमथुरामंडले स्थितिः॥ पाद्मे॥ अन्येषु पुण्यतीर्थेषु मुक्तिरेव महाफलं। मुक्तेः प्रार्थ्या हरेर्भक्तिर्मथुरायां तु लभ्यते॥ त्रिवर्गदा कामिनां या मुमुक्षूणां च मोक्षदा। भक्तीच्छोर्भक्तिदा कस्तां मथुरां नाश्रयेद्बुधः॥ अहो मधुपुरी धन्या वैकुंठाच्च गरीयसी

श्री॰

१४

श्र ५

रिता ४

दिनमेकंनिवासेनहरौभक्तिःप्रजायतइति॥४४॥दुरूहाद्भुतवीर्येस्मिन्श्रद्धादूरेस्तुपंचके।यत्रस्वल्पो॥
पिसंबंधःसद्धियांभावजन्मने॥तत्रश्रीमूर्त्तिर्यथा॥स्मेरांभंगीत्रयपरिचितांसाचिविस्तीर्णदृष्टिंवंशी
न्यस्ताधरकिसलयामुज्वलांचंद्रकेण।गोविंदाख्यांहरितनुमितःकेशितीर्थोपकंठेमाप्रेक्षिष्ठास्तवय
दिसखेबंधुसंगेस्तिरंगः॥श्रीभागवतंयथा॥शंकेनीताःसपदिदशमस्कंधपद्यावलीनांवर्णान्क
र्णाध्वनिपथिकतामानुपूर्व्याद्भवंतः।हंहोडिंभाःपरमशुभदान्हंतधर्मार्थकामान्यद्धसंतःसुखम
यमीममीमोक्षमप्याक्षिपंति॥कृष्णभक्तोयथा॥दृगंभोभिर्धौतःपुलकपटलीमंडिततनुःस्खलन्नंतः(
फुल्लोदधदतिपृथुंवेपथुमपि।दृशोःकक्षांयावन्ममसपुरुषःकोप्युपययौनजानेकिंतावन्मतिरिह
गृहेनाभिरमते॥नामयथा॥यदवधिममशीतावैणिकेनानुगीताश्रुतिपथमघशत्रोर्नामगाथाप्रया
ता।अनवकलितपूर्वांहंतकामप्यवस्थांतदवधिदधदंतर्मानसंशाम्यतीव॥श्रीमाथुरमंडलंयथा॥तदनु
विद्रुतकांतिःश्यामलायास्तटिन्याःस्फुटितनवकदंबालंबिकूजद्विरेफाः।निरवधिमधुरिम्णामंडिते
यंकथंमेमनसिकमपिभावंकाननश्रीस्तनोति॥केषांचित्क्वचिदंगानांयत्क्षुद्रंश्रूयतेफलं।वहिर्मुख

श्रीरसा॰पू॰

प्रष्टव्यैतत् किंतु मुख्यं फलं रतिः॥ सम्मतं भक्ति विज्ञानां भक्त्यंगत्वं न कर्मणां॥ यथैकादशे॥ तावत्क-
र्माणि कुर्वीत न निर्विद्येत यावता॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत इति॥ ज्ञानवैराग्ययो-
र्भक्ति प्रवेशायोपयोगिता॥ ईषत् प्रथममेवेति नांगत्वमुचितं तयोः॥ यदुभे चित्तकाठिन्यहेतू
प्रायः सतां मते॥ सुकुमारस्वभावेयं भक्तिस्तद्धेतुरीरिता॥ यथा तत्रैव॥ तस्मान्मद्भक्तियुक्तस्य यो-
गिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहेति॥ किंतु ज्ञानविरक्त्यादि साध्यं भ-
क्त्यैव सिद्ध्यति॥ यथा तत्रैव॥ य[illegible]र्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्॥ योगेन दानधर्मेण श्रे-
योभिरितरैरपि॥ सर्वं मद्भक्तियो[illegible]न मद्भक्तो लभतेंजसा॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछ-
तीति॥ रुचिमुद्वहतस्तत्र जनस्य[illegible]रे॥ विषयेषु गरिष्ठोपि रागः प्रायो विलीयते॥ अनासक्तस्य
विषयान् यथार्हमुपयुंजतः॥ निर्ब[illegible]ः कृष्णसंबंधे युक्तं वैराग्यमुच्यते॥ प्रापंचिकतया बुद्ध्या हरि-
संबंधि वस्तुनः॥ मुमुक्षुभिः परित्य[illegible]ो वैराग्यं फल्गु कथ्यते॥ प्रोक्तेन लक्षणेनैव भक्तेरधिकृतः
स्य च॥ अंगत्वे सुनिरस्तेपि नित्यादि[illegible]ल्लकर्मणां॥ ज्ञानस्याध्यात्मिकस्यापि वैराग्यस्य च फल्गुनः

श्री॰

१५

।स्पष्टतार्थेपुनरपितदेवेदंनिराकृतं॥ धनशिष्यादिभिर्द्वारैर्याभक्तिरुपपद्यते।विदूरत्वादुत्तम
ताहान्यातस्याश्चनांगता॥ विशेषणत्वमेवैषांसंश्रयंत्यधिकारिणां।विवेकादीन्यतोमीषामपिनां
गत्वमीर्यते।कृष्णोन्मुखंस्वयंयांतियमाःशौचादयस्तथा।इत्येषांचनयुक्तास्याद्भक्त्यंगांतर
पातिता॥ यथास्कांदे॥ एतेनह्यद्भुताव्याधतवाहिंसादयोगुणाः।हरिभक्तौप्रवृत्तायेनतेस्युःपर
तापिनः॥ तत्रैव॥ अंतःशुद्धिर्बहिःशुद्धिस्तपःशांत्यादयस्तथा।अमीगुणाःप्रपद्यंतेहरिसेवाभि
कामिनमिति॥ साभक्तिरेकमुख्यांगाश्रितानेकांगिका।स्ववासनानुसारेणनिष्ठातःसिद्धिकृ
द्भवेत्॥ तत्रैकांगायथाग्रंथांतरे॥ श्रीविष्णोःश्रवणेपरीक्षिदभवद्वैयासकिःकीर्त्तनेप्रह्लादः
स्मरणेतदंघ्रिभजनेलक्ष्मीःपृथुःपूजने।अक्रूरस्त्वभिवंदनेकपिपतिर्दास्येथसख्येर्जुनः
सर्वस्वात्मनिवेदनेवलिरभूत्कृष्णाप्तिरेषांपरं॥ अनेकांगायथानवमे॥ सवैमनःकृष्णपदारविंद
योर्वचांसिवैकुंठगुणानुवर्णने।करौहरेर्मंदिरमार्जनादिषुश्रुतिंचकाराच्युतसत्कथोदये॥
मुकुंदलिंगालयदर्शनेदृशौतद्भृत्यगात्रस्पर्शेंगसंगमं।घ्राणंचतत्पादसरोजसौरभेश्रीम

तुज्ञस्यारसनांतदर्पितिः॥पादोदकेश्छेत्रपदानुसर्पिणोः शिरोहृषीकेशपदाभिवंदने। कामंतुदास्येन
तुकामकाम्यया यथोत्तमश्लोकजनाश्रयारतिरिति॥ शास्त्रोक्तया प्रवल्लया तत्तन्मर्यादयान्विता॥
वैधीभक्तिरियं कैश्चिन्मर्यादामार्ग उच्यते॥ ॥अथ रागानुगा॥ विराजंतीमभिव्यक्तं ब्रजवासिजना
दिषु। रागात्मिकामनुसृता यासा रागानुगोच्यते॥ रागानुगाविवेकार्थमादौ रागात्मिकोच्यते। इष्टे
स्वारसिकी रागः परमाविष्टता भवेत्। तन्मयी या भवेद्भक्तिः सात्र रागात्मिकोदिता॥ साकामरूपा
संबंधरूपा चेति भवेद्द्विधा॥ त[illegible]हि सप्तमे॥ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः। आवेश्य तत्
दघं हित्वा बहवस्तद्गतिं गताः॥ [illegible]पः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः। संबंधाद्वृष्णयो यू
यं स्नेहाद्भक्त्या वयं विभो इति॥ आ[illegible]कूल्य विपर्यासाद्भीतिर्द्वेषोपराहतो। स्नेहस्य सख्यवाचित्वाद्वै
धभक्त्यनुवर्तिता॥ किंवा प्रेमाभि[illegible]वान्नोपयोगोत्र साधने। भक्त्या वयमिति व्यक्तं वैधीभक्ति
रुदीरिता॥ यदरीणां प्रियाणां च प्राप[illegible]मेवोदितं। तद्ब्रह्मकृष्णयोरैक्यात् किरणार्कोपमाजुषोः॥ ब्र
ह्मण्यंतर्लयं यांति प्रायेणारयो विदुः[illegible]प्राप्यापि सारूप्याभासं मज्जंति तत्सुखे॥ तथा च ब्रह्मांड

श्री०

(ब्रह्मसुख) २

पुराणे॥सिद्धलोकस्तुतमसःपारेयत्रवसंतिहि सिद्धा[illegible]सुखेमग्नादैत्याश्चहरिणाहता इति॥रागवंधेनके
नापितंभजंतोव्रजंत्यमी।अंघ्रिपद्मसुधाःप्रेम[illegible]स्यप्रियाजनाः॥तथाहिश्रीदशमे॥निभृतमरु
न्मनोक्षदृढयोगयुजोहृदियन्मुनयउपासतेतद[illegible]पिययुःस्मरणात्।स्त्रियउरगेंद्रभोगभुजदंडवि
षक्तधियोवयमपितेसमाःसमदृशोंघ्रिसरोज[illegible]इति॥तत्रकामरूपा॥साकामरूपासंभोगतृष्णां
यानयतस्वतां।इयंतुव्रजदेवीषुसुप्रसिद्धाविराजते॥आसांप्रेमविशेषोयंप्राप्तःकामपिमाधुरीं।तत्त
क्रीडानिदानत्वात्कामइत्युच्यतेवुधैः॥तथाचतंत्रे॥प्रेमैवगोपरामाणांकामइत्यगमत्प्रथामिति।इत्यु
द्धवादयोप्येतंवांछंतिभगवत्प्रियाः।कामप्रायारतिःकिंतुकुब्जायामेवसंमता॥संवंधरूपा॥संवंध
रूपागोविंदेपितृत्वाद्यभिमानिता।अत्रोपलक्षणतयावृष्णीनांवल्लवामताः॥यदैश्यज्ञानशून्य
त्वादेषांरागेप्रधानता।कामसंवंधरूपेतेप्रेममात्रस्वरूपिके।नित्यसिद्धाश्रयतयानात्रसम्यग्विवा
रिते।रागात्मिकायाद्वैविध्यात्द्विधारागानुगाचसा॥कामानुगाचसंवंधानुगाचेतिनिगद्यते॥अ
त्राधिकारी॥रागात्मिकैकनिष्ठायेव्रजवासिजनादयः।तेषांभावाप्तयेलुब्धोभवेदत्राधिकारवान्

।तत्तद्भावादिमाधुर्येश्रुतेधीर्यदपेक्षते। नात्रशास्त्रंनयुक्तिंचतल्लोभोत्पत्तिलक्षणं।वैधभक्त्यधिकारी
तुभावाविर्भवनावधि।अत्रशास्त्रंतथातर्कमनुकूलमपेक्षते।कृष्णंस्मरन्‌जनंचास्यप्रेष्ठंनिजसमीहितं
।तत्तत्कथारतश्चासौकुर्याद्वासंव्रजेसदा।सेवासाधकरूपेणसिद्धरूपेणचात्रहि।तद्भावलिप्सुनाकार्या
व्रजलोकानुसारतः।श्रवणोत्कीर्त्तनादीनिवैधभक्त्युदितानितु।यान्यंगानिचतान्यत्रविज्ञेयानिमनीषिभिः
।तत्रकामानुगा॥कामानुगाभवेत्तृष्णाकामरूपानुगामिनी।संभोगेच्छामयीतत्तद्भावेच्छात्मेतिसा
द्विधा॥केलितात्पर्यवत्येवसंभोगेच्छामयीभवेत्।तद्भावेच्छात्मिकातासांभावमाधुर्यकामिता॥श्रीमूर्त्ते
र्माधुरींप्रेक्ष्यतत्तल्लीलांनिशम्यवा॥तद्भावकांक्षिणोयेस्युस्तेषुसाधनतानयोः॥पुराणेश्रूयतेपाद्मेपुं
सामपिभवेदियं॥यथा॥पुरामहर्षयःसर्वेदंडकारण्यवासिनः।दृष्ट्वारामंहरिंतत्रभोक्तुमैच्छन्‌सुविग्रहं
।तेसर्वेस्त्रीत्वमापन्नाःसमुद्भूताश्चगोकुले।हरिंसंप्राप्यकामेनततोमुक्ताभवार्णवादिति॥रिरंसांमात्र
मिच्छन्‌यो विधिमार्गेणसेवते।केवलेनैवसतदामहिषीत्वमियात्पुरे॥तथाचमहाकौर्म्मे॥अग्निपुत्रामहा
त्मानस्तपसास्त्रीत्वमापिरे।भर्त्तारंचजगद्योनिंवासुदेवमजंविभुमिति॥अथसंबंधानुगा॥सासंबं

सुष्ठुकुर्वन्‌ २

भा

यानुगा भक्तिः प्रोच्यते सद्भिरात्मनि। या पितृत्वादिसंबंध[मन]नारोपणात्मिका॥ लुब्धैर्वात्सल्यसख्यादौ भक्तिः

कार्यात्र साधकैः। व्रजेंद्रसुवलादीनां भावचेष्टितमु[द्रया]॥ तथाहि श्रूयते शास्त्रे कश्चित्कुरुपुरीस्थितः।

नंदसूनोरधिष्ठानं तत्र पुत्रतया भजन्। नारदस्योप[दे]शेन सिद्धोभूद्वृद्धवर्द्धकिः॥ अतएव नारायणव्यूह

स्तवे॥ पतिपुत्रसुहृद्भ्रातृपितृवन्मित्रवद्धरिं। ये ध्या[यं]ति सदोद्युक्तास्तेभ्योपीह नमो नमः इति॥ कृष्णतद्भक्त

कारुण्यमात्रलाभैकहेतुका। पुष्टिमार्गतया कैश्चि[दि]यं रागानुगोच्यते॥ ॥इति श्रीभक्तिरसामृतसिंधौ

पूर्वविभागे साधनभक्तिलहरी॥ २॥ ॥श्री॥ [अ]थ भावः॥ शुद्धसत्वविशेषात्मा प्रेमसूर्यांशुसाम्य

भाक्। रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते॥ तथाहि तंत्रे॥ प्रेम्णस्तु प्रथमावस्था भाव इत्यभिधीयते॥

सात्विकाः स्वल्पमात्राः स्युरत्राश्रुपुलकादयः॥ स यथा पद्मपुराणे॥ ध्यायं ध्यायं भगवतः पदांबुजयुगं

तदा। ईषद्विक्रियमाणात्मा सार्द्रदृष्टिरभूदसाविति॥ आविर्भूय मनोवृत्तौ व्रजंती तत्स्वरूपतां। स्वयंप्र

काशरूपापि भासमाना प्रकाश्यवत्। वस्तुतः स्वयमास्वादस्वरूपैव रतिस्त्वसौ। कृष्णादिकर्मकास्वाद

हेतुतां प्रतिपद्यते॥ साधनाभिनिवेशेन कृष्णतद्भक्तयोस्तथा। प्रसादेनातिधन्यानां भावो द्वेधाभिजायते

।आद्यस्तुप्रायिकस्तत्रद्वितीयोविरलोदयः।।तत्रसाधनाभिनिवेशजः।।वैधीरागानुगामार्गभेदेनपरि
कीर्त्तितः।द्विविधःखलुभावोऽत्रसाधनाभिनिवेशजः।।साधनेभिनिवेशस्तुतत्रनिष्पादयन्रुचिं।।
हरावासक्तिमापाद्यरतिंसंजनयत्यसौ।।तत्राद्योयथा।।प्रथमस्कंधे।।तत्रान्वहंकृष्णकथाःप्रगायता
मनुग्रहेणाशृणवंमनोहराः।तांश्रद्धयामेऽनुपदंविशृण्वतःप्रियश्रवस्यंगममाभवद्रतिरिति।।रत्यंकु
रभावएवात्रनतुप्रेमाभिधीयते।ममभक्तिःप्रवृत्तेतिवक्ष्यतेसयदग्रतः।।यथा।।इत्थंशरत्प्रावृषिकावृत
हरेर्विशृण्वतोमेऽनुसवंयशोऽमलं।संकीर्त्यमानंमुनिभिर्महात्मभिर्भक्तिःप्रवृत्तात्मरजस्तमोपहा।।तृ
तीयेच।।सतांप्रसंगान्ममवीर्यसंविदोभवंतिहृत्कर्णरसायनाःकथाः।तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धारतिर्भक्तिरनुक्रमिष्यतीति।।पुराणेनाट्यशास्त्रेचद्वयोस्तुरतिभावयोः।समानार्थतयाह्यत्रद्व
यमैक्येनलक्षितं।।द्वितीयोयथापाद्मे।।इत्थंमनोरथंवालाकुर्वतीनृत्यउत्सुका।हरिप्रीत्याचसर्वां
तांरात्रिमेवाह्यवाहयत्।।अथकृष्णतद्भक्तप्रसादजः।।साधनेनविनायस्तुसहसैवाभिजायते।सभावः
कृष्णतद्भक्तप्रसादजइतीर्यते।।तत्रकृष्णप्रसादजः।।प्रसादोवाचिकालोकदानहार्दादयोहरेः।।

श्री०

थ२

तत्र वाचिकप्रसादजो यथा॥ श्रीनारदीये॥ सर्वमंगलमूर्द्धन्या पूर्णानंदमयी सदा। द्विजेंद्र तव मय्यस्तु भ
क्तिरव्यभिचारिणी॥ आलोकदानजो यथा। स्कांदे॥ अदृष्टपूर्वमालोक्य कृष्णं जांगलवासिनः। विक्लिद्य
दंतरात्मानो दृष्टिं नाक्रष्टुमीशिरे॥ हार्दः॥ प्रसादश्चांतरो यः स्यात्स हार्द इति कथ्यते॥ यथा शुकसंहिता
यां॥ महाभागवतो जातः पुत्रस्ते बादरायण। विनोपायैरुपेयाभूद्विष्णुभक्तिरिहोदिता॥ अथ तद्भक्तप्र
सादजः॥ यथा सप्तमे॥ गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते। वासुदेवे भगवति यस्य नैसर्गिकी रति
रिति॥ नारदस्य प्रसादेन प्रह्लादे शुभवासना। निसर्गः सैव तेनात्र रतिर्नैसर्गिकी मता॥ स्कांदे च॥ अहो
धन्योसि देवर्षे कृपया यस्य तत्क्षणात्। नीचोप्युत्पुलको लेभे लुब्धको रतिमच्युत इति॥ भक्तानां भेद
तः सेयं रतिः पंचविधा मता। अग्रे विविच्य वक्तव्या तेनेनात्र प्रपंच्यते॥ क्षांतिरव्यर्थकालत्वं विरक्ति
र्मानशून्यता॥ आशाबंधः समुत्कंठा नामगाने सदा रुचिः॥ आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसति॥
स्थले। इत्यादयोनुभावाः स्युर्जातभावांकुरे जने॥ तत्र क्षांतिः॥ क्षोभहेतावपि प्राप्ते क्षांतिरक्षुभितात्
मता॥ यथा प्रथमे॥ तं मोपयातं प्रतियंतु विप्रा गंगा च देवी धृतचित्तमीशे। द्विजोपसृष्टः कुहकः

श्रीरसा॰पू॰

स्तब्धकोवादशावलंबंगायतविष्णुगाथाः॥ अथाव्यर्थकालत्वंयथा॥ भक्तिसुधोदये॥ वाग्भिस्तुवंतो
मनसास्मरंतस्तन्वानमंतोप्यनिशंनतृप्ताः॥ भक्ताःस्रवन्नेत्रजलाःसमग्रमायुर्हरेरेवसमर्पयंति॥
॥अथविरक्तिः॥ विरक्तिरिंद्रियार्थानांस्यादरोचकतास्वयं॥ यथापंचमे॥ योदुस्त्यजान्दारसुतान्सु
हृद्राज्यंहृदिस्पृशः॥ जहौयुवैवमलवदुत्तमश्लोकलालसः॥ अथमानशून्यता॥ उत्कृष्टत्वेप्य
मानित्वंकथितामानशून्यता॥ यथापाद्मे॥ हरौरतिंवहन्नेषनरेंद्राणांशिखामणिः॥ भिक्षामट

श्री॰

न्नरिपुरेश्वपाकमपिवंदते॥ अथाशाबंधः॥ आशाबंधोभगवतःप्राप्तिसंभावनादृढा॥ यथाश्री
प्रभुपादानां॥ नप्रेमाश्रवणादिभक्तिरपिवायोगोथवावैष्णवोज्ञानंवाशुभकर्मवाकियदहोस
ज्जातिरप्यस्तिवा। हीनार्थाधिकसाधकेत्वयितथाप्यच्छेद्यमूलासतीहेगोपीजनवल्लभव्यथ
यतेहाहामदाशैवमां॥ अथसमुत्कंठा॥ समुत्कंठानिजाभीष्टलाभायगुरुलुब्धता॥ यथाक
र्णामृते॥ आनम्रामसितभ्रुवोरुपचितामक्षीणपक्ष्मांकुरेष्वालोलामनुरागिणोर्नयनयो
रार्द्रांमृदौजल्पिते। आताम्रामधरामृतेमदकलाममलानवंशीस्वनेष्वाशास्तेममलोचनं।

व्रजशिशोर्मूर्त्तिर्जगन्मोहिनी ॥ अथ नामगाने रुचिर्यथा ॥ रोदनबिंदुमरंदस्यंदिदृगिंदीवराद्य गो-
विंद तव मधुरस्वर कंठी गायति नामावलिं बाला ॥ तद्गुणाख्याने आसक्तिर्यथा ॥ कर्णामृते ॥ मा-
धुर्यादपि मधुरं मन्मथतातस्य किमपि कैशोरं । चापल्यादपि चपलं चेतो बत हरति हंत किं कु-
र्मः ॥ तद्वसतिस्थले प्रीतिर्यथा ॥ पद्यावल्यां ॥ अत्रासीत्किल नंदसद्म शकटस्यात्राभवद्भंजनं बंधच्छेदकरोपि
दामभिरभूद्बद्धोत्र दामोदरः । इत्थं माथुरवृद्धवक्त्रविगलत्पीयूषधारां पिबन्नानंदाश्रुधरः कदा मधुपुरीं
धन्यश्चरिष्याम्यहं ॥ अपि च ॥ व्यक्तं मसृणतेवांतर्लक्ष्यते रतिलक्षणं । मुमुक्षुप्रभृतीनां चेद्भवेदेषा रतिर्न हि
॥ विमुक्ताखिलतर्षैर्या मुक्तैरपि विमृग्यते । या कृष्णेनातिगोप्याशु भजद्भ्योपि न दीयते ॥ सा भुक्तिमुक्तिका-
मत्वाच्छुद्धां भक्तिमकुर्वतां । हृदये संभवत्येषां कथं भागवती रतिः । किंतु बालचमत्कारकारी तच्चिह्नवीक्षया ॥
अभिज्ञेन सुबोधोयं रत्याभासः प्रकीर्त्तितः । प्रतिबिंबस्तथा छाया रत्याभासो द्विधा मतः ॥ तत्र प्रतिबिंबः ।
अश्रमाभीष्टनिर्वाही रतिलक्षणलक्षितः । भोगापवर्गसौख्यांशव्यंजकः प्रतिबिंबकः ॥ दैवात्सद्भक्तसंगेन
कीर्त्तनाद्यनुसारिणां । प्रायः प्रसन्नमनसां भोगमोक्षादिरागिणां । केषांचिद्धृदि भावेंदोः प्रतिबिंब उदंचति । त

श्री रसा० पू०

ञ्कञ्जनमस्थस्यतज्जसंसर्गप्रभावतः॥ अथच्छाया॥ क्षुद्रकौतूहलमयीचंचलादुःखहारिणी। रतेश्छायाभ
वेत्किंचित्तत्सादृश्यावलंबिनी॥ हरिप्रियक्रियाकालदेशपात्रादिसंगमात्। अप्यानुषंगिकादेषाक्वचिदज्ञे
ष्वपीक्ष्यते॥ किंतुभाग्यंविनानासौभावच्छायाप्युदंचति। यदभ्युदयतःक्षेमंतत्रस्यादुत्तरोत्तरं। हरिप्रियजन
स्यैवप्रसादभरलाभतः। भावाभासोऽपिसहसाभावत्वमुपगच्छति॥ तस्मिन्नेवापराधेनभावाभासोऽप्यनुत्त
मः। क्रमेणक्षयमायातिखस्थपूर्णशशीयथा॥ किंच। भावोऽपिभावमायातिकृष्णप्रेष्ठापराधतः। आभा
सतांचशनकैर्न्यूनजातीयतामपि। गाढासंगात्सदायातिमुमुक्षौसुप्रतिष्ठिते। आभासतामसौकिंवाभजनी

श्री०

येशभावतां॥ अतएवक्वचित्तेषुनव्यभक्तेषुदृश्यते। क्षणमीश्वरभावोयंनृत्यादौमुक्तिपक्षगः। साधनेद्धां
विनायस्मिन्नकस्माद्भावईक्ष्यते। विघ्नस्थगितमत्रोह्यंप्राग्भवीयंसुसाधनं॥ लोकोत्तरचमत्कारकारकःसर्व
शक्तिदः। यःप्रथीयान्भवेद्भावःसतुकृष्णप्रसादजः। जनेचेज्जातभावेपिवैगुण्यमिवदृश्यते। कार्यातथापि
नासूयाकृतार्थःसर्वथैवसः॥ यथानारसिंहे। भगवतिचहरावनन्यचेताभृशमलिनोपिविराजतेमनुष्यः
। नहिशशकलुषच्छविःकदाचित्तिमिरपराभवतामुपैतिचंद्रः॥ रतिरनिशनिसर्गोष्णप्रबलतरानंदपूरस्रू

यैव।कृष्णाननमपि वमंतीसुधांशुकोटेरपिस्वादुः॥ ॥इतिश्रीभक्तिरसामृतसिंधौपूर्वविभागेरतिभक्तिल
हरी॥ ॥श्री॥ ॥अथप्रेमा॥ ॥सम्यङ्मसृणितस्वांतोममत्वातिशयांकितः।भावःसएवसांद्रात्माबुधैःप्रेमा
निगद्यते॥यथा।पंचरात्रे॥अनन्यममताविष्णौममताप्रेमसंगता।भक्तिरित्युच्यतेभीष्मप्रह्लादोद्धवनारदैः॥
भक्तिःप्रेमोच्यतेभीष्ममुख्यैर्यत्रतुसंगता।ममतान्यममत्वेनवर्जितेत्यत्रयोजना॥भावोत्थोतिप्रसादोत्थःश्री
हरेरितिसद्विधा॥तत्रभावोत्थः॥रतिरेवांतरंगाणामंगानामनुसेवया।आरूढापरमोत्कर्षंभावोत्थःपरिकी
र्त्तितः॥तत्रवैधभावोत्थोयथा॥एकादशे॥एवंव्रतःस्वप्रियनामकीर्त्त्याजातानुरागोद्रुतचित्तउच्चैः।हस
त्यथोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबाह्यः॥रागानुगाभावोत्थोयथापाद्मे॥नपतिं-
ब्रह्मचर्यस्थितासदा।तामेवमूर्त्तिंध्यायंतीचंद्रकांतिर्वरानना॥श्रीकृष्णगाथांगायंतीरोमांचोद्भेदलक्षणा।असम
न्मन्वंतरेस्निग्धाश्रीकृष्णप्रियवार्त्तया॥अथहरेरतिप्रसादोत्थः॥हरेरतिप्रसादोयंसंगदानादिरात्मनः॥य
थैकादशे॥तेनाधीतश्रुतिगणानोपासितमहत्तमाः।अव्रतातप्ततपसोमत्संगान्मामुपागताः॥माहात्म्यज्ञा
नयुक्तश्चकेवलश्चेतिसद्विधा॥तत्राद्योयथा।पंचरात्रे॥माहात्म्यज्ञानयुक्तस्तुसुदृढःसर्वतोधिकः।स्नेहो

भ० र० सा०

दा ७

भक्तिरितिप्रे। क्तस्तयासार्ष्ट्यादिनान्यथा॥ केवलोयथातत्रैव॥ मनोगतिरविछिन्नाहरौप्रेमपरिप्लुता। अभि-
संधिविनिर्मुक्ताभक्तिर्विष्णुवशंकरी॥ महिमज्ञानयुक्तःस्याद्विधिमार्गानुसारिणां। रागानुगाश्रितानां
तुप्रायशःकेवलोभवेत्। आदौश्रद्धाततःसाधुसंगोथभजनक्रिया। ततोनर्थनिवृत्तिःस्यात्ततोनिष्ठा
रुचिस्ततः। अथासक्तिस्ततोभावस्ततःप्रेमाभ्युदंचति। साधकानामयंप्रेम्णःप्रादुर्भावेभवेत्क्रमः। धन्यस्या-
यंनवःप्रेमायस्योन्मीलतिचेतसि। अंतर्वाणिभिरप्यस्यमुद्रासुष्ठुसुदुर्गमा॥ अतएवनारायणपंचरात्रे॥
भावोन्मत्तोहरेःकिंचिन्नवेदसुखमात्मनः। दुःखंवेतिमहेशानिपरमानंदआप्लुतः॥ प्रेम्णएवविलास-
त्वाद्वैरल्यात्साधकेष्वपि। अत्रस्नेहादयोभेदाविविच्यनहिशंसिताः॥ श्रीमत्प्रभुपदांभोजैःसर्वाभागवता-
मृते। व्यक्तीकृतास्तिगूढापिभक्तिसिद्धांतमाधुरी॥ ॥गोपालरूपशोभांदधदपिरघुनाथभावविस्तारी।
तुष्यतुसनातनात्माप्रथमविभागेसुधांबुनिधेः॥ ॥इतिश्रीकृष्णरसामृतसिंधौरसोपयोगिस्थायिभावोप-
पादनोनामपूर्वोविभागः॥ ॥जयतिव्रजेंद्रनंदनः॥ ॥प्रबलमनन्याश्रयिणानिषेवितःसहजरूपेण। अघमथ-
नोमथुरायांसदासनातनतनुर्जयति॥ रसामृताब्धेर्भागेस्मिन्द्वितीयेदक्षिणाभिधे। सामान्योभगवद्भक्तिरसः॥

श्री०

=भक्ति

२१

स्तावदुदीर्यते॥ अस्यपंचलक्ष्र्यःस्युर्विभावाख्याःग्रिमाम[illegible]द्वितीयात्वनुभावाख्यातृतीयासात्त्विकार

भिधा। व्यभिचार्यभिधातुर्यास्थायिसंज्ञातुपंचमी॥ अथसामान्यकेशवरतेर्लक्षितायानिगद्यते। सामग्री

परिपोषेणपरमारसरूपता। विभावैरनुभावैश्चसात्त्विकैर्व्य भिचारिभिः॥ स्वाद्यत्वंहृदिभक्तानामा

नीताश्रवणादिभिः। एषाकृष्णरतिःस्थायीभावोभक्ति २ सोभवेत्। प्राक्तन्याधुनिकीचास्तियस्यसद्भक्ति

वासना। एषभक्तिरसास्वादस्तस्यैवहृदिजायते॥ भक्तिनिर्धूतदोषाणांप्रसन्नोज्ज्वलचेतसां। श्रीभागवत

रक्तानांरसिकासंगरंगिणां। जीवनीभूतगोविंदपादभक्तिसुखश्रियां। प्रेमांतरंगभूतानिकृत्यान्येवानु

तिष्ठतां। भक्तानांहृदिराजंतीसंस्कारयुगलोज्ज्वला। रतिरानंदरूपैवनीयमानातुरस्यतां। कृष्णादिभि

र्विभावाद्यैर्गतैरनुभवाध्वनि। प्रौढानंदचमत्कारकाष्ठामापद्यतेपरां॥ किंतुप्रेमाविभावाद्यैःस्वल्पैर्नी

तोप्यणीयसीं॥ विभावनाद्यवस्थांतुसद्यआस्वाद्यतांव्रजेत्॥ तत्रविभावादिसामान्यलक्षणं॥ येकृष्णभ

क्तमुरलीनादाद्याहेतवोरतेः। कार्यभूताःस्मिताद्याश्चतथाष्टौस्तंभतादयः॥ निर्वेदाद्याःसहायाश्च

तेज्ञेयारसभावने। विभावाअनुभावाश्चसात्त्विकाव्यभिचारिणः॥ तत्रविभावाः॥ तत्रज्ञेयाविभावास्तु

श्रीरसा०

रत्यास्वादनहेतवः॥तेद्विधालंबनाएकेतथैवोद्दीपनाःपरे।तदुक्तमग्निपुराणे॥विभाव्यतेहिरत्यादिर्य
त्रयेनविभाव्यते।विभावोनामसद्वेधालंबनोद्दीपनात्मकः॥तत्रालंबनाः॥कृष्णश्चकृष्णभक्ताश्च
बुधैरालंबनामताः॥रत्यादेर्विषयत्वेनतथाधारतयापिच॥तत्रकृष्णः॥नायकानांशिरोरत्नंकृ
ष्णस्तुभगवान्स्वयं।यत्रनित्यतयासर्वेविराजंतेमहागुणाः॥सोऽन्यरूपस्वरूपाभ्यामस्मिन्नालं
बनोमतः॥तत्रान्यरूपेणयथा॥हंतमेकथमुदेतिसवत्सोवत्सपालपटलेरतिरत्र॥इत्यनिश्चि

श्री०

तमतिर्बलदेवोविस्मयस्तिमितमूर्तिरिवासीत्॥अथस्वरूपं॥आवृतंप्रकटंचेतिस्वरूपंकथितं॥
द्विधा॥तत्रावृतं॥अन्यवेषादिनाछन्नंस्वरूपंप्रोक्तमावृतं।यथा॥मांस्नेहयतिकिमुच्चैर्महिले
यंद्वारकावरोधेऽत्र।आंविदितंकुतुकार्थीवनितावेषोहरिश्चरति॥प्रकटेनस्वरूपेणयथा॥अयं
कंबुग्रीवःकमलकमनीयाक्षिपटिमातमालश्यामांगद्युतिरतितरांछत्रितशिराः।दरश्रीवत्सां
कःस्फुरद्दरिमुद्राद्यंकितकरः करोत्युच्चैर्मोदंममम्धुरमूर्तिर्मधुरिपुः॥अथतद्गुणाः॥अ
यंनेतासुरम्यांगः१सर्वसल्लक्षणान्वितः२रुचिरः३तेजसायुक्तो४बलीयान्५वयसान्वितः६।

२२

तेन ५

।विविधाद्भुत७भाषाविस्तत्यवाक्य८८प्रियंवदः॥९वावदूकः१०सुपांडित्यो११बुद्धिमान्१२प्रतिभा
न्वितः॥१३॥विदग्ध१४श्चतुरो१५दक्षः१६कृतज्ञः१७सुदृढव्रतः१८।देशकालसुपात्रज्ञः१९शास्त्र
चक्षुः२०शुचि२१र्वशी।२२।स्थिरो२३दांतः२४क्षमाशीलो२५गम्भीरो२६धृतिमान्२७समः॥२८।
वदान्यो२९धार्मिकः३०शूरः३१करुणो३२मान्यमानकृत्।३३।दक्षिणो३४विनयी३५ह्रीमान्३६
शरणागतपालकः॥३७।सुखी३८भक्तसुहृन्३९प्रेमवश्यः४०सर्वशुभंकरः॥४१।प्रतापी४२की
र्तिमान्४३रक्तलोकः४४साधुसमाश्रयः॥४५।नारीगणमनोहारी४६सर्वाराध्यः४७समृद्धि
मान्४८।वरीयान्४९नीश्वरः५०श्चेतिगुणास्तस्यानुकीर्तिताः॥समुद्राइवपंचाशद्दुर्विगाह्या हरे
रमी।जीवेष्वेते वसंतोपि बिंदुबिंदुतयाक्वचित्।परिपूर्णतयाभांति तत्रैव पुरुषोत्तमे॥तथाहि पाद्मेपा
र्वत्यै शितिकंठेन तद्गुणाः॥कंदर्पकोटिलावण्य इत्याद्याः॥परिकीर्तिताः॥एतएवगुणाः॥प्रायोधर्मायवन
मालिनः॥पृथिव्याप्रथमस्कंधे प्रथयांचक्रिरेस्फुटं॥यथा॥सत्यंशौचंदयाक्षांतिस्त्यागः॥संतोषआर्जवं
शमोदमस्तपः॥साम्यंतितिक्षोपरतिः॥श्रुतं॥ज्ञानंविरक्तिरैश्वर्यंशौर्यंतेजोबलंस्मृतिः॥स्वातंत्र्यंकौशलं

कांतिःसौभगंधैर्यमार्दवं॥प्रागल्भ्यंप्रश्रयःशीलंसहओजोवलंभगः।गांभीर्यस्थैर्यमास्तिक्यंकीर्त्तिर्मा
नोनहंकृतिः।एतेचान्येचभगवन्नित्यायत्रमहागुणाः।प्रार्थ्यामहत्त्वमिच्छद्भिर्नवियंतिस्मकर्हिचिदिति।
।अथपंचगुणायेस्युरंशेनगिरिशादिषु।सदास्वरूपसंप्राप्तःसर्वज्ञोनित्यनूतनः।सच्चिदानंदसांद्रांगः
सर्वसिद्धिनिषेवितः।अथोच्यंतेगुणाःपंचयेलक्ष्मीशादिवर्त्तिनः।अविचिंत्यमहाशक्तिःकोटिब्रह्मां
डविग्रहः॥अवतारावलीवीजंहतारिगतिदायकः।आत्मारामगणाकर्षीत्यमीकृष्णेकिलाद्भुताः॥स
र्वाद्भुतचमत्कारलीलाकल्लोलवारिधिः।अतुल्यमधुरप्रेममंडितप्रियमंडलः।त्रिजगन्मानसा
कर्षिमुरलीकलकूजितः।असमानोर्द्ध्वरूपश्री।विस्मापितचराचरः।लीलाप्रेम्णाप्रियाधिक्यंमा
धुर्यंवेणुरूपयोः॥इत्यसाधारणंप्रोक्तंगोविंदस्यचतुष्टयं।एवंगुणाश्चतुर्भेदाश्चतुःषष्टिरुदाहृताः
।सोदाहरणमेतेषांलक्षणंक्रियतेक्रमात्॥तत्रसुरम्यांगः॥१॥श्लाघ्यांगसन्निवेशोयःसुरम्यांगःसक
थ्यते॥यथा॥मुखंचंद्राकारंकरभनिभमूरुद्वयमिदंभुजौस्तंभाकारौसरसिजवरेण्यंकरयुगं।कवा
टाभंवक्षःस्थलमविरलंश्रोणिफलकंपरिक्षामोमध्यःस्फुरतिमुरहंतुर्मधुरिमा॥सर्वसल्लक्षणा

कमठकमनीजपदयुगं।२

ा३ श्रि२

कित॥२॥ तनौ गुणोत्थमंकोत्थमिति सल्लक्षणं द्विधा॥ तत्र गुणोत्थं॥ गुणोत्थं स्यादङ्गुणैर्ये गौरक्ततातुंग
तादिभिः॥ यथा॥ रंगः॥ सन्नसुदंतषस्वपि शिरोरंगेष्वतीतुंगता॥ विस्तारस्त्रिषु खर्वता त्रिषु तथा गंभीरता
च त्रिषु दैर्घ्यं पंचसु किंच पंचसु सरवे संप्रेक्ष्यते सूक्ष्मता द्वात्रिंशद्वरलक्षणः॥ कथमसौ गोपेषु संजायते
॥ अंकोत्थं॥ रेखामयं रथांगादि स्यादंकोत्थं करादिषु॥ यथा॥ करयोः॥ कमलं तथा रथांगं स्फुटरेखामय
यमात्मजस्य पश्य। पदपल्लवयोश्च वल्लवेंद्र ध्वजवज्रांकुशमीनपंकजानि॥ रुचिरः॥३॥ सौंदर्येण
दृशामानंदकारी रुचिर उच्यते॥ यथा तृतीये॥ यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलो
कः॥ कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमंस्त॥ यथा वा॥ अश्रान्तानंदनुजनिदंगपंकजा
नामेकस्मिन्कथमपि यथैत्र वल्लवीनां। लोलाक्षिभ्रमरततिभिः पाततस्मान्नोत्थातुं द्युतिमधुपंकिलात्
क्षमासीत्॥ तेजसा युक्तः॥४॥ तेजो धाम प्रभावश्चेत्युच्यते द्विविधं बुधैः॥ तत्र धाम॥ दीप्तिराशिस्तवे
द्धाम॥ यथा॥ अंबरमणिनिकुरंबं विडंबयन्नपि मरीचिकुलैः। हरिवक्षसि दृढविनिविडे मणिराडय
मुडुरिव स्फुरति॥ प्रभावः॥ प्रभावो दुष्प्रधर्षता॥ यथा॥ दूरतस्तमवलोक्य माधवं कोमलांगमपि

श्रीरसा०

रंगमंडले। पर्वतोद्धटमुजांतरोप्यसौ कंसमल्लनिवहस्य स विव्यथे ॥ वलीयान् ॥ ५ ॥ प्राणेन महता पूर्णो
वलीयानिति कथ्यते ॥ यथा ॥ यश्च विंध्यगिरितोपि गरिष्ठं दैत्यपुंगवमुदग्रमरिष्टं। तूलखंडमिव पिं
डितमारात्पुंडरीकनयनो विनुनोद ॥ यथा वा ॥ वामस्तामरसाक्षस्य भुजदंडः स पातु वः। क्रीडाकंदुक
तां येन नीतो गोवर्द्धनो गिरिः ॥ वयसान्वितः ६ ॥ वयसो विविधत्वेपि सर्वत्रैक रसाश्रयः। धर्मी किशो
र एवात्र नित्यनानाविलासवान् ॥ यथा ॥ तदात्वात्तिव्यक्तीकृततरुणिमारंभरभसे स्मितश्रीनिर्धूतस्फु
रदमलराकापतिमदं। दरोदंचत्पिंछाभ्युगनवकलामेदुरमिदं मुरारेर्माधुर्यं मनसि मदिराक्षीर्मदयति
॥ विविधाद्भुतभाषावित् ॥ ७ ॥ विविधाद्भुतभाषावित्स प्रोक्तो यस्तु कोविदः। नानादेश्यासु भाषासु संस्कृ
ते प्राकृतेषु च ॥ यथा ॥ व्रजयुवतिषु शौरिः शौरसेनीं सुरेंद्रे प्रणतशिरसि सौरीं भारतीमातनोति। अहत्य
शुषु कीरेष्वप्यपभ्रंशरूपां कथमजनि विदग्धः सर्वभाषावलीषु ॥ सत्यवाक्यः ८ ॥ स्यान्नानृतं वचो य
स्य स सत्यवाक्य उदाहृतः ॥ यथा। पृथे तनयपंचकं प्रकटमर्पयिष्यामि ते रणोर्वरितमित्यभूत्तव यथा
र्थमेवोदितं। रविर्भवति शीतलः कुमुदबंधुरप्युष्णलस्तथापि न मुरांतकव्यभिचरिष्णुरुक्तिस्तव ॥

२४

गू॰ टी॰ १

यथा वा॥ छन्नोपि वेषेण महीसुरस्य दरिर्यथार्थमगाधेन्द्रसूते। संस्पृष्टमात्रां सह पाण्डवाभ्यां मां विद्धि कृष्णं
भवतः सपत्नीं॥ प्रियंवदः॥ ९॥ जनेकृतापराधेपि सान्त्ववादी प्रियंवदः॥ यथा। कृतवालीके पिनकुण्डलीन्द्र
त्वया विधेया मयि दोषदृष्टिः॥ प्रवास्यमानो सि सुरार्चितानां परं हितायाघ गवां कुलस्य॥ वावदूकः॥
१०॥ श्रुतिप्रेष्ठोक्तिरखिलवाग्गुणान्वितवागपि। इति द्विधा निगदितो वावदूको मनीषिभिः॥ तत्राद्यः॥ यथा॥ अक्लिष्टकोमलपदावलिमंजुलेन प्रत्यक्षरक्षरदमंदसुधारसेन। सख्यः समस्तजनकर्णरसायनेन
नाहारिकस्य हृदयं हरिणाभिषितेन॥ द्वितीयो यथा। प्रतिवादिचित्तपरिवृत्तिपटुर्जगदेकसंशयविमर्दकरी
प्रमिताक्षराद्यविविधार्थमयी हरिवागियं मम धिनोति धियं॥ सुपाण्डित्यः॥ ११॥ विद्वान् नीतिज्ञ इत्येष
सुपाण्डित्यो द्विधा मतः॥ विद्वानखिलविद्यावित् नीतिज्ञस्तु यथार्हकृत्॥ तत्राद्यः॥ यथा। तमेव पूर्वं परि
वर्यगौरवात्पितामहाद्यं बुधरैः प्रवर्तिताः। कृष्णार्णवं काश्यपगुरूक्ष्माभृतः समस्तविद्यासरितः प्रपेदि
रे॥ यथा वा। आम्नायप्रथिता चयास्मृतिमती वादं षडङ्गोज्ज्वला न्यायेनानुगता पुराणसुहृदा मीमांसया
मण्डिता। त्वां लब्धावसरा चिरात्कुरुकुले प्रेक्षस्व संगार्थिनी। विद्यानामवधूस्थं सुदृशा गुणा गोविन्द शुश्रूष

कलौ न

स्क १

सूक्ष्मधीः

अगकलनीत्या श्रेज्ञाभजः

रसा०

तो॥द्वितीयोयथा॥मृत्युस्तर्करमंडलेसुकृतिनांवृंदेवसंतानिलःकंदर्पोरमणीषुदुर्गतकुलेकल्याणक॥
ल्पद्रुमःइंदुर्बंधुगणेविपक्षपटलेकालाग्निरुद्राकृतिःशास्तिस्वस्तिधुरंधरोमधुपुरीनीत्यामधूनांपतिः
॥बुद्धिमान्॥१२॥मेधावीश्चितिप्रोच्यतेबुद्धिमान्द्विधा॥तत्रमेधावीयथा।अवंतिपुरवासिनःसदनमेत्य
सांदीपनेर्गुरोर्जगतिदर्शयन्समयमत्रविद्यार्थिनां।सकृन्निगदमात्रतःसकलमेवविद्याकुलंदधौ
हृदयमंदिरेकिमपिचित्रवन्माधवः॥सूक्ष्मधीर्यथा॥यदुत्तिरयमवधोम्लेच्छराजस्तदेनेतरलत
मसितस्मिन्विद्रवन्नेवनेष्यै।सुखमयनिजनिद्रानंजनध्वंसिदृष्टिर्जरमुचिमुचुकुंदःकंदरेयत्रशे

श्री०

ते॥प्रतिभान्वितः॥१३॥सद्योनवनवोल्लेखिज्ञानस्यात्प्रतिभान्वितः॥यथापद्यावल्यां॥वासःसंप्रति
केशवक्वनवतोमुग्धेक्षणेनन्विदंवासंब्रूहिशठप्रकामसुभगत्वद्गात्रसंसर्गतः।यामिन्यामुषितः
क्वधूर्त्तवितनुर्मुष्णातिकिंयामिनीशौरिर्गोपवधूंछलैःपरिहसन्नेवंविधैःपातुवः॥विदग्धः॥१४॥क
लाविलासदिग्धात्माविदग्धइतिकीर्त्यते॥यथागीतंगुंफतितांडवंघटयतिब्रूतेप्रहेलीक्रमंवेणुंवा
दयतेस्वजंविरचयत्यालेख्यमभ्यस्यति।निर्मातिस्वयमिंद्रजालपटलीद्यूतेजयत्युन्मदान्पश्यपोद्दाम

२५

लवल्गुवल्गत्लीलावलोकनिहतोमदनोपियासां। संमुह्यचापमपहाय तत्प्रमदोत्तमास्तायस्येंद्रियंविमथि
तुंकुहकैर्नशेकुः॥ स्थिरः॥२३॥ आफलोदयकृत्स्थिरः स्मृतो यथा॥ निर्वेदमापनवनभ्रमणेमुरारिर्नाचिंतय
द्व्यसनमुच्चैर्विलप्रवेशे। आहृत्य हंतमणिमेवपुरंप्रपेदे सत्यावधमकृतधियांहिफलोदयांतः॥ दांतः॥२४
।सदांतोदुःसहमपियोग्यंक्लेशंसहेतयः॥ यथा गुरुमपिगुरुवासक्लेशमत्राजनत्याहरिरजगणदं
तःकोमलांगोपिनायं। प्रकृतिरतिदुरूहाहंततल्लोकभर्तुः राणांकिमपिमनसिचित्रंचिंत्यमानातनोति। क्षमा
शीलः॥२५॥ क्षमाशीलःपराधानांसहनःपरिकीर्त्यते॥ यथामाघकाव्ये॥ प्रतिवाचमदत्तकेशवःशप
मानायनचेदिभूभृते। अनुहुंकुरुतेघनध्वनिंनहिगोमायुरुतानिकेशरी॥ यथावायामुनाचार्यस्तोत्रे॥ र
घुवरयदभूस्त्वंतादृशोवायसस्यप्रणतइतिदयालुर्यच्चचैद्यस्यकृष्ण। प्रतिभवमपराद्धुर्मुग्धसायुज्यदो
भूर्वदकिमपदमागस्तस्यतेस्तिक्षमायाः॥ गंभीरः॥२६॥ दुर्विबोधाशयोयस्तुसगंभीरइतीर्यते॥ यथा
।वृंदावनेवराभिःस्तुतिभिर्नितरामुपास्यमानोपि। शक्रोनहरिर्विधिनारुष्टस्तुष्टोथवाज्ञातुं॥ यथावा
।उन्मदोपिहरिर्न्व्यराधाप्रणयसीधुना। अभिज्ञेनापिरामेणलक्षितोयमविक्रियः॥ धृतिमान्॥२७॥

रसा०

पूर्णस्पृहश्च धृतिमान् शांतश्चक्तोऽनकारणे॥ तत्राद्योयथा। स्वीकुर्वन्नपिनितरांयशः प्रियत्वंकंसारिर्मगध
पतेर्वधप्रसिद्धां। नीमायस्वयमतुलामदत्तकीर्तिंकिंलोकोत्तरगुणशालिनामपेक्ष्यं॥ द्वितीयोयथा। निंदि
तस्यदमघोषसूनुनासंभ्रमेणमुनिभिःस्तुतस्यच। राजसूयसदसिक्षितीश्वरैः कापिनास्यविकृतिर्वितर्कि
ता॥ समः॥२८॥ रागद्वेषविमुक्तोयः समःसकथितोबुधैः॥ यथाश्रीदत्तनामे॥ न्याय्योदितदंडःकृतकिल्बिषे
स्मिंस्तवावतारः खलनिग्रहाय। रिपोःसुतानामपितुल्यदृष्टिर्धत्सेदमंफलमेवानुशंसन्॥ यथावा॥ रि
पुरपियदिशुद्धोमंडनीयस्तवासौयदुवरयदिदुष्टोदंडनीयःसुतोपि। नपुनरखिलजंतुःपक्षपातोज्झित
स्यक्वचिदपिविषमंतेचेष्टितंजाघटीति॥ वदान्यः॥२९॥ दानवीरोनवेद्यस्तुसवदान्योनिगद्यते॥ यथा॥
सर्वार्थिनांवाढमभीष्टपूर्त्याव्यर्थीकृताः कंसनिसूदनेन। क्रियेवचिंतामणिकामधेनुकल्पद्रुमाद्यारव
तीर्जगंति॥ यथावा॥ वाढंबोडशावि स्फुरंतिपरितःशालासहस्राण्यलंयान्यष्टाग्रशतोत्तराणिसुहृन्नामे
तावतीनांपुरे। गृहिणीनांप्रतिसद्मतर्णकयुजांकस्तेषुनित्यंमुदा। वद्धंवद्धमुदारमंडनमहोतांदातुंक्षमोऽन्यः
क्षितौ॥ धार्मिकः॥३०॥ कुर्वन्कारयतेधर्मंयःसधार्मिकउच्यते॥ यथा। पादैश्चतुर्भिर्नवतावृषस्यगुप्तस्य

श्री०

गोपेंद्रस्तथान्यवर्द्धिस्वैरंचरन्नेषयथात्रिलोकीमधर्मसस्यानिदधैंज्ञयास॥यथावा॥वितायमानैर्न्न
वतामखोकरैराकृष्यमाणेषुपतिष्वनारतं।मुकुंदखिन्नःसुरसुभ्रुवांगणस्तवावतारंनवमंनमस्य
ति॥शूरः॥३१॥नभ्रमाहीयुधिशूरःस्वप्रयोगेचविचक्षणः।तत्राद्योयथा॥पृथुसमरसरोविगा
ह्यकुर्वन्द्विषदरविंदवनेविहारचर्यां।स्फुरसितरलबाहुदंडशुंडस्त्वमघविदारणवारणेंद्र
लीलः॥द्वितीयोयथा।क्षणादक्षौहिणीवृंदेजरासंधस्यदारुणे।दृष्टःकोप्यत्रनादृष्टोहरेःप्रह
रणादृते॥करुणः॥३२॥परदुःखासहोयस्तुकरुणःसनिगद्यते॥यथा॥राज्ञामगाधगतिनि
र्मगधेंद्रकारादुःखांधकारपटलैःस्वयमंधितानां।अक्षीणियःसुखमयानिदृशांविधत्तानीद्धंहेतमद्ययदुनं
दनपद्मबंधुं॥यथावास्खलद्यनवारिनिर्विरचितातिषेकश्रियेत्वरामरतरंगतःक्षवलितात्मविस्फूर्तये।
निशातशरशायिनासुरसरित्सुतेनस्मृतेसपद्यवशावर्म्मनोन्नगवतःकृपायैनमः॥मान्यमानकृत्॥३३॥गु
रुब्राह्मणवृद्धादिपूजकोमान्यमानकृत्॥यथा॥आत्तिवाद्यगुरोःपादांबुजंपितरंपूर्वजमप्यथानतः॥हृ
रिंजलिनातथागिरायदुवृद्धाननमत्क्रमादयं॥दक्षिणः॥३४॥सोद्यान्यसोम्यचरितोदक्षिणःकीर्त्यतेबुधैः

।यथा॥ अविवाद्यपितृऽन्तत्यस्य पञ्चपतिगुरून पिनापराधान् सेवांमनागपिकृतांवकुथान्यपेति। आविः
करोति पिशुनेऽपि नान्यसूयां शीलेन निर्मलमतिः कमलेक्षणोयं॥ विनयी॥३५॥ औद्धत्यपरिहारी।
यः कथ्यते विनयीत्यसो॥ यथा माघकाव्ये॥ अवलोक एव नृपतेः सदूरतो रभसाद्रथादवतरीतुमिच्छ
तः अवतीर्णवान् प्रथममात्मना हरिर्विनयं विशेषयति संभ्रमेण सः॥ ह्रीमान्॥३६॥ ज्ञाते स्मररहस्ये
ऽन्यैः क्रियमाणे स्तवेथवा। शालीनत्वेन संकोचं भजन् ह्रीमानुदीर्यते॥ यथा ललितमाधवे॥ दरोदंचद्गो
पीस्तनपरिसरप्रेक्षणभवाकरोत्कंपादीषज्ज्वलति किल गोवर्द्धनगिरौ। भयात्तैरारब्धस्तुतिरखिलगोपैः
स्मितमुखं पुरोदृष्ट्वा रामं भजयति नमितास्योमधुरिपुः॥ शरणागतपालकः॥३७॥ पालयन् शरणापन्नान्
शरणागतपालकः॥ यथा॥ ज्वरपरिहरवित्रासं वनमत्र समरे कृतापराधोपि। सद्यः प्रपद्यमाने यदिंदं वृति
यादवेंद्रोयं॥ सुखी॥३८॥ भोक्ता च दुःखगंधैरप्स्पृष्टश्च सुखी भवेत्॥ तत्राद्यो यथा॥ रत्नालंकारभारस्तवध
नदमनोराज्यवृत्त्याप्यलभ्यः स्वच्छेदं भोलिपा[illegible] सौरदुरधिगमं द्वारि तौर्यत्रिकं च। पार्श्वे गौरीगरिष्ठाः प्रचुर
शशिकलाः कांतसर्वांगभाजः सीमंतिन्यश्च नित्यं यदुवर भुवने कस्त्वदन्योस्ति भोगी॥ द्वितीयो यथा॥ नल

श्री०

य

निंनम्लानिंन निजगृहकृत्यव्यसनितांन घोरंनोद्घूर्णंनिकिलकदनंवेत्ति किमपि वरांगीत्तिः सांगीकृतसुहृद
नंगानि रक्षितो हरिर्वृंदारण्ये परमनिशामुच्चैर्विहरति॥ भक्तसुहृत्॥३९॥ सुसेव्यो दासवंधुश्च द्विधा भक्तसुहृन्म
तः॥ तत्राद्यः यथा। गौतमीयतंत्रे॥ तुलसीदलमात्रेण जलस्य चुलकेन च॥ विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तव
त्सलः॥ द्वितीयो यथा। प्रथमे॥ स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः॥ धृतरथचर
णोभ्ययाच्चलद्गुर्हरिरिव हंतुमिभं गतोत्तरीयः॥ प्रेमवश्यः॥४०॥ प्रियत्वमात्रवश्यो यः प्रेमवश्यो भवेद
सौ। यथा दशमे। सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः। प्रीतो व्यमुंचदब्बिंदून्नेत्राभ्यां पुष्करेक्षणः॥ यथा
वा तत्रैव॥ स्वमातुः स्विन्नगात्राया विस्रस्तकवरस्रजः। दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने॥ सर्वशुभंक
रः॥४१॥ सर्वेषां हितकारी यः स स्यात्सर्वशुभंकरः॥ यथा। कृताः कृतार्था मुनयो विनोदैः खलक्षयेणाखिल
धार्मिकाश्च। वपुर्विमर्दनखलाश्च युद्धेन कस्य पथ्यं हरिणा व्यधायि॥ प्रतापी॥४२॥ प्रतापी पौरुषोद्भूतशा
त्रुतापि प्रसिद्धिमान्॥ यथा। भवतः प्रतापतपनेनुवनं कृष्ण प्रतापयति। घोरासुरघूकानां शरणमनूकं
दरातिमिरं॥ कीर्तिमान्॥४३॥ यशोभिर्निर्मलैर्युक्तः कीर्तिमानिति कीर्त्यते॥ यथा। त्वद्यशः कुमुदवंधुकौमु

भा १ नो १ त्का २

श्रीरसा०

दीप्तुन्नत्यैवमन्तिनानयंत्यपि नंदनंदनकथं नु निर्ममे रूपमावकलितं जगत्त्रयं ॥ यथा वा ललितमाधवे ॥ नीतारूढैत्यजति गिरिजा इपामम प्रेक्ष्यकंठं भुग्नं दृष्ट्वा क्षिपति वसनं विस्मिता नीलवासाः ॥ क्षीरं मत्वा स्रवपयति यमी नीरमात्नी रिकोक्तां गीते दामोदरयशसि ते वीणया नारदेन ॥ रक्तलोकः ॥ ४४ ॥ पात्रं लोकानुरागाणां रक्तलोकं विदुर्बुधाः ॥ यथा प्रथमे ॥ यर्ह्यम्बुजाक्षापससार भो भवान् कुरून्मधून् वाथ सुहृद्दिदृक्षया । तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाच्युत ॥ यथा वा ॥ श्रात्रीस्तथा जय जय जयेत्यादि रास्ते मुनीनां देवश्रेणीस्तुतिकलकलो मेदुरः प्रादुरस्ति । हर्षाद्घोषः स्फुरति परितो नागरीणां गरीयान् केवा रंगस्थलमनुविदूरौ नेजिरे नानुरागं ॥ साधुसमाश्रयः ॥ ४५ ॥ सदैकपक्षपातीयः स स्यात्साधुसमाश्रयः ॥ यथा । पुरुषोत्तम चेद्वावतरिष्यस्त्वं भुवने स्मिन्न भवान् भुवः शिवाय । विकटासुरमंडलान्न जाने सुजनानां वतकादशा न विष्यत् ॥ नारीगणमनोहारी ॥ ४६ ॥ नारीगणमनोहारी सुंदरीवृंदमोहनः ॥ यथा दशमे ॥ श्रुतमात्रोपि यः स्त्रीणां प्रसह्याकर्षते मनः उरुगायोरुगीतो वा पश्यंतीनां कुतः पुनः ॥ यथा वा ॥ त्वं चुंबको सि माधव लोहमयी नूनमंगनाजातिः धावति ततस्ततो सौ यतो यतः क्रीडया भ्रमसि । सर्वारा

श्री०

२९

घ्यः॥४७॥ सर्वेषामग्रपूज्यो यः स सर्वाराध्य उच्यते॥ यथा प्रथमे॥ मुनिवरनृपवर्यसंकुलेऽन्तः सदसि युधिष्ठि
रराजसूय एषां। अर्हणमुपपेद ईक्षणीयो मम दृशि गोचर एष आविरात्मा॥ समृद्धिमान्॥४८॥ महासंपत्तिसमु
ह्रो योऽत्र वेदेत्स समृद्धिमान्॥ यथा। षट्पंचाशद्यदुकुलभुवां कोटयस्त्वां भजंते वर्षंत्यष्टौ किमपि निधयः र
श्चार्थजातं तवामी। शुद्धांतश्चा स्फुरति नवभिर्लक्षितः सौधलक्षैर्लक्ष्मीपद्मपनूसुरदमन तेनात्र चित्रायते
कः॥ यथा वा विल्वमंगले॥ चिंतामणिश्चरणभूषणमंगनानां शृंगारपुष्पतरवस्तरवः सुराणां। वृंदाव
नव्रजधनं ननु कामधेनुवृंदानि चेति सुखसिंधुरहो विभूतिः॥ वरीयान्॥४९॥ सर्वेषामतिमुख्यो यः स व
रीयानितीर्यते॥ यथा। ब्रह्मन्नत्र पुरद्विषा सह पुरः पीठे निषीद क्षणं तूष्णीं तिष्ठ सुरेंद्र चाटुभिरलं वारी
शदूरीभव। एते द्वारि कथं मुकुंद सुरगणाः कुर्वंति कोलाहलं संतद्वारवतीपतेरवसरो नाद्यापि निष्पद्यते।
॥ ईश्वरः॥५०॥ द्विधेश्वरः स्वतंत्रश्च दुर्लंघ्याज्ञश्च कीर्त्यते॥ तत्र स्वतंत्रो यथा॥ कृष्ण प्रसादमकरोदपराध
तेऽपि पादांकमेव किल कालियपन्नगाय। न ब्रह्मणे द्दशामपि स्तुवते प्यपूर्वस्थाने स्वतंत्रचरितो निगमैर्नु
तोयं॥ दुर्लंघ्याज्ञो यथा॥ तृतीये। स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः। बलिं

त्र ५

रसा०

दराङ्घिश्चिरलोकपालैः किरीटकोटीडितपादपीठः। यथा वा॥ नवो व्रह्मांडवृंदेस्त जगति विधिगानः स्रष्टयेयः कृताज्ञो रुद्रौघः कालदीर्णिक्षयमवतनुते यः क्षयायानुशिष्टः। रक्षां विष्णुस्वरूपाविदधति तरुणाः रक्षिणाये त्वदंशाः कंसारे संतिसर्वे दिशि दिशि नवतः शासने दांडनाथाः॥ ॥अथसदास्वरूपसंप्राप्तः॥५२ ॥सदास्वरूपसंप्राप्तोमायाकार्यवशीकृतः॥ यथाप्रथमे॥ एतदीशनमीशस्यप्रकृतिस्थोपितद्गुणैः न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया॥ सर्वज्ञः॥५३॥ परचित्तस्थितं देशकालाद्यंतरितं तथा। यो जानाति समस्तार्थं स सर्वज्ञो निगद्यते॥ यथा प्रथमे॥ योनो युगोपवन एत्य दुरंतकृच्छ्राद्दुर्वाससो रिरावितादयुताग्रभुग्यः। शाकान्नशिष्टमुपयुज्य यतस्त्रिलोकीं तृष्णार्दमममंस्त सलिले विनिमग्नसंघः॥ नित्यनूतनः॥५४॥ सदानुभूयमानोपि करोत्यननुभूतवत्। विस्मयं माधुरी निर्यः स प्रोक्तो नित्यनूतनः॥ यथा प्रथमे॥ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्याङ्घ्रियुगं नवं नवं। पदे पदे का विरमेत तत्पदाच्चलापियं श्रीर्न जहाति कर्हिचित्॥ यथा वाललितमाधवे॥ कुलवरतनुधर्मग्रावृंदानि भिंदन्सुमुखि निशितदीर्घापांगटंकच्छटाभिः। युगपदयमपूर्वः कः पुरो विश्वकर्मा मरकतमणिलक्षैर्गोष्ठकक्षां

३०

त ५४

चिनोति॥ सच्चिदानंदसांद्रांगः॥ ५४॥ सच्चिदानंदसांद्रांगश्चिदानंदघनाकृतिः॥ यथा। लोकेशक्रमात्वं
चविधेक्षयंगते यद्ब्रह्मसौख्यं स्वरसं स्फुरत्परं। तद्धा धर्थयन्भूकः पुरतो नराकृतिः श्यामो यमामोद
नरः प्रकाशते॥ यथा वा ब्रह्मसंहितायामादिपुरुषरहस्ये॥ यस्य प्रभा प्रभवतो जगदंडकोटिको
टिष्वशेषवसुधादिविभूतिभिन्नं। तद्ब्रह्म निष्कलमनंतमशेषभूतं गोविंदमादिपुरुषं तमहं भ
जामि॥ अतः श्रीवैष्णवैः सर्वश्रुतिस्मृतिनिदर्शनैः। तद्ब्रह्म श्रीभगवतो विभूतिरिति कीर्त्यते॥ त
थाहि। यामुनाचार्यस्तोत्रे। यदंडमंडांतरगोचरं च यद्दशोत्तराण्यावरणानि यानि च। गुणाः प्रधा
नं पुरुषः परं पदं परात्परं ब्रह्म च ते विभूतयः॥ सर्वसिद्धिनिषेवितः॥ ५५॥ स्ववशाखिलसिद्धिभ्यः।
सर्वसिद्धिनिषेवितः॥ यथा। दशाभिः सिद्धिसखीभिर्वृता महासिद्धयः क्रमादष्टौ। अणिमादयो लभंते
नावसरं द्वारि कृष्णस्य॥ अथाविचिंत्यमहाशक्तिः॥ ५६॥ दिव्यसर्गादिकर्तृत्वं ब्रह्मरुद्रादिमोहनी। भक्त
प्रारब्धविध्वंस इत्याद्याः चिंत्यशक्तिता॥ तत्र दिव्यसर्गादिकर्तृत्वं॥ यथा॥ आसीच्छायाद्वितीयः प्रथ
ममथ विभुर्वत्सडिंभायितोभूद्देभिः सार्द्धं स्वरूपैस्तदनु पृथु चतुर्बाहुतामाससाद। हन्त स्तवादि

भावो भिमिश्रलः

वीतैरथकमलनवैः स्तूयमानाखिलात्मा। तावद्ब्रह्मांडसेवाः स्फुटमङ्गानिततोयः प्रपद्येतमीशं॥ ब्र
ह्मरुद्रादिमोहनं॥ यथा॥ मोहितः शिशुवृंदैः।। पितामहोहंतं शंभुरपिज्ञं जितोरणे। येनकंसरिपु
णाद्यतत्पुरः केमहेंद्रविबुधाभवद्धिया॥ नत्कप्रारब्धविध्वंसोयथा॥ दशमे॥ गुरुपुत्रमिहाजीतं
निजकर्मनिबंधनं। आनयस्वमहाराजमच्छासनपुरस्कृतः॥ आर्द्धिशाद्येनदुर्घरघटनाच॥ यथा
। अपिजनिपरिहीणः सूनुरानीस्तत्तुर्विभुरपिनुडयगमोसंग। यद्यमूर्त्तः प्रकटितवक्रूरूपो
पोकरूपः प्रभुर्मेध्येयमयमविचिंत्यानंतशक्तिर्धिनोति॥ कोटिब्रह्मांडविग्रहः॥ ५७॥ अगण्य
जगदंडाद्यः कोटिब्रह्मांडविग्रहः॥ इतिश्रीविग्रहस्यास्यविभुत्वमनुकीर्त्तितं॥ यथातत्रैव। कार्ह
तमोमहददहंखचराग्निवार्नूसंवेष्टितांडघटसप्तवितस्तिकायः। क्वेदृग्विधाविगणितांडपराणु
चर्यावाताध्वरोमविवरस्यचतेमहित्वं॥ यथावा॥ तत्त्वैर्ब्रह्मांडमाद्यं सुरकुलभुवनैश्चांकितंयोज
नानांपंचाशत्कोद्यस्वर्वक्षितिखचितमिदंयत्रपातालपूर्णं। तादृग्ब्रह्मांडलक्षायुतपरिचयत्रा
गैककक्षंविधात्रादृष्टंयस्यात्रवृंदावनमपिनवतः कस्तुनीतस्यशक्तः॥ अवातारावलीवीजं॥ ५८॥

=घ

अवतारावलीवीजमवतारी निगद्यते यथा श्रीगीतगोविंदे ॥ वेदानुद्धरते जगंति वहते भूगोलमु-
द्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते । पौलस्त्यं जयते हलं कलयते कारुण्यमात-
न्वते म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ हतारिगतिदायकः ॥ ५९ ॥ मुक्तिदाता हतारी-
णां हतारिगतिदायकः ॥ यथा ॥ परां ज्वयं फेनिलवक्रतां च वर्धं च नीतिं च मृतिं च कृत्वा । पवर्गदाता पि
शिखंडमौले त्वं शात्रवाणामपवर्गदोसि ॥ यथा वा ॥ चित्रं मुरारे सुरवैरिपक्षस्त्वया समंतादनुबद्धयु-
द्धः ॥ अमित्रभावादविनिघ्नमेदाः मित्रस्य कुर्वन्नमृतं प्रयाति ॥ आत्मारामगणाकर्षी ॥ ६० ॥ आत्माराम-
गणाकर्षीत्येतद्व्यक्तार्थमेव यः यथा ॥ पूर्णपरमहंसं मां माधवलीलामहौषधिर्घ्राता । कृत्वा वतसारंगं
वाधितकथं सारसेत्यपितं श्री यासाधारणवतुष्के लीला यथा ॥ ६१ ॥ बृहद्वामने ॥ संति यद्यपि मे प्राज्या ली-
लास्तास्ता मनोहराः ॥ न हि जाने स्मृते रासे मनो मे कीदृशं भवेत् ॥ यथा वा ॥ परिस्फुरतु सुंदरं चरितमत्र
लक्ष्मीपतेस्तथा भुवननंदिनस्तदवतारवृंदस्य वा ॥ हरेरपि चमत्कृतिप्रकरवर्द्धनः किंतु मे विभर्ति हृदि
विस्मयं कमपि रासलीलारसः ॥ प्रेमणा प्रियाधिक्यं ॥ ६२ ॥ यथा दशमे ॥ अटति यद्भवानह्नि काननं त्रुटि

…श्रीरसा०

युगायतेत्वामपश्यतां। कुटिलकुंतलंश्रीमुखंचतेजडउदीक्षतांपक्ष्मकृद्दृशां॥ यथावा। ब्रह्मरात्रतता
रण्यघशात्रोसाक्षणार्द्धवद्गात्तवसंगो। शाक्षणार्द्धमपिवल्लविकानांब्रह्मरात्रततिवद्विरहेभूत्॥
वेणुमाधुर्यं॥६३॥ यथा तत्रैव॥ सवनशस्तदुपधार्यसुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः कवय
आनतकंधरचित्ताः कश्मलंययुरनिश्चिततत्वाः॥ यथावाविदग्धमाधवे॥ रुंधन्नंबुभृतश्चमत्कृ
तिपरंकुर्वन्मुहुस्तुंबुरुंध्यानादंतरयन्सनंदनमुखान्विस्मेरयन्वेधसं। औत्सुक्यावलिभिर्बलिंचटु

श्री०

लयन्भोगीन्द्रमाघूर्णयन्भिंदन्नंडकटाहभित्तिमभितोबभ्रामवंशीध्वनिः॥ रूपमाधुर्यं॥६४॥
यथातृतीये। यन्मर्त्यलीलौपयिकंस्वयोगमायाबलंदर्शयतागृहीतं। विस्मापनंस्वस्यचसौभगर्द्धेः
परंपदंभूषणभूषणांगं॥ श्रीदशमेचयथा॥ कास्त्र्यंगतेकलपदामृतवेणुगीतिसंमोहितार्यचरि
तान्नचलेत्त्रिलोक्यां। त्रैलोक्यसौभगमिदंचनिरीक्ष्यरूपंयद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्
। यथावाललितमाधवे॥ अपरिकलितपूर्वः कश्चमत्कारकारीस्फुरतिममगरीयानेषमाधुर्यपू
रः। अयमहमपिहंतप्रेक्ष्ययंलुब्धचेताः सरभसमुपभोक्तुंकामयेराधिकेव॥ ॥समस्तविविधाश्च

३२

र्यकल्याणगुणवारिधेः। गुणानामिह कृष्णस्य दिङ्मात्रमुपदर्शितं॥ तथा च श्रीदशमे। गुणात्मनस्तेपि
गुणान्विमातुं हितावतीर्णस्य क ईशिरे स्य। कालेन यैर्वा विमिताः सुकल्पैर्भूपांशवः खे मिहिका द्यु
भासः॥ नित्यगुणो वनमाली यदपि शिखामणिरशेषनेतॄणां। भक्तापेक्षिकमस्य त्रिविधत्वं लिख्यते त
दपि॥ हरिः पूर्णतमः पूर्णतरः पूर्ण इति त्रिधा। श्रेष्ठमध्यादिभिः शब्दैर्नाट्ये यः परिपठ्यते। प्रकाशिताखि
लगुणः स्मृतः पूर्णतमो बुधैः॥ असर्वव्यंजकः पूर्णतरः पूर्णोल्पदर्शकः। कृष्णस्य पूर्णतमता व्यक्ताभूद्गो
कुलांतरे। पूर्णता पूर्णतरता द्वारिकामथुरादिषु॥ स पुनश्चतुर्विधः स्याद्धीरोदात्तश्च धीरललितश्च। धीरप्र
शांतनामा तथैव धीरोद्धतः कथितः॥ बहुविधगुणक्रियाणामास्पदभूतस्य पद्मनाभस्य। तत्तल्लीला
भेदाद्विरुध्यते न हि चतुर्विधता॥ तत्र धीरोदात्तः॥ गंभीरो विनयी क्षंता करुणः सुदृढव्रतः। अकत्थनो
गूढगर्वो धीरोदात्तः सुसत्वभृत्॥ यथा॥ वीरंमन्यमदप्रहारिहसितं धौरेयमार्त्तोद्धृतौ निर्व्यूढव्रतमुन्न
तक्षितिधरोद्धारेण धीराकृतिं। मय्युद्भट्टकृतकिल्बिषेपि मधुरं स्तुत्यामुदूर्यं व्रितं प्रेक्ष्य त्वां मम दुर्वि
तर्कहृदयं धीर्गीश्च न स्पंदते॥ गंभीरत्वादिसामान्यगुणा यदिह कीर्तिताः। तदेतेषु तदाधिक्यप्रति

श्रीरसा०

पादनदे तवेइदं हि धीरोदात्तत्वं पूर्वैः प्रोक्तं रघूद्वहे। तत्तल्लक्ष्यानुसारेण तथात्रापि विलोक्यते॥ अथ धी-
रललितः॥ विदग्धो नवतारुण्यः परिहासविशारदः। निश्चिंतो धीरललितः स्यात्प्रायः प्रेयसीव-
शः॥ यथा। वाचा सूचितशार्वरीरतिकलाप्रागल्भ्यया राधिकां व्रीडाकुंचितलोचनां विरचयन्नग्रे स-
खीनामसौ। तद्वक्षोरुहचित्रकेलिमकरीपांडित्यपारंगतः कैशोरं सफलीकरोति कलयन्कुंजे वि-
हारं हरिः॥ गोविंदे प्रकटं धीरललितत्वं प्रदृश्यते। उदाहरंति नाट्यज्ञाः प्रायोत्र मकरध्वजं॥ अथ
धीरशांतः॥ शमप्रकृतिकः क्लेशसहनश्च विवेचकः। विनयादिगुणोपेतो धीरशांत उदीर्यते॥

श्री०

यथा। विनयमधुरमूर्तिर्मंथरस्निग्धतारो वचनपटिमभंगीसूचिताशेषनीतिः। अनिदधदि-
धर्मं धर्मराजोपकंठे द्विजपतिरिव साक्षात्प्रेक्ष्यते कंसवैरी॥ युधिष्ठिरादिको धीरैर्धीरशांतः प्रकी-
र्तितः॥ अथ धीरोद्धतः॥ मात्सर्यवानहंकारी मायावी रोषणश्चलः। विकत्थनश्च विद्वद्भिर्धीरोद्धत
उदाहृतः॥ यथा। आः पापिन्यवनेंद्र दर्दुर पुनर्व्याघुट्य सद्यस्त्वया वासः कुत्रचिदंधकूपकुहरे क्रो-
डे विधीयतां। हेलोन्मानितदृष्टिमात्रमूर्छितब्रह्मांडभांडः पुरो जागर्ति त्रिविक्रमग्रहाय जुङ्गमः कृ

३३

स्तोत्रकृत्स्वान्निधः॥ क्षीरोद्धृतस्तुविद्ध श्रीभीमसेनादिरूच्यते। मात्सर्याद्याः प्रतीयंते दोषत्वेन यदप्यमी
॥लीलाविशेषशालित्वान्निर्दोषैव गुणाः स्मृताः॥ यथावा॥ अंभोनारनमन्नवीनजलदभ्रांतिं वित
न्वन्नसौ घोराडंवरडंवरः सुविकलमुद्भिपादस्तार्गलो। दुर्वारः परवारणः स्वयमहंलज्जोस्मिकृ
स्नः पुरोरे श्रीदामकुरंगसंगरलकोनंगंत्वमंगीकुरु॥ मिथोविरोधिनोप्यत्र केचिन्निगदितागुणाः
।हरौ निरंकुशैश्वर्यात्कोपिन स्यादसंभवः॥ तथाचकौर्मे॥ अस्थूलःस्थूलाश्चानणुश्चैव स्थूलोणुश्चैव
सर्वतः। अवर्णः सर्वतः प्रोक्तः श्यामो रक्तांतलोचनः॥ ऐश्वर्ययोगाद्भगवान्विरुद्धार्थोभिधीयते
।तथापि दोषाः परमे नैवाहार्याः कथंचन। गुणाविरुद्धा अप्येते समाहार्याः समंततः। महावाराहे
॥सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः। हानोपादानरहिता नैव प्रकृतिजाः क्वचित्॥ पर
मानंदसंदोहा ज्ञानमात्राश्च सर्वतः। सर्वे सर्वगुणैः पूर्णाः सर्वदोषविवर्जिताः॥ वैष्णवतंत्रे॥ अष्टा
दशमहादोषैरहिता भगवत्तनुः। सर्वैश्वर्यमयी सत्यविज्ञानानंदरूपिणी॥ अष्टादशदोषा वि
ष्णुयामले॥ मोह२स्तंद्रा३भ्रमो३रूक्षरसता४काममुल्वणः५।लोलता६मद७मात्सर्ये८हिंसा९

श्रीरसा०

श्राश्री १

खेदः १० परिश्रमो ११ असत्यं १२ क्रोध १३ कांक्षा १४ आशंका १५ विश्वविभ्रमः १६ । विषमत्वं १७ परापे
क्षा १८ दोषा अष्टादशोदिता इति ॥ इत्थं सर्वावतारेभ्यस्ततोप्यत्रावतारिणः । व्रजेंद्रनंदने सुष्टु मा
धुर्यं नर ईरितः ॥ तथा च ब्रह्मसंहितायामादिपुरुषरहस्ये ॥ यस्यैकनिश्वसितकालमथावलं
ब्य जीवंति रोमबिलजा जगदंडनाथाः । विष्णुर्महान्पि स यस्य कलाविशेषो गोविंदमादिपुरु
षं तमहं भजामि ॥ अथाष्टाव नुकीर्त्यंते सद्गुणत्वेन विश्रुताः । मंगलालीक्रियारूपाः सत्वभेदा
स्तु पौरुषाः ॥ शोभा विलासो माधुर्यं मांगल्यं स्थैर्यं तेजसी । ललितौदार्यमित्येते सत्वभेदास्तु
पौरुषाः ॥ तत्र शोभा ॥ नीचे दया ऽधिके स्पर्द्धा शौर्योत्साहौ च दक्षता । सत्यं च व्यक्तिमायाति य

श्री०

त्र शोभेति तं विदुः ॥ यथा । स्वर्गध्वंसं विधित्सुर्व्रजजनुविकदनं दुष्टु वीक्ष्याति दृष्ट्वा नीचानालो
चयपश्चान्नमुचिरिपुमुखानूढकारुण्यवीचिः । अप्रेक्ष्य स्वेन तुल्यं किमपि निजरूषामत्र पर्याप्ति
पात्रं वं धून्वानं दयिष्यन्नुदहरत हरिः सत्यसंधो महाद्रिं ॥ अथ विलासः ॥ वृषभस्येव गंभीरा ग
तिर्धीरं च वीक्ष णं । सस्मितं च वचो यत्र स विलास इतीर्यते ॥ यथा । मल्लश्रेण्यामविनयवतीमं

थरांन्यस्य दृष्टिं व्याधुन्वानोद्विपइव मुवंविक्रमाडंवरेण। वागारंभेस्मितपरिमलैः क्षालयन्मंच
कक्षांतुंगेरंगस्थलपरिसरेसार सा क्ष्मसार॥ माधुर्यं॥ तन्माधुर्यंन्निवेद्यत्रचेष्टादेः स्पृहणीय
ता। यथा॥ वरामध्यासीनस्तट भुवमवष्टंन्नरुचित्तिः कदंवैर्प्रालंवं प्रवलमविलंवंविरचयन्।
प्रपन्नायामग्रेमिहिरदुहितुस्तीर्यपदवींकुरंगीनेत्रायांमधुरिपुरपांगंविकिरति॥ मांगल्यं॥ मां
गल्यंजगतामेवविश्वासास्पदता मता॥ यथा॥ अन्यायंनहरावितिव्यपगतद्वारार्गलादानवारक्षी
क्ष्मइतिप्रमत्तमतिनः श्री उसुरक्ताः सुराः॥ साक्षीवेत्तिसभक्तिमित्यवनतव्रातान्नचिंतोज्झिताः
केविश्वंनरनत्वदंघ्रियुगलेविस्रंभितांतेजिरे॥ स्थैर्यं॥ व्यवसायादचलनंस्थैर्यंविघ्नाकुलादपि॥
यथा। प्रतिकूलेपिसभ्रूले शिवेशिवायांनिरंकुशकायांच। व्यालुनादेवमुकुंदोविंध्यावलिनंदनस्य
भुजान्॥ तेजः॥ सर्वविज्ञावगाहित्वं तेजःसद्भिरुदीर्यते। यथा श्रीदशमे॥ मल्लानामशनिर्नृणां
नरवरः स्त्रीणांस्मरोमूर्तिमान् गोपानांस्वजनोऽसतांक्षितिभुजांशास्तास्वपित्रोः शिशुः॥ मृत्युर्भो
जपतेर्विराडविदुषांतत्वंपरंयोगिनांवृष्णीनांपरदेवतेतिविदितोरंगंगतः साग्रजः॥ यद्वा।

रसा॰

तेजोवृद्धैरवज्ञादेरसहिष्णुत्वमुच्यते॥यथा।आकृष्टेप्रकटंद्विदंडइगुणेचंडेनरंगस्थलेनंदेचानकदुंदुभौ
चपुरतःकंसेनविश्वद्रुहा।दृष्टिंदानववर्यमुक्तिरमणीसंपर्कदूतींक्षिपन्मंचस्योपरिसंजुकूर्दिगुरसौप॥
रुपाच्युतःप्रांचति॥ललितं॥शृंगारप्रचुराचेष्टायत्रतल्ललितंविदुः॥यथा।विध्यन्नेराधायाःकुचमुकुलयोः
केलिमकरीकरेणाव्यग्रात्मासरजसमसव्येनरसिकः।अरिष्टेसाटोपंकटुरुवतिसव्येनविहसन्नुदंचत्ओमां
चंरचयतिचकृष्णःपरिकरं॥औदार्यं॥आत्माद्यर्पणकारित्वमौदार्यमितिकीर्त्यते॥यथा।वदान्यःकोनवे
दत्रवदान्यःपुरुषोत्तमात्।अकिंचनाययेनात्मानिर्गुणायापिदीयते॥सामान्यानायकगुणाःस्थिरता

श्री॰

द्यायदप्यमी।तथापिपूर्वतःकिंचिद्विशेषात्पुनरीरिताः॥अथास्यसहायाः॥अस्यगर्गादयोधर्मेयुयुधा
नादयोयुधि।उद्धवाद्यास्तथामंत्रेसहायाःपरिकीर्त्तिताः॥अथकृष्णभक्ताः॥तद्भावभावितस्वांताःकृष्ण
भक्ताइतीरिताः।येसत्यवाक्यइत्याद्याःह्रीमानित्यंतिमागुणाः॥२९।प्रोक्ताःकृष्णेस्यभक्तेषुतेविज्ञेयामनी
षिभिः।तेसाधकाश्चसिद्धाश्चद्विविधाःपरिकीर्त्तिताः॥तत्रसाधकाः॥उत्पन्नरतयःसम्यग्नैर्विघ्न्यमनु
पागताः।कृष्णसाक्षात्कृतौयोग्याःसाधकाइतिकीर्त्तिताः॥यथैकादशे॥ईश्वरेतदधीनेषुबालिशेषुद्वि

३५

रत्नेदृशौ। त्रिजगन्मोहनं गीतमित्यादिरिह माधुरी॥ यथा। अनंगनयचातुरीपरिचयोत्तरंगेदृशौ मुखां-
बुजमुदंचितस्मितविलासरम्याधरं। अचंचलकुलांगनाव्रतविडंबिसंगीतकं हरेस्तरुणिमांकुरे स्फुर-
ति माधुरी काप्यभूत्॥ वैदग्धीसारविस्तारः कुंजकेलिमहोत्सवः। आरंभो रासलीलादेरिह चेष्टादिसौ-
ष्टवं॥ यथा। व्यक्तालक्तपदैः क्वचित्परिलुठत्पिंछावतंसैः क्वचित्तल्पैर्विच्युतकांचिभिः क्वचिदसौ-
व्याकीर्णकुंडोत्करा। प्रोद्यन्मंडलबंधतांडवघटालक्ष्मोल्लसत्सैकता गोविंदस्य विलासवृंदमधिकं वृंदा-
टवी शंसति॥ तन्मोहनता यथा। विदूरान्मारारिं हृदयरविकांतिं प्रकटयन्नुदस्यं धर्मेंदुं विदधदनितोरा-
गपटलं। कथं स्थानस्थाणं सखि मुकुलयन् बोधकुमुदं तरस्वी कृष्णप्रेममधुरिमनराकोऽभ्युदयते॥ अ-
थशैशवं कैशोरं॥ पूर्वतोप्यधिकोत्कर्षवाढमंगानि विभ्रति। त्रिवलिव्यक्तिरित्याद्यं कैशोरे चरमे सति॥
यथा। मरकतगिरेर्गंडग्रावप्रभाहरवक्षसं शातमखमणिस्तंभारंभप्रमाथिभुजद्वयं। तनुतरणिजा-
वीचिच्छायाविडंबिवलित्रयं मदनकदलीसाधिष्ठोरुं स्मराम्यसुरांतकं॥ तन्माधुर्यं यथा। दशार्द्धशरमा-
धुरीदमनदक्षयां गभ्रियाविधूनितवधूधृतिं वरकलाविलासास्पदं। दृगंचलचमत्कृतिक्षपितख-

न ९

तुं २

रसा०

जरीरद्युतिंस्फुरत्तरुणिमोद्गमंतरुणिप्रस्रपपीतांवरं॥इदमेवहरेःप्राज्ञैःर्नवयौवनमुच्यते।अत्रगोकु
लदेवीनांनावसर्वस्वशालिता॥अनूपूर्वकंदर्पतंत्रलीलोत्सवादयः॥यथा।कांतानिःकलहायतेक्व
चिदयंकंदर्पलेखान्क्वचित्कीरैरर्पयतिक्वचिद्वितनुतेक्रीडाभिसारोद्यमं।सख्यानंदयतिक्वचित्स्म
रकलाषाड्गुण्यवानीहतेसंधिंक्वाप्यनुशास्तिकुंजनृपतिःशृंगारराज्योत्तमं॥तन्मोहनतायथा॥कणकि
णिसखीजनेनविजनेदूतीस्तुतिप्रक्रियापत्युर्वंचनचातुरीगुणनिकाकुंजप्रयाणेनिशि॥वाधिर्यंगुरु
वाचिवेणुविरुतावुत्कर्णतेतिव्रजात्केशोरेणतनाद्यकृष्णगुरुणागोरीततिःपाठिता॥नेतुःस्वरूपमे
वोक्तंकैशोरमिहयद्यपि।नानाकृतिप्रकटनात्तथाप्युद्दीपनंमतं।वाल्येपिनवदीतारुण्यप्राकट्यं
श्रूयतेक्वचित्।तन्नातिरसवाहित्वान्नरसज्ञैरुदाहृतं॥अथसौंदर्यं॥भवेत्सौंदर्यमंगानांसंनिवे
शोयथोचितं॥यथा॥मुखंतेदीर्घाक्षंमरकततटीपीवरमुरोभुजद्वंद्वंस्तंभद्युतिसुवलितंपार्श्वयुग
लं।परिक्षीणोमध्यःप्रथिमलहरीहारिजघनंनकस्याःकंसारेहरतिहृदयंपंकजदृशः॥अथ
रूपं॥विभूषणंविभूषांस्याद्येनतद्रूपमुच्यते॥यथा॥कृष्णस्यमंडनततिर्मणिकुंडलाद्यानीतांग

श्री०

संगतिमलंकृतयेवरागिासिक्तावनूतनमनागपितद्विधाने साप्रत्युतस्वयमनल्पमलंकृतासीत्॥ अ
थमृदुता॥ मृदुताकोमलस्यापिसंस्पर्शासहतोच्यते॥ यथा॥ अदृष्टनवांबुदकांतेरमुष्यसुकुमारता।
कुमारस्य। अपिनवपल्लवसंगादंगान्यपरज्यशीर्यंति। येनायकप्रकरणेवाचिकामानसास्तथा। गुणाः प्रो
क्तास्तएवात्रज्ञेयाउद्दीपनावुधैः॥ अथचेष्टाः॥ चेष्टारासादिलीलाःस्युस्तथादुष्टवधादयः॥ तत्ररा
सोयथा॥ नृत्यज्ञोपनितंविनीकृतपरीरंभस्यरंभादिभिर्गीर्वाणीभिरनंगरंगविवशंसंदृश्यमानश्रियः
।क्रीडताण्डवपण्डितस्यपुरतःश्रीपुंडरीकाक्षतेरासारंभरसार्थिनोमधुरिमाचेतांसिनःकर्षति॥ दुष्ट
वधोयथा॥ ललितमाधवे॥ शांनुर्वृषंनयतिमंदरकंदरांतर्म्लानिःसलीलमपियत्रशिरोधुनाने॥ आः
कौतुकंकलयकेलिलवाद्रिष्टंतंदुष्टपुंगवमसौहरिरुन्ममाथ॥ अथप्रसाधनं॥ कथितंवसनाकल्प
मंडनाद्यंप्रसाधनं॥ तत्रवसनं॥ नवार्करश्मिकाश्मीरहरितालादिसन्निभं। युगंचतुष्कंभूयिष्टंवसनं
त्रिविधंहरेः॥ तत्रयुगं॥ परिधानंससंव्यानंयुगरूपमुदीरितं॥ यथामुकुंदाष्टके॥ कनकनिवहशो
भानिंदिपीतंनितंबेतदुपरिनवरक्तंवस्त्रमित्थंदधानः॥ प्रियमिवकिलवर्णंरागयुक्तंप्रियायाः।

श्रीरसा०

प्रीणयतु मम नेत्रान्नीषृपूर्त्तिर्मुकुंदः॥ चतुष्कं॥ चतुष्कं कंचुकोष्णीषतुंदवंधांतरीयकं॥ यथा॥ स्मेरा-
स्य:परिहितरोहितांवरश्रीश्छन्नांगःपुरटरुचोरुकुंचुकेन॥ उष्णीषं दधदरुणं घटीव विभ्रत्कंसारि-
र्वहति मदोत्सवे मुदं नः॥ नूयिष्टं॥ खंडिता खंडितं नूरि नट्वे नक्रियो चितं॥ अनेकवर्णवसनं नू-
यिष्टं कथितं वुधैः॥ यथा॥ अखंडितविखंडितैःसितपिशंगनीलारुणैःपटैः कृतयोथोचित-
प्रकटसंनिवेशोज्ज्वलः॥ अयं कलितनर्त्तनराडिव प्रचुररंगशृंगारितः करोतिकरनोस मेघनरुचि-
र्मुदं माधवः॥ अथाकल्पः॥ केशवंधनमालेपो माला चित्रं विशेषकः॥ तांवूलकेलिपद्मादि-
राकल्पः परिकीर्त्तितः॥ धम्मिल्लः कवरी चूडा वेणी व कचवंधनी॥ पांडुरः कर्वुरः पीत इत्यालेप-
स्त्रिधामतः॥ माला त्रिधा वैजयंती रत्नमालाप्य नस्रजः॥ आस्यावेकक्षकापीडप्रालंव लंव्यादिदा
मताः॥ मकरीपत्रभंगाद्यं चित्रं पीतसितारुणं॥ तथा विशेषकोपि स्यादन्यदूद्यं स्वयं वुधैः॥ य-
था॥ तांवूलस्फुरदाननेंदुरमलं धम्मिल्लमुल्लासयन्भक्तिच्छेदलसत्सुघृष्टघुसृणालेपश्रिया-
पेशलः॥ तुंगोरस्थलपिंगलस्रगलिकप्राडिष्णु पत्रांगुलिः रूपामांगद्युतिरद्यमे सखि हृदृशोर्दुग्धे

श्री०

३९

टयन्नपुस्त्रोटयत्याखिलयज्ञसूत्रकं॥ हुंकारः॥ वैणवध्वानिनिरुद्धमध्यियः शांकरस्याद्रिविडुंकृति(
स्वनः ध्वंसयन्नपि मुकुः सदानवं साधुवृंदमकरोत्सदानवो॥ उन्नयनं यथा॥ विस्फुटतकुमुदवनेस्मि
न्नुदयति पूर्णकलानिधौ पुरतः। तव पद्मिनि मुखपद्मं नतं ते उन्नमय हो चित्रं॥ श्वासन्भूमात्रपस्थि
तविचित्रपटं वुदागमे विहृद्धृत्दृश्यालालितारव्यचातकी। निश्वासऊष्मामरुतापवादितं कृष्णां नुदा॥
कारमवीच्युचुम्बुने॥ लोकानपेक्षिता यथा॥ यथा श्रीदशमे॥ अत्रोपत्रपतनारीणामपि कृष्णेड
गङ्गुरो। दुरंतभावं योः विध्यन्मृत्युपाशान्गृहान्निधात्॥ यथा वापद्मावल्यां॥ परिवदतुङ्गनो यथा
तथाऽयं ननु मुखरो न वयं विचारयामः। हरिरसमदिरामदातिमत्तो नु वि विलुठामि नटामि निर्वि(
शामि॥ लालास्रवः॥ यथा। शांके प्रेमभुजंगेन दष्टः कष्टं गतो गतौ मुनिः। निश्चलस्य यदेतस्य॥
लालास्रवति वक्त्रतः॥ अट्टहासः॥ हासाद्भिन्नोऽट्टहासोयं चित्तविक्षेपसंभवः॥ यथा। शांके विर(
केशवकिंकरस्य चेतस्तटे भक्तिलता प्रफुल्ला। येनाधितुंडस्थलमट्टहासप्रसूनपुंजाश्च हुलं स्ख
लंति॥ घूर्णा यथा॥ ध्रुवमघरिपुरादधातिवात्यां ननु मुरलित्वयि फूत्कृतिच्छलेन। किमयमितरथा ध्वनिर्वि

श्रीरसा०

घूर्णन्नूसखितव घूर्णयति व्रजांबुजाक्षी॥ दिक्का यथा॥ नपुत्रि स्वयोषधं विसृज रोदनं वोद्धतं मुधा प्रियसखी (
प्रतित्वमसि वंकिमाशंकसो हरि प्रणयविक्रियाकुलतया ब्रुवाणामुकुर्वराद्धि हरिरित्यसौ वितनुते ध्यदिक्कान
रं॥ वपुरुत्फुल्लतारक्तोऽङ्गमाद्यास्युः परेपि ये। अतीव विरलत्वात्तेनैवात्र परिकीर्त्तिताः॥ ॥इति श्रीनक्तिर (
सामृतसिंधौदक्षिणविभागेनक्तिरससामान्यनिरूपणेऽनुभावलहरी॥ ॥श्री॥ ॥अथ सात्विकाः॥ ॥कृ (
ष्णसंबंधिभिः साक्षात्किंचिद्वाव्यवधानतः। भावैश्चित्तमिहाक्रांतं सत्वमित्युच्यते बुधैः॥ सत्वादस्मात्समु

श्री०

त्पन्ना ये ये भावास्ते तु सात्विकाः। स्निग्धा दिग्धास्तथा रूक्षा इत्यमी त्रिविधा मताः॥ तत्र स्निग्धाः॥ स्निग्धास्तु सा
त्विका मुख्या गौणाश्चेति द्विधा मताः॥ तत्र मुख्याः॥ आक्रमान्मुख्यया रत्या मुख्याः स्युः सात्विका अमी। विज्ञे
यः कृष्णसंबंधः साक्षादेवात्र सूरिभिः॥ यथा। कुंदैर्मुकुंदाय मुदा सृजंती स्वजं वरां कुंदविडंविदंती। वभूव
गांधर्वरसेन वेणोर्गांधर्विका स्पंदनशून्यगात्री॥ मुख्यस्तंभोयमित्थं ते ज्ञेयाः स्वेदादयोपि च॥ अथ गौणाः

४२

॥रत्याक्रमणतः प्रोक्ता गौणास्ते गौणभूतया। अत्र कृष्णस्य संबंधः स्यात्किंचिद्व्यवधानतः॥ यथा। स्वविलोच
नचर्कांबुदे पुरि नीते पुरुषोत्तमे पुरा। अतिताम्रमुखी सगद्गदं नृपमाक्रोशति गोकुलेश्वरी॥ इमौ गौणौ

त५

पत्रं ५ रोषे तु राक्तिमा नान्नीत्यां कालिमा क्वापि स्तुक्लिमा। रक्तिमालक्ष्यते क्वापि हर्षादिकेऽपि कुत्रचित्

मंदघे॥रोषाद्यथा॥ कंसश्शत्रुमतियुंजतः पुरोवीक्ष्यतस्यसहस्रानुदायुधान्। श्रीवत्सस्यसखिपत्रपरूष्यतः प्रोद्यदिंदुनिभमाननंवभौ॥ नीतेर्यथा॥ रक्षिते ब्रजकुले बकारिणा पर्वतं वरमुदस्य लीलया। कालिमाव लरिपोर्मुखेनवन्नूचिवान्मनसि नीतिमुत्थितां॥ विषादे श्वेतिमाप्रोक्ता धौसर्यं कालिमा क्वचित्। अत्रासार्व त्रिकत्वेन नैवास्योदाहृतिः कृता॥ अथाश्रु॥ हर्षरोषविषादाद्यैरश्रुनेत्रेजलोद्गमः। हर्षजे श्रुणि शीतत्व मोष्ण्यं रोषादिसंभवे। सर्वत्र नेत्रक्षोभ रागसंमार्जनादयः॥ तत्र हर्षेण यथा॥ गोविंदप्रेक्षणात्क्षेपि वाष्पपू रान्निवर्षिणां। उच्चैरनिंददानंदमरविंदविलोचना॥ रोषेण यथा॥ हरिवंशे॥ तस्याः सुस्राव नेत्राभ्यां वा रिप्रणयजं। कुद्धो शयपलाशाभ्यामवश्यायजलं यथा॥ यथा वा॥ भीमस्य चेदीशवधं विधित्सोर्वाष्पच्छटा त्तुं विरूषोपरक्तं। वक्त्रं व्यराजिष्ट सुधावकीर्णं स्विन्नं नु नागस्त मिवेंदुबिंबं॥ विषादेन यथा श्रीदशमे॥ प दासुजातेन नखारुणश्रिया भुवं लिखंत्यश्रुभिरंजनासितैः। आसिंचती कुंकुमरूषितौ स्तनौ तस्थावधोमु ख्यतिदुःखरुद्धवाक्॥ अथ प्रलयः॥ प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः। तत्रानुभावाः कथिताः महीनिपतनादयः॥ तत्र सुखेन यथा॥ मिलितं हरिमाल्लोक्यलतापुंजादतर्कितं। क्षिप्तिश्र

कोप ८

न्यमनारेजेनिश्चलांगीव्रजांगना॥दुःखेनयथा॥श्रीदामे॥अन्याश्चतदनुध्याननिष्पन्नारोमहर्षयः॥
नान्यज्ञानन्निमंलोकमात्मलोकंगताइव॥सर्वेहिसत्वमूलत्वाद्भावायद्यपिसात्विकाः॥तथाप्यमीषां
सत्वैकमूलत्वात्सात्विकप्रथा॥सत्वस्यतारतम्यात्प्राणतनुक्षोभतारतम्यंस्यात्।ततएवतारतम्यंस
र्वेषांसात्विकानांस्यात्॥धूमायितास्तेज्वलितादीप्ताउद्दीप्तसंज्ञिताः॥वृद्धिंयथोत्तरंयांतःसात्विकाःस्यु
श्चतुर्विधाः॥साभूरिकालव्यापित्वेबह्वंगव्यापितापिच।स्वरूपेणतथोत्कर्षइतिवृद्धिस्त्रिधाभवेत्॥

तत्रनेत्रांबुवैस्वर्यवर्जानामेवयुज्यते।बह्वंगव्यापितामीषांतयोःकापिविशिष्टता॥तत्राश्रूणांदृ

गौष्ण्यकारित्वमवदातता।तथातारातिवैचित्रीवैलक्षण्यविधायिता॥वैस्वर्यस्यतुभिन्नत्वकोठ्यव्याकु
लतादयः॥भिन्नत्वंस्थानविभ्रंशः॥कोठ्यंस्यादासन्नकंठता।व्याकुलत्वंतुनात्यैनोच्चनीचगुप्तविलुप्त
ता।प्रायोधूमायिताएवरूक्षास्तिष्ठंतिसात्विकाः॥स्निग्धास्तुप्रायशःसर्वेजातुर्द्वैवभवंत्यमी।मदोत्सवा
दिवृत्तेषुसज्जोष्ठीतांडवादिषु॥ज्वलंत्युल्लासिनःक्वापितेरूक्षाअपिकस्यचित्।सर्वानंदचमत्कारहेतुर्भावो
वरोरतिः॥एतेहितद्विनाभावान्नचमत्कारिताश्रयाः॥तत्रधूमायिताः॥अद्वितीयाअमीभावाअथवास

द्वितीयका॥ ईषद्व्यक्ताऽत्रपञ्चोत्तुंगाख्याधूमायितामता॥ यथा। आकर्णयन्नघहरामघवैरिकीर्त्तिं पक्ष्मा
ग्रमिश्रविरलाश्रुस्नूत्नुरोधाः। यष्टादरोद्भुसितलोमकपोलमीषत्प्रस्विन्ननासिकमुवाह मुखारविंदं।
।अथज्वलिता॥ द्वौ वा त्रयो वायुगपद्यांतः सुप्रकटां दशां। ख्याकाः कष्टेन निष्क्रोत्तुंज्वलिता इति कीर्त्तिताः
॥यथा॥ नगुंजामादातुं प्रभवति करः कंपतरलो दृशो सास्वेपिंछं न परिचिनुतः प्रार्थितमपि। क्षमा नू
२= पुरस्ते पदमपि न गंतुं तव सखे वनाद्वंशीध्वाने परिसरमवाप्ते श्रवणयोः॥ यथा वा। निरुद्धं वाष्पांभः क
थमपि मया गद्गदगिरो ह्रियासद्यो गूढाः सखि विघटितो वेपथुरपि। गिरिद्रोण्यां वेणौ ध्वनति निपुणैरिं
गितनये तथाप्यूहांचक्रे मम मनसि रागः परिजने॥ अथ दीप्ताः॥ प्रौढां त्रिचतुरा व्यक्तिं पंचवायुगपद्ग
ताः संवरीतुमशक्यास्ते दीप्ताधीरैरुदाहृताः॥ यथा। नशक्तिमुपवीणने विरमधत्त कंपाकुलो न गद्गद।
निरुद्धवाक् प्रभुरनूडुपश्लोकने। क्षमोऽञ्जनिनवीक्षणे विगलदश्रुपूरः पुरो मुरद्विषि परिस्फुरत्यवश।
मूर्त्तिरासीन्मुनिः॥ यथा वा॥ किमुन्मीलत्पस्वे कुसुमजरजोगंजसि मुधा सरोमांचे कंपे हिममनिलमाक्रोश॥-
सि कुतः॥ किमूरुस्तंभेनेवावनविहरणं द्वेक्षि सखि ते निरावाधं राधे वदति मदनाधिं स्वरगिदा॥ अथोद्दीप्ताः॥

एकदा व्यक्तिमापन्नाः पंच षाः सर्व एव वा । आरूढाः परमोत्कर्षमुद्दीप्ता इति शब्दिताः ॥ यथा । अद्य खिद्य-
ति वेपते पुलकिनी निःस्पंदतामंगके धत्ते काकुनिराकुलै विलपति म्लायत्यनल्पाश्रुभिः । तिष्ठत्यी-
वुत्तिरंवकस्तवकितैः पीतांवरोड्डामरं सद्यस्त्वद्विरहे मुहुर्हरि मुकुंगोष्ठाधिवासी जनः ॥ उद्दीप्ता एव
सूद्दीप्ता महाभावे भवंत्यमी । सर्व एव परां कोटिं सात्त्विका यत्र विभ्रति ॥ किंच । अथात्र सात्त्विकाभासा विलि-
ख्यंते चतुर्विधाः । रत्याभासभवास्ते तु सत्त्वाभासभवास्तथा ॥ निःसत्त्वाश्च प्रतीपाश्च यथापूर्वममी वराः ॥ त-
त्राद्याः ॥ मुमुक्षुप्रमुखेष्वाद्या रत्याभासात् पुरोदिता ॥ यथा ॥ वाराणसीनिवासी कश्चिदयं व्याहरन् हरेश्चरि-
तं । यतिगोष्ठ्यामुत्पुलकः सिंचति गंडद्वयीमस्रैः ॥ अथ सत्त्वाभासभवाः ॥ मुद्विस्मयादेराभासः प्रोद्यन्
जात्या श्लथे हृदि । सत्त्वाभास इति प्रोक्तः सत्त्वाभासभवास्ततः ॥ यथा ॥ जरन्मीमांसकस्यापि शृण्वतः कृष्ण-
विभ्रमं । हृष्यायमाणमनसो वभूवोत्पुलकं वपुः ॥ यथा वा ॥ मुकुंदचरितामृतप्रसरवर्षिणस्ते मया कथं क-
थनचातुरीमधुरिमा गुरूर्वर्ण्यतां । मुहूर्त्तमतदर्थिनो विषयिणोपि यस्याननान्निशाम्य विजयं प्रत्नोर्द-
धति वाष्पधाराममी ॥ अथ निःसत्त्वाः ॥ निसर्गपिच्छलस्वांते तदभ्यासपरेपि च । सत्त्वाभासं विनापि स्युः

जितनिःफलोगतोराज्यश्रियोन्नद्धमदस्यनृपतेः। मन्त्र्यात्मवृद्धैःसुतदारकोशान् आसज्जमानस्यदुरं
तचिंतया॥ अमंगलमपिप्रोच्यनिर्वेदंप्रथमंमुनिः। मेनेऽमुंस्थायिनंशांते इतिजल्पंतिकेचन॥ अथवि
षादः॥२॥ इष्टानवाप्तिप्रारब्धकार्यासिद्धिविपत्तितः। अपराधादितोपिस्यादनुतापोविषण्णता। अत्रो
पायसहायानुसंधिश्चिंतावरोदनं। विलापश्वासवैवर्ण्यमुखशोषादयोपिच। तत्रेष्टानवाप्तितोयथा।
जरांयातामूर्त्तिर्ममविवशतांवागपिगतामनोवृत्तिश्चेयंस्मृतिविधुरतापद्धतिमगात्॥ अघध्वंसिन् दूरे
वसतुनवदालोकनदशाश्रीमयाहंतप्राप्तोननुजनरुचेरप्यवसरः॥ प्रारब्धकार्यासिद्धेर्यथा। स्वप्नेमयाद्य
कुसुमानिकिलाहृतानियत्नेनतैर्विरचितावनमालिकाच। यावन्मुकुंदहृदिहंतनिधीयतेसाहातावदे
वतरसाविररामनिद्रा॥ विपत्तेर्यथा॥ हरिरनायिपुरेकिमयंमयानिजगृहेविनिगृह्यनकिंधृतः। अ
हहपश्यपतदंतिविधुंतुदोविधुरितंविधुमत्रविधित्सति॥ अपराधात्यथाश्रीदशमे॥ पश्यपेश
सेऽनार्यमनंतआद्येपरात्मनित्वय्यपिमायिमायिनि। मायांवितत्येक्षितुमात्मवैभवंह्यहंकियान्
नैच्छमिवार्चिरग्नौ। यथावा॥ स्यमंतकमहंहृत्वागतोघोरास्यमंतकीं। करवैतां[illegible]कांवाद्धिंशावैतरणीं।

=रणीं

मन्तु॥ अथ दैन्यं॥ ३॥ दुःखत्रासापराधाद्यैरनौर्जित्यं तु दीनता। चाटुकृन्मांद्यमालिन्यचिंतांगजडिमादि
कृत्॥ तत्र दुःखेन यथा॥ श्रीदशमे॥ चिरमिह वृजिनार्त्तस्तप्यमानोनुतापैरवितृषषडमित्रोलब्धशांतिः
कथंचित्। शरणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि मापन्नमीश॥ त्रासेन यथा॥ प्रथ
मे॥ एष द्रवति मामीश शरस्तप्तायसः प्रभो। कामं दहतु मां नाथ मा मे गर्भो निपात्यतां॥ अपराधेन य
था श्रीदशमे॥ अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः। अजावलेपांध
तमोंधचक्षुष एषोनुकंप्यो मयि नाथवानिति॥ आद्यशब्देन लज्जयापि। यथा तत्रैव। मानयं नोः
कृथास्त्वां तु नंदगोपसुतं प्रियं। जानीमोंः ग व्रजश्लाघ्यं देहि वासांसि वेपिताः॥ अथ ग्लानिः॥ ५॥ ओजः
सोमात्मकं देहे वलपुष्टिकृदस्य तु। क्षयाच्छ्रमादिरत्याद्यैर्ग्लानिर्निष्प्राणता मता। कंपांगजाड्यवैवर्ण्य
कार्श्यदृग्भ्रमणादिकृत्॥ तत्र श्रमेण यथा॥ आघूर्णन्मणिवलयोज्ज्वलप्रकोष्ठा गोष्ठांतर्मधुरि
पुकीर्त्तिनर्त्तितोष्ठी। लोलाक्षी दधिकलसं विलोलयंती कृष्णायत्क्लमभरनिःसहा वभूव॥ यथा
गुंफितुं निरुपमां वनस्रजं चारुपुष्पपटलं विचिन्वती। दुर्गमे क्लमभरातिदुर्वला काननेद्य गम

मून्मृगेक्षणा॥ आधिना यथा॥ सारसव्यतिकरेण विदीनात्क्षीणजीवनतयोज्झलहंसा। माधवाद्य वि-
रहेण तवांबा शुष्यति स्म सरसीव शुचिनेव॥ रत्या यथा। रससुधाकरे॥ अतिप्रयत्नेन रतांततांतां ता-
कृत्स्नेन तल्पादवरोपितासा। आलंब्य तस्यैव करं करेण ज्योत्स्नाकृतानंदमलिंदमाप॥ अथ श्रमः
॥५॥ अध्वनृत्यरत्याद्युत्थः श्रम इतीर्यते। निद्रास्वेदांगसंमर्दजृंभाश्वासादिना गसो॥ तत्राध्वनो यथा
। कृतागसं पुत्रमनुव्रजंती व्रजांगिरां तर्व्रजराजराज्ञी। परिस्खलत्कुंतलबंधनेयं बभूव घर्मांबुक-
रंचितांगी॥ नृत्याद्यथा॥ विस्तीर्यत्रिरलितहारभंगहारं संगीतोन्मुखमुखरैर्हतः सुहृद्भिः। आस्विद्यद्धि-
रचितनंदसूनुः पर्वाकुर्वाणस्तटनु वितांडवानिरामः॥ रताद्यथा दशमे॥ तासां रतिविहारेण श्रांता-
नां वदनानि श्रीः। प्रामृजत्करुणः प्रेम्णा शांतमेनांगपाणिना॥ अथ मदः॥६॥ विवेकहरणोल्लासो
मदः स द्विविधो मतः। मधुपानभवो नंगविक्रियाभरजोपि च॥ गत्यंगवाणीस्खलनदृग्घूर्णार-
क्किमादिकृत्॥ तत्र मधुपानभवः॥ यथा ललितमाधवे॥ विलंघ्य नु वितलितल्पिरेन्दपतिपीडिकाः
पीडिताः पिनष्मि जगदंडकं न न हरिः क्रुधं धास्यति॥ शचीं ग्रहकुरंगरे हससि किं त्वमित्युन्न-

श्रीरसा०

दनुदेतिमदद्धुंवरस्खलितचूडमयेहल्ली॥यथावाप्राचां॥भ्रमतिमेदिनीललललंबतेचंद्रमाःकृष्ण
श्चववदद्भुतंहहहसंतिकिंशश्वत्त्वयः।शिशीधुमुमुमुंचमेपपपपानपात्रास्थितंमदस्खलितमालपन्
हलधरःश्रियंवःक्रियात्॥उन्मत्तमस्तुमदाद्धेदैतमध्योहसतिगायति।कनिष्ठःक्रोशतिस्वैरंपरुषंव
क्तिरोदिति॥मदोपित्रिविधःप्रोक्तस्तरुणादिप्रभेदतः।अत्रनात्युपयोगित्वाद्विस्तार्यनहिवर्तितः।
॥अनंगविक्रियान्तरंगः॥व्रजपतिसुतमग्रेप्रेक्ष्यन्तुश्रीनवद्भूर्भ्रमतिहसतिरोदित्यास्यमंतर्दधाति
।प्रलपतिमुकुराल्लीवंदतेपश्यवृंदेनवमदनमदांधाहंतगांधर्विकेयं॥अथगर्वः॥७॥सौभाग्यरू

श्री०

पतारुण्यगुणसर्वोत्तमाश्रयैः।इष्टलाभादिनाचान्यहेलनंगर्वईर्यते॥तत्रसोल्लुंठवचनंलीला
नुत्तरदायिता।स्वांगेक्षानिह्नवोऽन्यस्यवचनाश्रवणादयः॥तत्रसौभाग्येनयथाविल्वमंगले॥हस्त
मुत्क्षिप्ययातोसिबलात्कृष्णकिमद्भुतं।हृदयाद्यदिनिर्यासिपौरुषंगणयामिते॥रूपयौवनेनय
था॥यस्याःस्वभावमधुरांपरिष्वज्यमूर्त्तिंधन्यावभूववनितरामपियौवनश्रीः।सेयंत्वयिव्रजवधू
रातनुतेमुकुन्दकृपातुमाचरतुकृष्णकथंसखीमे॥गुणेनयथा।गुंफंतुगोपाःकुसुमैःसुगंधिनिर्दी॥

४९

मानिकामंद्यतरामणीयकेः॥ निधास्यते किंतु सत्वहमग्रतः कृष्णो मदीयां हृदि विस्मृतः स्वजं॥ सर्वे तत्त्वमाश्रयेण यथा। श्रीदशमे। तथा न ते माधव तावकाः क्वचित् भ्रश्यंति मार्गात्त्वयि वद्धसौहृदाः। त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो॥ इष्टलाभेन यथा॥ वृंदावनेंद्रभवतः परमं प्रसादमासाद्य नंदितमतिर्मुरहृतोस्मि। आशंसते मुनिमनोरथवृत्तिमृग्यां वैकुंठनाथकरुणामपि नाद्य चेतः॥ अथ शंका॥८॥ स्वीयचौर्यापराधादेः परक्रौर्यादितस्तथा। स्वानिष्टोत्प्रेक्षणं यत्तु सा शंकेत्यभिधीयते॥ अत्रास्यशोषवैवर्ण्यदिक्प्रेक्षालीनतादयः॥ तत्र चौर्याद्यथा॥ सतर्णकं डिंभकदंवकं दरं सद्म मनोरहं संभवस्तदा। तिरोनविष्यनृहरितश्चलेक्षणोः रष्टाभिरष्टोहरितः समीक्षते॥ यथा वा॥ स्यमंतकं दत्तवमंतमर्थ निह्नुत्य दूरं यद दं प्रयातः। अवद्यमद्यापि तदेव कर्म शर्माणि चित्ते मम निर्भिनत्ति॥ अपराधाद्यथा॥ तदवधि मलिनोसि नंदगोष्ठे यदवधि वृष्टिमवीकरः शचीशः। श्रृणु हितमभितः प्रपद्य कृष्णं श्रियमविशंकमलं कुरुत्व मैंद्री॥ परक्रौर्येण यथा॥ पद्यावल्यां॥ प्रथयति न तथा ममार्त्तिमुच्चैः सहचरि वल्लवचंद्रविप्रयोगः। कटुभिरसुरमंडलैः परीते दनुजपतेर्नगरे यथास्य वासः॥ शंका तु प्रवर

श्रीरसा०

स्त्रीणांनीरुत्वाज्जयकृज्जवेत्॥ अथत्रासः॥९॥ त्रासःक्षोभोहृदितडिद्घोरसत्वोग्रनिस्वनैः। पार्श्वस्थालंब
रोमांचकंपस्तंभभ्रमादिकृत्॥ तत्रतडितायथा॥ वाढंनिविडयासद्यस्तडितताडितेक्षणः। रक्षःकृष्णेतितु
क्रोशकोपिगोपीस्तनंधयः॥ घोरसत्वेनयथा॥ अदूरमासेदुषिवल्लवांगनास्वंपुंगवीकृत्यसुरारिपुंगवे।
।कृष्णभ्रमेणाश्रुतरंगदंगिकातमालमालिंग्यवनूवनिश्चला॥ उग्रनिस्वनेनयथा॥ आकर्ण्यकर्णपदवी-
विपदंयशोदाविस्फूर्जितंदिशिदिशिप्रकटंघटकानां। यामान्त्रिकामेचतुराचतुरःस्वपुत्रंसानेत्रचत्वर
चरंचिरमाचचार॥ गात्रोत्कंपीमनःकंपःसहसात्रासउच्यते। पूर्वापरविचारोत्थंभयंत्रासात्पृथग्भ
वेत्॥ अथावेगः॥१०॥ चित्तस्यसंभ्रमोयःस्यादावेगोयंसचाष्टधा। प्रियाप्रियानलमरुद्वर्षोत्पातगजा-
रितः॥ प्रियोत्थेपुलकःसांत्वंचापलान्युद्गमादयः॥ अप्रियोत्थेतुभूपातविक्रोशभ्रमणादयः॥ वत्पस्त
गतिकंपाक्षिमीलनास्रादयोऽनिलजे। वातजेंगावृतिक्षिप्रगतिदृङ्मार्जनादयः॥ वृष्टिजेधावनछत्रगा
त्रसंकोचनादिकृत्। औत्पातेमुखवैवर्ण्यविस्मयोत्कंपितादयः॥ गाजेपलायनोत्कंपत्रासपृष्ठेक्षणा
दयः॥ अरिजोवर्मशस्त्रादिग्रहापसरणादिकृत्॥ तत्रप्रियदर्शनजोयथा॥ प्रेक्ष्यवृंदावनात्पुत्रमायां

श्री०

५०

50

तं ४

र्ष्विबोधाय तथाप्यत्र निदर्शितः॥ अथोन्मादः॥ ११॥ उन्मादो हृद्भ्रमः प्रौढानंदापद्विरहादिजः॥ अ
त्राट्टहासो नटनं संगीतं व्यर्थचेष्टितं। प्रलापधावनाक्रोशा विपरीतक्रियादयः॥ तत्र प्रौढानंदाद्यथा॥
बिल्वमंगले॥ राधा पुनातु जगदच्युतदत्तचित्ता मंथानकं निदधती दधिरिक्तपात्रे। यस्याः स्तन
स्तवकचंचललोचनालिर्देवोपि रुद्धहृदयो धवलं दुदोह॥ आपदो यथा॥ पश्यन्नपि कृतांजलिर्न
मति मांत्रिका इत्यमीतरूनपि चिकित्सका इति विषौषधं पृच्छति। ह्रदं भुजंगनीरवं हरिरिह प्रविष्टे
हरौ व्रजेंद्रगृहिणी मुहुर्भ्रममयीमवस्थां गता॥ विरहाद्यथा॥ श्रीदशमे॥ गायंत्य उच्चैरमुमेव संह
ता विचिक्युरुन्मत्तकवद्वनाद्वनं। पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन्॥ उन्मादः
वृ= पृथगुक्तोयं व्याधिष्वंतर्भवन्नपि। यत्तत्र विप्रलंभादौ वैचित्रीं कुरुते परां॥ अधिरूढे महाभावे मोहन
त्वमुपागते। अवस्थांतरमाप्तोसौ दिव्योन्माद इतीर्यते॥ अथापस्मारः॥ १२॥ दुःखोत्थधातुवैषम्या
द्युद्भूतश्चित्तविप्लवः॥ अपस्मारोत्र पतनं धावनास्फोटनभ्रमाः॥ कंपः फेनस्रुतिर्बाहुक्षेपो वि[illegible]
क्रोशनादयः॥ यथा॥ फेनायते प्रतिपदं क्षिपते भुजोर्मिमाघूर्णते लुठति कूजति लीयते च। अंवात

श्रीरसा०

वाद्यविरहे चिरम् ॥ अंबुराजवेल्लेव हन्ति तिलकव्रजराजराज्ञी ॥ यथा वा ॥ श्रुत्वा हंत हतं त्वया यदुकुलोत्तंसात्र कंसासुरं दैत्यस्तस्य सुहृत्तमः परि(ग)तिं घोरां गतः कामपि ॥ लालाफेनकदंबचुंबितमुखप्रांतस्तरंगं दृशोर्घूर्णन्नर्णवसीम्नि मंडलतया भ्राम्यन्न विश्राम्यति ॥ उन्मादवद् इह व्याधिविशेषो ऽप्यवर्णितः परां त्वयानकाभासेयकरोति च मत्कृतिं ॥ अथ व्याधिः ॥ १३ ॥ दोषोद्रेकवियोगाद्यैर्व्याधयो ये ज्वरादयः ॥ इह तत्प्रभवो भावो व्याधिरित्यभिधीयते ॥ अत्र स्तंभः श्लथांगत्व श्वासोत्तापक्लमादयः ॥ यथा ॥ तव चिरविरहेण प्राप्य पीडामिदानीं दधदुरुजडिमानिं ध्मापितान्यंगकानि ॥ श्वसितपवनधाटीघट्टितघ्राणवाटं लुठति धरणिपृष्ठे गोष्ठवाटीकुटुंबं ॥ अथ मोहः ॥ १४ ॥ मोहो हृन्मूढता हर्षाद्विश्लेषाद्भयतस्तथा ॥ विषादादेश्च तत्रास्याद्देहस्य पतनं भुवि ॥ शून्येन्द्रियत्वं भ्रमणं तथा निश्चेष्टतादयः ॥ तत्र हर्षाद्यथा ॥ श्रीदशमे ॥ इति सम्पृष्टः सच वादरायणिस्तत्स्मारितानंतहृताखिलेन्द्रियः ॥ कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तमं ॥ यथा वा ॥ निरुच्छ्वसितरीतयो विघटिताक्षिपक्ष्मक्रिया निरीहनिखिलेन्द्रियाः प्रतिनिवृत्तचिद्वृत्तयः ॥ अ-

श्री०

५२

वेद्यकुरुमंडलेरहसिपुंडरीकेक्षणं व्रजांबुजदृशोऽनजनूकनकशालभंजीश्रियं।विश्लेषाद्यथा
।हंसदूते॥कदाचित्खेदाग्निंविघटयितुमंतर्गतमसौसहालीनिर्लेभेतरलितमनायामुनतटीं।चि
रादस्याश्चित्तंपरिचितकुटीरावकलनादवस्थात्तस्तारस्फुटमथसुषुप्तेःप्रियसखी॥नयाद्यथा॥
मुकुंदमाविष्कृतविश्वरूपंनिरूपयन्वानरवर्यकेतुः।करारविंदात्पुरतःस्खलंतंनगांडिवंखं
डितधीर्विवेद॥विषादाद्यथा॥श्रीदशमे॥कृष्णंमहावकग्रस्तंदृष्ट्वारामादयोऽर्भकाः।बभूवुरिं
द्रियानीवविनाप्राणंविचेतसः॥अन्यत्रात्मादिपर्यंतिस्याःसर्वत्रैवमूढता॥कृष्णस्फूर्त्तिविशेषस्तु
नकदाप्यत्रलीयते॥अथमृतिः॥१५॥विषादव्याधिसंत्राससंप्रहारक्लमादिभिः॥प्राणत्यागोमृति
स्तस्यामव्यक्ताक्षरभाषणं॥विवर्णगात्रताश्वासमांद्यहिक्कादयःक्रियाः॥अनुल्लासश्वासामुहुर
सरलोत्तानितदृशोविवृण्वंतःकायेकिमपिनववैवर्ण्यमनितः॥हरेर्नामाव्यक्तीकृतमलघुहिक्का
लहरिभिःप्रजल्पंतःप्राणानूजहतिमथुरायांसुकृतिनः॥यथावा॥विरमदलघुकंठोद्घोषघू
कारवक्राक्षणविघटितताम्यदृष्टिखद्योतदीप्तिः॥हरिमिहिरनिपीतप्राणगाढांधकारात्क्षयमगम

यथा॥५

श्रीरसा०

दकस्मात्पूतनाकालरात्रिः॥ प्रायोऽत्रमरणात्पूर्वा चित्तवृत्तिर्मृतिर्मता॥ किंतु नायकवीर्यार्थं शात्रोमर
णमीर्यते॥ मृतिरत्रानुभावस्या दितिकेनचिदुच्यते। अनुभावतया केश्चिन्मृतिरत्राभिधीयते॥ अथा
लस्यं॥ १६॥ सामर्थ्यस्यापि सद्भावे क्रियानुन्मुखता हिया। तृप्तिश्रमादिसंभूता तदालस्यमुदीर्यते
। अत्रांगभंगो जृंभा च क्रियाद्वेषोऽक्षिमर्दनी। शय्यासनैकप्रियता तंद्रीनिद्रादयोपि च॥ तत्रतृप्ति
र्यथा॥ विप्राणां न स्तथा तृप्तिरासीज्जो वर्द्धनोत्सवे। नाशीर्वादेपि गोपेंद्रयथा स्यात्प्रभविष्णुता॥ अ

श्री०

माद्यथा॥ सुष्ठु निःश्वसत तनुः सुबलो भूत्प्रीतये मम विधाय नियुद्धं। मोऽद्यं तमन्निती निजमंगं ना
ह्वाय मङ्क्षु राकयतामुं॥ अथ जाड्यं॥ १७॥ जाड्यमप्रतिपत्तिः स्यादिष्टानिष्टश्रुतीक्षणेः। विरहा
द्यैश्च तन्मोहात्पूर्वावस्थापरापि च। अत्रानिमिषता तूष्णींभावविस्मरणादयः। तत्रेष्टश्रुत्यायथा
श्रीदशमे॥ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबंत्यः। शावाः स्नुत
स्तनपयः कवलाः स्मतस्थुर्गोविंदमात्मनि दृशाश्रुकलाः स्पृशंत्यः॥ अनिष्टश्रुत्यायथा॥ आकल
य्यपरिवर्त्तितगोत्रां केशवस्य गिरमर्पितशल्यां। वि[illegible]र धिकनिर्निमिषाक्षी लक्ष्मणा क्षणमवर्त्त

ततश्च॥ इष्टेक्षणेन यथा तत्रैव॥ गोविंदं गृहमानीय देवदेवेशमादृतः पूजायां नाविदत्कृत्यं प्रमोदो
पहतोन्त्रपः॥ अनिष्टेक्षणेन यथा। तत्रैव। यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च। अनुप्रस्थापिता त्मा
नो लेख्यानीवोपलक्षिताः॥ विरहेण यथा॥ मुकुंदविरहेण ते विधुरिताः सखायश्चिरादलीकृति
त्तिरुज्झिता भुवि निविश्य तत्र स्थिताः। स्खलन्मलिनवाससः शबलरूक्षगात्रश्रियः स्फुरंति खल
देवलङ्घितगृहे सुरार्चा इव॥ अथ व्रीडा॥ १८॥ नवीनसंगमाकार्यस्तवावज्ञादिना कृता। अधृष्टता
व्रीडा तत्र मौनं विचिंतनं। अवगुंठनभूलेखौ तथाधोमुखतादयः॥ तत्र नवीनसंगमेन यथा॥ गो
विंदे स्वयमकरोः सरोजनेत्रे प्रेमांधा वरवपुरर्पणं सखि त्वं। कार्पण्यं न कुरु दरावलोकदाने विक्रीते
करिणि किमंकुशे विवादः॥ अकार्येण यथा॥ त्वमेवागिरहमाशिरश्चै अवज्ञया यथा हरिवंशे सत्या
देवीवाक्यं॥ वसंतकुसुमैश्चित्रं सदा रैवतकं गिरिं। प्रियानूत्वा प्रियानूता कथं द्रक्ष्यामि तं पुनः॥ अ
थावहित्था॥ १९॥ अवहित्थाकारगुप्तिर्भवेद्भावेन केनचित्। अत्रांगादेः परान्यत्र स्थानस्य परिगूह
नं। अन्यत्रेक्षा वाश्चंगीतादयः क्रियाः॥ तथा चोक्तं। अनुभावपिधानार्थोवहित्थं भाव उच्यते।

कृथा वदनं च त्रपया शचीपते। नयकल्पतर्जु नेचदचीकथमेममुरवमीक्षिष्यसि॥ स्तवेन यथा॥ भूरिसाद्गुण्यभारेण स्तूयमा

भक्तिरसामृतसिंधौ दक्षिणविभागे ४

श्रीरसामृ०

॥तत्रजैह्म्येनयथाश्रीदशमे॥ सभाजयित्वातमनंगदीपनंसहासलीलेक्षणविभ्रमभ्रुवा। संस्पर्शनेनां
कृतांघ्रिहस्तयोः संस्तुत्यईषत्कुपिताबभाषिरे॥ दाक्षिण्येनयथा॥ सात्राजितीसदनसीमनिपा
रिजातेनीतेप्रणीतमहसामधुसूदनेन। द्राघीयसीमपिविदर्भभुवस्तदेर्ष्यांसौशील्यतःकिलनको
पिविदांबभूव॥ ह्रियायथाप्रथमे॥ तमात्मजैर्दृष्टिभिरंतरात्मनादुरंतभावाःपरिरेभिरेपतिं। नि
रुद्धमप्यास्रवदंबुनेत्रयोर्विलज्जतीनांभृगुवर्यवैक्लवात्॥ जैह्म्यह्रीभ्यांयथा। कादृष्टसप्तितंगो

श्री०

ष्ठभुजंगंकुलपालिका। इतियत्रश्रुतेमूर्च्छांनीत्वारोमोचितामम॥ सौजन्येनयथा। गूढागांऽनीर्ष्यसंप
द्भिर्मनोगह्वरगर्त्तगा। प्रौढापिस्पष्टरतिःकृष्णेदुर्वितर्कापरैरभूत्॥ गौरवेणयथा॥ गोविंदेसुवलमुखैः
समंसुहृद्भिःस्मेरास्येःस्फुटमिहनर्मनिर्मिमाणे। आनम्रीकृतवदनःप्रमोदमुग्धोयत्नेनस्मितमथ
संववारपत्री॥ हेतुःकश्चिद्भवेत्कश्चिद्गोप्यःकश्चनगोपकः। इतिभावत्रयस्यात्रविनियोगःसमीक्ष्यते
हेतुत्वंगोपकत्वंचगोप्यत्वंचात्रसंभवेत्। प्रायेणसर्वभावानामेकशोऽनेकशोपिच॥ अथस्मृतिः॥ २०
यास्यात्पूर्वानुभूतार्थप्रतीतिःसदृशेक्षया। दृढाभ्यासादिनावापिसास्मृतिःपरिकीर्त्तिता॥ तत्र

५४

श१

स्त्राशिरःकंपोभ्रूविक्षेपादयोपि च॥ तत्र सदृक्षतया यथा॥ विलोक्यश्याममंभोदमंभोरुहविलोचना। स्मा
रंस्मारंमुकुंदत्वांस्मारंविक्रममन्वभूत्॥ दृढाभ्यासेन यथा॥ प्रणिधानविधिमिदानीमकुर्वतोविप्र
मादतोऽद्यमे। हरिपदपंकजयुगलंक्वचिकदाचित्परिस्फुरति॥ अथ वितर्कः॥२१॥ विमर्शात्संशया
देश्च वितर्कस्यादूह उच्यते। एष भ्रूक्षेपणशिरोंगुलिसंचालनादिकृत्॥ तत्र विमर्शाद्यथा विदग्धमाध
वे॥ नजानीषेमूर्ध्नश्च्युतमपिशिखंडंयदखिलंनकंठेयन्माल्यंकलयसिपुरस्तात्कृतमपि। तदुन्नीतं
वृंदावनकुहरलीलाकलहहेस्फुटंराधानेत्रभ्रमरवरवीर्योन्नतिरियं॥ संशयाद्यथा॥ असौकिंतापिं
छोनहियदमलश्रीरिहगतिःपयोदःकिंवायंनयदिहनिरंको। हिमकरः। जगन्मोहारंभोद्धुरमधुरवं
शीध्वनिरितोध्रुवंमूर्द्धन्यद्रेविधुमुखिमुकुंदोविहरति॥ विनिर्णयांतएवायंतर्कइत्यूचिरेपरे॥ अथ चिं
ता॥२२॥ ध्यानंचिंताभवेदिष्टानाप्तिनिष्टाप्तिनिर्मितं। श्वासाधोमुखभूलेखवैवर्ण्यानिद्रताइह। वि
लापोत्तापकृशताबाष्पदैन्यादयोपि च॥ तत्रेष्टानाप्त्या यथा श्रीदशमे॥ कृत्वामुखान्यवशुचःश्वस
नेनशुष्यद्बिंबाधराणिचरणेनभुवंलिखंत्यः। अस्त्रैरुपात्तमषिभिःकुचकुंकुमानितस्थुर्मृजंतत

श्रीरसा०

रुदुःखन्नराः स्मतूष्णीं॥ यथावा॥ अरतिन्निरतिक्रमयक्ता माप्रदोषमदोषधीः कथमपिविरादध्या
सीनाप्रधानमघांतकः॥ विधुरितमुखीघूर्णत्यनुः प्रसूस्तव चिंतया॥ किंमहह गृहं क्रीडालुब्धस्त्वया
द्यविस्मरेः॥ अनिष्टाशायथा॥ गृहिणिगहनायांतास्तयोन्निद्रनेत्रास्नपयनवदनेंदुंवा
ष्पबिंदूत्करेण॥ नृपपुरमनुविंदन्गांदिनेयेनसार्द्धंतवसुतमहमेवद्राक्पपरावर्त्तयामि॥ अथमतिः
२३॥ शास्त्रादीनांविचारोत्थमर्थनिर्धारणंमतिः॥ अत्रकर्त्तव्यकरणंसंशयभ्रमयोश्छिदा॥ उपदेशश्च
शिष्याणमूहापोहादयोपिच॥ यथापाद्मेवैशाखमाहात्म्ये॥ व्यामोहायचराचरस्यजगतस्तेतेपुरा
णागमास्तांतामेवहिदेवतांपरमिकांजल्पंतुकल्पावधि॥ सिद्धांतेपुनरेकएवभगवान्विष्णुःसम
स्तागमव्यापारेषुविवेचनव्यतिकरंनीतेषुनिश्चीयते॥ यथावा॥ श्रीदशमे॥ त्वंन्यस्तदंडमुनि
भिर्गदितानुभावआत्मात्मदश्चजगतामितिमेवृतोसि॥ हित्वाभवद्भ्रुवउदीरितकालवेगध्वस्ता
शिषोब्जभवनागपतीन्कुतोन्ये॥ अथधृतिः॥ २४॥ धृतिःस्यात्पूर्णताज्ञानदुःखाभावोत्तमा
प्तिभिः॥ अप्राप्तातीतनष्टार्थानभिसंशोचनादिकृत्॥ तत्रज्ञानेनयथा॥ भर्तृहरेः॥ अश्नीमहिवयं

श्री०

५५

न२

णीमाधुरीणां धुरीणा कल्याणी मे निवसति वधूः परस्य पार्श्वे न वोढा । अंतर्गोष्ठे चटुल नटयन्नेत्रान्ने
त्रत्रि नागं निःशंकस्त्वं भ्रमसि न विताना कुलत्वं कुतो मे ॥ अपमानाद्यथा ॥ कदंबवनतस्कर द्रुतम
पेहि किं चाटुभिर्जने ऽस्तवति मद्विधे परिभवो हि नातः परः । त्वया व्रजमृगीदृशां सदसि हंत चंद्राव
लीवरापि यदयोग्यया स्फुटमदूषि ताराख्यया ॥ आदिशब्दाद्वंचनादपि ॥ यथा श्रीदशमे ॥ प
तिसुतान्वयभ्रातृबांधवानतिविलंघ्य तेंत्यच्युतागताः । गतिविदस्तवोद्गीतमोहिताः कितव योषि
तः कस्त्यजेन्निशि ॥ अथासूया ॥ २९ ॥ द्वेषः परोदये ऽसूया स्यात्सौभाग्यगुणादिभिः । तत्रेर्ष्यानाना द
दो = राक्षेपादोषारोपो गुणेष्वपि ॥ अपकृत्तिस्तिरोवीक्षा भ्रुवोर्भंगुरतादयः ॥ तत्र सौभाग्येन यथा प
द्यावल्यां ॥ मा गर्वमुद्वह कपोलतले चकास्ति कृष्णस्वहस्तलिखिता नवमंजरीति । अन्यापि किं
न सखि भाजनमीदृशीनां वैरी न चेद्भवति वेपथुरंतरायः ॥ यथा वा श्रीदशमे ॥ तस्या अमूनि नः
क्षोभं कुर्वंत्युच्चैः पदानि यत् । यैकापहृत्य गोपीनां धनं भुंक्तेऽच्युताधरं ॥ गुणेन यथा । स्वयं पराङ्
यैः प्राणान्कृष्णपद्मान् विडित्य नः । वलिष्ठा वल्लपद्माक्षे दुर्वलाः के ततः क्षितौ ॥ अथ चापल्यं ॥

श्रीरसा०

३०॥ रागद्वेषादिभिश्चित्तलाघवंचापलंभवेत्। अत्राविचारपारुष्यस्वच्छंदाचरणादयः॥ तत्ररागे
णयथा। श्रीदशमे। श्वोभाविनित्वमजितोद्वहनेविदर्भान्गुप्तःसमेत्यपृतनापतिभिःपरीतः।
निर्मथ्यचैद्यमगधेशबलंप्रसह्यमांराक्षसेनविधिनोद्वहवीर्यशुल्कां॥ द्वेषेणयथा॥ वंशीपूरे
णकालिंद्याःसिंधुंविंदतुवाहिता। गुरोरपिपुरोनीवीयामंत्रेशयतिसुभ्रुवां॥ अथनिद्रा॥ ३१॥ चिं
तालस्यनिसर्गक्लमादिभिश्चित्तमीलननिद्रा। तत्रांगभंगजृंभाजाड्यश्वासाक्षिमीलनानिस्युः
॥ तत्रचिंतयायथा। लोहितायतिमार्तंडेवेणुध्वनिमशृण्वती। चिंतयाक्रांतहृदयानिदद्रौनं
दगेहिनी। आलस्येनयथा॥ दामोदरस्यबंधनकर्मभिरतिनिःसहांगलतिकेयं। दरघूर्णितो
त्तमांगाकृतांगभंगंगवाब्जेशरीस्फुरति॥ निसर्गेणयथा॥ अघहरतववीर्यप्रोषिताशेषचिंताः
परिहृतगृहवास्तुद्वारबंधानुबंधाः। निजनिजमिहगा[illegible]वोप्रांगणेना। शोभयंतःसुखमविचलदं
गाःशेरतेपश्यगोपाः॥ क्लमेनयथा॥ संक्रांतधातुचि[illegible]स्फुरतीतेसानितांततांताद्य। वक्षसिनि
क्षिप्तांहरेर्विशाखायायौनिद्रां॥ युक्तास्यस्मृतिमात्रेण[illegible]र्वशोषेणकेनचित्। उन्मीलनात्पु

श्री०

५७

रोवस्था निद्रान्तकेषु कथ्यते॥ अथ सुप्तिः॥ ३२॥ सुप्तिर्निद्राविभावावस्थानानार्थानुभवात्मिका। इंद्रि
योपरतिश्वासनेत्रसंमीलनादिकृत्॥ यथा॥ कामं तामरसाक्षकेलिरभितः प्रादुर्भूताशेषशावीद
र्पः सर्पपतेस्तदस्य तरसा निर्धूयतां मुहुः। इत्युत्स्वप्नगिरा विराधदुसत्तां विस्मेरयन् स्मेरयन्।
निश्वासेन दरोत्तरंगदुदरं निद्रां गतो लांगली॥ अथ बोधः॥ ३३॥ अविद्यामोहनिद्रादेर्ध्वंसाद्बोधः
प्रबुद्धता॥ तत्राविद्याध्वंसतः। अविद्याध्वंसतो बोधो विद्योदयपुरःसरः। अशेषक्लेशविश्रांति
स्वरूपावगमादिकृत्॥ यथा॥ विंदन् विद्यादीपिकां स्वस्य रूपं बुद्धासद्यः सत्यविज्ञानरूपं। निः
प्रत्यूहस्तत्परं ब्रह्ममूर्तं सांद्रानंदाकारमन्वेषयामि॥ मोहध्वंसतः। बोधो मोहक्षयाच्छब्दगंधस्प
र्शरसैर्दृशेः। दृगुन्मीलनरोमांचधरो स्थानादिकृद्भवेत्॥ तत्र शब्देन यथा। प्रथमदर्शनरूढ
सुखावलीकवलितेंद्रियवृत्तिरनूदितं। अथ निदः किल नाम्नुदितेश्रुतो ललितयोदमिमील्लदिलाक्षि
णी॥ गंधेन यथा॥ अचिरमध्यदूरेण त्यागतः स्वसनगात्रीवनत्नुविशवलांगी शांतनिश्वासवृत्तिः प्रस
रति वनमालासौरभेण प्रशपराधा पुलकिततनुरेषा पांशुपुंजादुदस्थात्॥ स्पर्शेन यथा॥ असो पाणिस्य

श्रृ३

२१

कस्यविज्जयीविशीर्यंत्याः सौरीपुलिनवनमालोक्यममयः दुरंतामुद्धूयप्रस

रोमिश्चमस्तारणः कस्यविज्जयीविशीर्यंत्याः सौरीपुलिनवनमालोक्यममयः दुरंतामुद्धूयप्रस
नमन्तितोवैशासमयीद्रुतंमूर्छामंतः सरिवमुखमयीपल्लवयति॥ रसेनयथा॥ अंतर्दितेत्वयिवला
मुग्धरासकेलोसस्तांगयष्टिरजनिसखीविसंज्ञा॥ तांबूलचर्वितमवाप्यतवांबुजाक्षीन्यस्तंमया
मुखपुटेपुलकोद्गमलासीत्॥ निद्राध्वंसतः॥ वोधोनिद्राक्षयाःस्वप्ननिद्रापूर्तिस्वनादिभिः॥ तत्राद्यम
र्दनंशय्यामोक्षांगवलनाद्यः॥ तत्रस्वप्नेनयथा॥ इयंतेहासश्रीर्विरमतुविमुंचांचलमिर्दनयावद्दृ
द्धायेस्फुटमभिदधेत्वच्चटुलतां॥ इतिस्वप्नेजल्पंत्यचिरमवबुद्धागुरुमसौपुरोदृष्ट्वागौरीनमित
मुखविंबामुकुरस्भूत्॥ निद्रापूर्त्यायथा॥ दूतीचागात्तथोदागारंजजागारचराधिका॥ तूर्णंपुण्यवती
नांहितनोतिफलमुद्यमः॥ स्वनेनयथा॥ दूराद्विद्रावयन्निद्रामरालीर्गोपसुभ्रुवां॥ सारंगरंगदरे
जेवेणुर्विणुवारिदगर्जितैः॥ इतिभावास्त्रयस्त्रिंशत्कथिताव्यभिचारिणः॥ श्रेष्ठमध्यकनिष्ठेषुव
र्णनीयायथोचितं॥ मात्सर्योद्वेगदंभेर्ष्याविवेकोनिर्णयस्तथा॥ क्लैव्यंक्षमाचकुतुकमुत्कंठाविनयो
पिच॥ संशयोधार्ष्ट्यमित्याद्यान्यथाभावायेचस्युः॥ ... च॥ उक्तेष्वेवांतर्भवंतीतिनपृथक्त्वेनदर्शि॥

पीरसा०

श्री०

५८

ता॰ तथा॥ हि। असूयायां तु मात्सर्ये त्रासे प्युद्वेग एव तु। दैन्यं स्तथावहित्थायामीर्ष्यामर्षे मतावुभौ॥ विवे-
को निर्णयश्च मोदैन्ये ल्लज्जैवं क्लमाधृतौ। औत्सुक्ये कुतुके कंठे लज्जायां विनयस्तथा। संशयोंतर्निवेत्तर्के
तथाधाष्ट्यं विचापले॥ एषां संचारिभावानां मध्ये कश्चन कस्यचित्। विभावश्चानुभावश्च निर्वेदत्र परस्प-
र॥ निर्वेदे तु यथेर्ष्यायान्निर्वेदत्र विभावता। असूयायां पुनस्तस्याव्यक्तमुक्तानुभावता॥ औत्सुक्ये प्रतिवि-
तायाः कथितात्रानुभावता॥ निद्रां प्रति विभावत्वमेवं ज्ञेयाः परे ध्वमी॥ एषां च सात्विकानां च तथानाना-
क्रियाततेः। कार्यकारणभावस्तु ज्ञेयः प्रायेण लोकतः॥ निंदायास्तु विभावत्वं वैवर्ण्यामर्षयोर्मतं। अ-
सूयायां पुनस्तस्याः कथितैवानुभावता॥ साक्षाद्रतेर्न संबंधः षाड्गिस्त्रासादिभिः सह। स्यात्परं परया
किं तु लीलानुगुणता कृते। वितर्कमतिनिर्वेदधृतीनां स्मृतिहर्षयोः। बोधस्ति दैन्य सुप्तीनां कचिद्रति
विभावता। परतंत्राः स्वतंत्राश्चेत्युक्ताः संचारिणो द्विधा। तत्र परतंत्राः वरावरतया प्रोक्ताः परतंत्रा
अपि द्विधा॥ तत्र वरः साक्षाद्व्यवहितश्चेति वरोप्येष द्विधोदितः॥ तत्र साक्षात्॥ मुख्यामेव रतिं पु-
ष्णन् साक्षादित्यभिधीयते॥ यथा। तनूरुहालीव तनुश्च नृत्यं तनोति मे नाम निशाम्य यस्य। अप

५ शृंगारस्य विभावत्वं सम्भोद ... योप्रति। ... भावत्वमेवं ज्ञेयाः परे पि च॥ ॥ त्रासनिद्रा। श्रमा-

भ॰ रसा॰

ऽपतो माथुरमंडलं तद्यार्थेन किं दृतद्दृशोर्द्वयेन। साक्षादेष निर्वेदः॥ अथ व्यवहितः॥ पुष्णाति यो रतिं
गौणीं स तु व्यवहितो मतः॥ यथा॥ धिगस्तु मे भुजद्वंद्वं भीमस्य परिघोपमं। माधवाक्षेपिणं दुष्टं यत् पिन
ष्टि न चेदिपं। निर्वेदः क्रोधवश्यत्वादयं व्यवहितो रतेः॥ अथावरः॥ रसद्वयस्याप्यंगत्वमगछन्नवरो मतः॥
।यथा॥ लेलिह्यमाने वदनैर्ज्वलद्भिर्जगदंति दंष्ट्रास्फुटदुत्तमांगे॥ अवेक्ष्य कृष्णे धृतविश्वरूपे न स्वं विशुष्य
न् स्मरति स्म जिष्णुः॥ घोरक्रियाद्यनुभवादाख्याद्यसत्वां रतिं। दुर्वारा विरजृंभीतिर्मोहोयं भीवशास्ततः॥
॥अथ स्वतंत्राः॥ सदैव पारतंत्र्येपि कक्षविदेषां स्वतंत्रता। नृपाल सेवकस्येव प्रवृत्तस्य करग्रहे॥ भावज्ञैर
तिशून्याश्च रत्यनुस्पर्शनस्तथा। रतिगंधश्च ते त्रेधा स्वतंत्राः परिकीर्तिताः॥ रतिशून्याः॥ जनेषु रतिशू
न्येषु रतिशून्यो भवेदसौ॥ यथा श्रीदत्तामे॥ धिग्जन्म नस्त्रिवृद्यत्तद्धिग्व्रतं धिग्बहुज्ञतां। धिक्कुलं॥
धिक्क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे॥ अत्र स्वतंत्रो निर्वेदः॥ रत्यनुस्पर्शनः॥ यः स्वतो रतिगंधेन
विहीनोपि प्रसंगतः। पश्चाद्रतिं स्पृशेदेष रत्यनुस्पर्शनो मतः॥ यथा॥ गरिष्ठारिष्टटंकारैर्विधुरा वधि
रायिता। हा कृष्ण पाहि पाहीति चुक्रोशाभीरबालिका॥ अत्र त्रासः॥ रतिगंधिः॥ यः स्वातंत्र्येपि तद्भावधर

तिगंधिर्व्यनक्ति सः॥ यथा॥ पीतांशुकं परिचिनोमि धृतां त्वयांगे संगोपनाय न हि न प्रिविधे हियन्नं॥ इत्यार्य
यानिगदितान मितोत्तमांगाराधावगुंठितः मुखीत संतदासीत्॥ अत्र लज्जा॥ आभासः पुनरेतेषा
मस्थाने वृत्तितो न वेत्॥ प्रातिकूल्यमनौचित्यमस्थानत्वं द्विधोदितं॥ तत्र प्रातिकूल्ये॥ विपक्षे वृत्ति
रेतेषां प्रातिकूल्यमितीर्यते॥ यथा॥ गोपोऽयमप्यशिक्षितरणो पितमश्व दैत्यं हंति स्म हंत मम मञ्जी
वितनिर्विण्णोऽयं॥ क्रीडाविनिर्जितसुराधिपतेरलं मे हुङ्की वितेन हतकंसनराधिपस्य॥ अत्र निर्वेद
स्याभासः॥ यथा वा॥ डुंडुत्नोऽजलचरः स कालियो गोष्टभूर्हृदं पिलोष्टसोदरः॥ तत्र कर्मकिमिवा
द्भुतं जनेयेन भूर्खवज्जगद्दी त्रातापते॥ अत्रासूयायाः॥ अथानौचित्यं॥ असत्यत्वमयोग्यत्वमनौ
चित्यं द्विधा न वेत्॥ अप्राणिनिन्नवेदादौ तिर्यगादिषु चांतिमे॥ तत्राप्राणिनि यथा॥ छायान यस्य
सकृदप्युपसेवितान्भूत् तत्कुलेन हतममतस्य धिगस्तु जन्म॥ मार्त्वकदंवविधुरोत्नवकालियाहि
मृद्नन् करिष्यति हरिश्चरितार्थतां ते॥ अत्र निर्वेदस्य॥ तिरश्चि यथा॥ अधिरोहतु कः पक्षीकलाम
परोऽममाद्यमे ध्वस्य॥ हित्वापि तार्क्ष्य पक्षं भजते पक्षं हरिर्यस्य॥ अत्र गर्वस्य॥ वहमान श्चापि

सदाज्ञानविज्ञानमाधुरीकदंबादिषुसामान्यदृष्ट्याभासत्वमुच्यते॥ भावानांक्वचिदुत्पत्तिसंधिशा
बल्यशांतयः॥ दशाश्चतस्रएतासामुत्पत्तिर्भावसंभवः॥ यथा॥ मंडलेकिमपिचंडमरीचेर्लोहिता
यतिनिशाम्ययशोदा॥ वेणवीध्वनिधुरामविदूरेप्रस्नवस्तिमितकंचुलिकासीत्॥ अत्रहर्षोत्पत्तिः
॥ यथावा॥ त्वयिरहसिमिलंत्यांसंभ्रमन्यासभुग्नाप्युषसिसखितवालीमेखलापश्यनाति॥ इति॥
विवृतरहस्यमाधवेकुंचितभ्रूर्दृशमन्तकुकिरंतीराधिकावःपुनातु॥ अत्रासूयोत्पत्तिः॥ अथ
संधिः॥ सरूपयोर्भिन्नयोर्वासंधिःस्याद्भावयोर्युतिः॥ तत्रसरूपयोःसंधिः॥ संधिःसरूपयोस्त
त्रभिन्नहेतूत्थयोर्मतः॥ यथा॥ राक्षसींनिशिनिशाम्यनिशांतेगोकुलेश्वरगृहाणीपतितांगीं॥ तकु
चोपरिसुतंचहसंतंदृत्तनिश्चलतनुःक्षणमासीत्॥ अत्रानिष्टेष्टसंवीक्षाकृतयोर्जाड्ययोर्युतिः॥
अथभिन्नयोः॥ भिन्नयोर्हेतुनैकेनभिन्नेनाप्युपजातयोः॥ तत्रैकहेतुजयोर्यथा॥ दुर्वारश्चापलोयं
धावन्नंतर्वहिश्चगोष्ठस्य॥ शिशुर्कुतश्छिद्रीतिधिनोतिहृदयंदुनोतिचमे॥ अत्रहर्षशंकयोः॥ भि
न्नहेतुजयोर्यथा॥ विलसंतमवेक्ष्यदेवकीसुतमुत्फुल्लविलोचनंपुरः॥ प्रबलामपिमल्लमंडली

हि मम मुग्धं च जलं हृशोर्द्दध्ये ॥ अत्र हर्षविषादयोः संधिः ॥ अथ शावल्यं ॥ शवलत्वं तु भावानां संमर्दः स्यात्परस्परं ॥ यथा ॥ शक्तः किं नाम कर्त्तुं स शिशुरहः मे मित्र पक्षान्धात्रीदाति ष्टेयं तमेव द्रुतमथ शरणं कुर्युरेतन्न वीराः आं द्विव्यामल्ल गोष्ठी विहर ति स करे णोद्दधाराद्रिवर्यं कुर्यामिद्धे वगा ॥ त्वाव्रजं नु विकर्दनं हात तः कंपते धीः ॥ अत्र गर्वविषाददैन्यमतिस्मृतिशंकामर्षत्रासानां शावल्यं ॥ यथा वा ॥ धिग्दीर्घे नयने मम स्तु मधुरा याभ्यां न सा प्रेक्ष्यते विद्धे यं मयि किंकरीकृतनृपा कालो हि सर्वंकषः ॥ लक्ष्मीकेलिगृहं गृहं मम हहा नित्यं तनुः क्षीयते स क्षन्ये वद हरिं त्र जेयज्जु दयं वृंदाटवी कर्षति ॥ अत्र निर्वेदगर्वशंकाधृतिविषादमत्यौत्सुक्यानां शावल्यं ॥ अथ शांतिः ॥ अत्यारूढस्य भावस्य विलयः शांतिरुच्यते ॥ यथा ॥ विधुरितवदना विदूनना सस्तमघहनं गहने गवेषयंतः ॥ मुरलिकलमथाकलय्य शैले व्रजशिशवः पुलकोद्गलावभूवुः ॥ अत्र विषादशांतिः ॥ शब्दार्थरसवैचित्री वाचिका च न नास्ति मे ॥ यथा कथं चिदेवोक्ता भावोदाहरणी परं ॥ त्रयस्त्रिंशदिमे ष्टो चव क्ष्यंते स्थायिनश्च ॥ मैत्र ये मुख्यभावा स्त्रिधा स्त्वेक चत्वारिंशदमी स्मृताः ॥ शरीरेंद्रियवर्गस्य विकाराणां विधायि

श्रीरसा॰

काः भावा विभावजनिताः चित्तवृत्तय ईरिताः॥ क्वचित्स्थायिको भावः कश्चिदागन्तुकः क्वचित्॥ य
स्तु स्थायिको भावः स व्याप्यान्तर्बहिः स्थितः॥ मञ्जिष्ठाद्यो यथा द्रव्ये रागस्तन्मय ईक्ष्यते। अत्र स्थायिभा
वमात्रेण विभावस्य विभावता। एतेन सहजेनैव भावेनानुगता रतिः॥ एकरूपापि यानेके विविधा
प्रतिभात्यसौ। आगन्तुकस्तु यो भावः पटादौ रक्तिमेव सः॥ तैस्तैर्विभावैरेवायं धीयते दीप्यते पि च
॥ विभावनादिवैशिष्ट्याद्भक्तानां भेदतस्तथा॥ प्रायेण सर्वभावानां वैशिष्ट्यमुपजायते। विविधा
नां तु भक्तानां वैशिष्ट्याद्द्विविधं मनः॥ मनोनुसाराद्भावानां तारतम्यं किलोदये। चित्ते गरिष्ठे गम्भीरे म

श्री॰

हिष्टे कर्कशादिके। सम्यगुन्मीलिताश्चामी न लक्ष्यन्ते स्फुटं जनैः॥ चित्ते लघिष्ठे चोत्ताने क्षोदिष्ठे कोम
लादिके। मनागुन्मीलिताश्चामी लक्ष्यन्ते वहिरुल्वणाः॥ गरिष्ठं स्वर्णपिण्डाभं लघिष्ठं तूलपिण्डवत्।
॥ चित्तयुग्मेऽत्र विज्ञेया भावस्य पवनोपमा। गम्भीरं सिन्धुवच्चित्तमुत्तानं पल्वलादिवत्॥ चित्तद्वये
त्र भावस्य महाद्रिशिखरोपमा। पत्तनाभं महिष्ठं स्यात् क्षोदिष्ठं तु कुटीरवत्। चित्तयुग्मेऽत्र भावस्य
दीपेनेभेन वोपमा। कर्कशं त्रिविधं प्रोक्तं वज्रं स्वर्णं तथा जतु। चित्तत्रयेऽत्र भावस्य ज्ञेया वैश्वानरो

न
पमा। अत्यंतकठिनं वज्रमकुंठन मार्दवी॥ ईदृशां तापसादीनां चित्तं तावदवेक्ष्यते। स्वर्णद्रवति भावा
ग्नेस्तापेनातिगरीयसा। न तु द्रवत्वमायाति तापलेशेन सर्वतः कोमलं चित्तमिष्टं वो त्तमदनं नव
नीतकं। अमृतं चेति भावोऽत्र प्रायः सूर्यातपायते। द्वैविदत्राद्ययुगलमात्ममेन यथायथं। द्रवीभू
तं स्वभावेन सर्वदैवामृतं भवेत्। गोविंदप्रेष्ठवर्याणां चित्तं स्यादमृतं किल। कृष्णभक्तविशेषस्य
गरिष्ठत्वादिभिर्गुणैः समवेतं सदामीभिर्द्धित्रैरपि मनो भवेत्। किंतु सुष्ठु महिष्ठत्वं भावो गाढमु
पागतः सर्वप्रकारमेवेदं चित्तं विक्षोभयत्यलं॥ यथा केलिकौमुद्यां। गभीरोप्यश्रांतं दुरधिगमपा
रोपि नितरामहार्यां मर्यादां दधदपि हरेरास्पदमपि। स तां स्तोमः प्रेमण्युदयति समग्रे स्थगयितुं॥
विकारं न स्फारं जलनिधिरिवेंदौ प्रभवति॥ ॥इति श्रीभक्तिरसामृतसिंधौ दक्षिणविभागे भ
क्तिरससामान्यनिरूपणे व्यभिचारिलहरी॥ ॥श्री॥ ॥अथ स्थायी॥ अविरुद्धान् विरुद्धांश्च
भावान्यो वशतां नयन्॥ सुराजेव विराजेत स स्थायी भाव उच्यते॥ स्थायी भावोऽत्र संप्रोक्तः श्री
कृष्णविषया रतिः। मुख्या गौणी च सा द्वेधा रसज्ञैः परिकीर्तिता॥ तत्र मुख्या॥ सत्वशुद्धविशेषात्मा

(गन्न ५)

रतिमुख्येतिकीर्त्तिता।मुख्यापि द्विविधा स्वार्था परार्थ्या चेति कीर्त्यते॥तत्र स्वार्था।अविरुद्धैः स्फुटं भावैः
पुष्णात्यात्मानमेव या।विरुद्धैर्दुःशाकम्लानिः सा स्वार्था कथिता रतिः॥अथ परार्था।अविरुद्धं विरुद्धं च सं
कुर्वती स्वयं रतिः।या भावमनुगृह्णाति सा परार्था निगद्यते॥शुद्धा प्रीतिस्तथा सख्यं वात्सल्यं प्रियतेत्य
सौ।मुख्या त्र पंचधा सत्कपांचविध्यादुदीरिता।वैशिष्ट्यं पात्रवैशिष्ट्याद्रतिरेषोपगच्छति।यथार्कः प्रति
विंवाभ्मास्फटिकादिषु वस्तुषु॥शुद्धा।सामान्या सा तथा स्वच्छा शांतिश्चेत्यादिमा त्रिधा।एषां गर्कपू
ता नेत्रमीलनोन्मीलनादिकृत्॥तत्र सामान्या।कंचिद्विशेषमप्राप्ता साधारणजनस्य या।वालिका
देश्च कृष्णे स्यात्सा सामान्या सा रतिर्मता॥यथा।अस्मिन्मधुरावीथ्यामुदयति मथुरे विरोचने पुरतः।कथ
य सखे मन्ददिमानि मानसमदनं किमेति मम।यथा वा।वालिकेयं त्रिवर्षीया वर्षीयांसि समीक्ष्यतां।या पुरः कृ
ष्णमालोक्य हुंकुर्वत्यभिधावति॥स्वच्छा।तत्तत्साधनतो नानाविधभक्तप्रसंगतः।साधकानां तु वैविध्यं
यांती स्वच्छा रतिर्मता॥यदा यादृशि भक्ते स्यादासक्तिस्तादृशी तदा।रूपं स्फटिकवद्धत्ते स्वच्छा सोते
न कीर्त्तिता॥यथा।क्वचित्प्रभुरिति स्तुवन् क्वचन मित्रमित्युद्धसन् क्वचित्तनय इत्यवन् क्वचन कांत इ

स्वपरार्थे विस्ता मुख्या पुनर्पंचविधा भवेत्।

पृ५

कलाविलासवसतिश्चित्रं हरिः क्रीडति ॥ चतु[illegible]म ॥ चतुरो युगपद्भ्य स्वार्था । अविरुद्धैः स्फुटं भावैः
थ परार्था । अविरुद्धं विरुद्धं च सं
पारावती विरचनेन गवां कलापं गोपांगना[illegible]पांगतरंगितेन ॥ । तिस्तथा सर्वं वाऽल्पं प्रियते त्य
धिन्वन्नरिष्टजयदेन हरिर्विरेजे ॥ द्व्यक्षः ॥ १६ [illegible]रेकद्विप्रकारीय ध्याद्वृतिरेषोपगच्छति । यथार्कः प्रति
। यानि बोधैः प्रयुक्तानि शास्त्राक्षराणि कुरूद्व[illegible]रिस्तान्य छिन्नशांतिश्चेत्यादि मात्रिधा । एषां गर्कपू
। अघहर कुरु यं गमीत्नूयन्तं त्यं मयैव त्वमिति निखिलगोपीजमप्राप्तासाधारणजनस्पया । वालिका
लाघवोर्मिं तथा सौदङ्गुरधिकमेता स्त्वं यथास्वस्व पार्श्वे ॥ ध्यामुदयति मथधुरे विरोचने पुरतः । कथ
सेवादिकर्मणां ॥ यथा महाभारते ॥ आगमेतत्प्रवृद्धं मे त्वं त्रिवर्षीया वर्षीयासि समीक्ष्यतां । या पुरः कृ
ष्णामांद्गरवासिनं ॥ यथा वा । अनुगतिमतिपूर्वं चिंतया ॥ नाविध नक्त प्रसंगतः । साधकानां तु वै निर्धा
न्यां । कथमपि कृतमल्पं विस्मरेन्नैव साधुः किमुत स[illegible]ं सादृशी तदा । रूपं स्फटिकवच्छन्ने स्वच्छा सो ते
तिज्ञानियमोयस्यसत्यो सः सुदृढव्रतः ॥ तत्र सत्यप्र । मित्युद्धसन्नूक्कवित्तनय इत्यवनूक्कचनकांतङ्
नवासुरा नैव चयक्षपन्नगाः ॥ मम प्रतिज्ञामपहंतु

६२

श्रीरसा०

खलमाखंडलपांडुपुत्रौ विधायकंसारिरपारि ज्ञातो । चेतिकीर्त्यति ॥ तत्र स्वार्था । अविरुद्धैः स्फुटंभावैः
ख्यामकार्षीत् ॥ सत्यनियमो यथा ॥ गिरेरुद्धरणं कृष्ण थितारतिः ॥ अथ परार्था । अविरुद्धं विरुद्धं वसं
तं विद्वतं त्वया ॥ देशकालसुपात्रज्ञः ॥ २० ॥ देशकालज्ञते ॥ शुद्धा प्रीतिस्तथा सर्वा वा स्नेलं प्रियते त्य
स्त्रीतुल्यः कथमपि परोनास्तिसमयस्त्रिलोक्यामाक्रीडत्रवैशिष्ट्याद्गतिरेषोपगच्छति । यथार्कः प्रति
क्षीव्रजयुवतिकल्येति विस्मरन्मनो मेसोकंठं मुकुरज्ञ विच्छाशांतिश्चेत्यादिमात्रिधा । एषांगर्कप्र
सारिकर्मायः शास्त्रचक्षुः सकथ्यते ॥ यथा ॥ अनूकं सरिपो षमप्राप्ता साधारणजनस्पृया । वालिका
हृदोन्मादायकेवलं ॥ शुचिः ॥ २१ ॥ पावनश्च विशुद्धश्चेत्युच्यतामुदयति मथधुरेविरोचनेपुरतः कथ
द्विशुद्धस्येत्यक्रूदूषणः ॥ तत्र पावनः तं निर्व्याजं नजगुणनिधीयावर्षीयासि समीक्ष्यतां । यापुरः कृ
तितरामुत्तमश्लोकमौलिं । त्र घनूसद्यः करणमुकुरे हतयन्नामसंतक्कप्रसंगतः साधकानांतु वै निधौ
ध्वांतधारां ॥ विशुद्धो यथा । कपटं चहठं च नाच्युतेवत सत्राजितिना रूपंस्फटिकवद्यत्ते स्वच्छा सौते
प्रसन्नं कौस्तुभसख्यामिच्छसि ॥ वशी ॥ २२ ॥ वशी जितेंद्रियः प्रोक्तः ॥ यस्त्वेनयदत्पवनूक्कचनकांतइ

श्री०

६२

रोमि॥ यथा वा। सुतमंगुलिभिः स्तुतस्तनं। चिबुकाग्रे दधती दयार्द्रधीः। समलालयदालयात्पुरः स्थिति

मार्गे व्रजराजगेहिनी॥ अथ प्रियता। मिथो दृढेर्मृगाक्ष्याः सं भोगस्यादिकारणं। मधुरापरपर्याया प्रि

यताख्योदिता रतिः॥ अस्यां कटाक्षभ्रूक्षेपप्रियवाणी स्मितादयः। यथा गोविंदविलासे॥ चिरमुत्कंठि

तमनसो राधामुरवैरिणोः कोपि। निभृतनिरीक्षणजन्मा प्रत्याशापल्लवो जयति॥ यथोत्तरमसौ स्वाद

विशेषोल्लासमय्यपि। रतिर्वासिनया स्वाद्वीनास ते कापि कस्यचित्॥ अथ गौणी॥ विभावोत्कर्षजो भा

व विशेषो यो नु गृह्यते। संकुचंत्या स्वयं रत्या स गौणी रतिरुच्यते। हासो विस्मय उत्साहः शोकः क्रो॥

धो भयं तथा। जुगुप्सा चेत्यसौ भाव विशेषः सप्तधोदितः॥ अपि कृष्णविभावत्वमाद्यषट्कस्य संभवेत्

। स्याद्द्वेष्यादि विभावत्वं सप्तमस्यास्तु रतेर्वशात्॥ हासादावत्र भिन्नेपि शुद्ध सत्व विशेषतः। परार्थीयार

तेर्योगाद्रतिशब्दः प्रयुज्यते। हासोत्तरा रतिर्या स्यात्सा हासरतिरुच्यते। एवं विस्मयरत्याद्या विज्ञेया

रतयश्च षट्॥ कंचित्कालं क्वचिद्भक्ते हासाद्याः स्थायितामभी। रत्या वारुह्यतायांति तत्तल्लीलाद्यनुसार

तः॥ तस्मादनियताधाराः सप्त सामयिका इमे। सहजा अपि लीयंते बलिष्ठेन तिरस्कृताः। काप्यव्य

रसा०

निचरंतीसास्वाधारान् स्वस्वरूपतः॥ रतिरात्यंतिकस्थायीभावो न क्वजने:खिले। स्फुरेतस्या विनाभा
वाभावाः सर्वे निरर्थकाः॥ विपन्नादिषु यांतोपि क्रोधाद्याः स्थायितां सदा। तन्नं तेरतिशून्यत्वान्न नक्ति
रसयोग्यता॥ अविरुद्धैरपि स्पृष्टा भावैः संचारिणः खिलाः। निर्वेदाद्या विलीयंते नार्हंति स्थायितां त
तः॥ इत्यतो मतिगर्वादिभावानां घटते न हि। स्थायिता केश्चिदिष्टापि प्रमाणं तत्र तद्विदः॥ सन्न र
हास्यादयस्त्वेते तैस्तैर्नीताः सुपुष्टतां। नक्तेषु स्थायितां यांतो रसविमेभ्यो वितन्वते॥ तथा चोक्तं॥ अ

श्री०

ष्टानामेव भावानां संस्कारा धायिता मता। तत्तिरस्कृतसंस्काराः परे न स्थायितोचिताः॥ तत्र हास
रतिः॥ चेतोविकासो हासः स्याद्वाग्वेषेहादिवैकृतात्। सद्दृग्विकासनासौष्ठकपोलस्पंदनादिकृत्॥ कृ
ष्णसंबंधिचेष्टोत्थः स्वयं संकुचदात्मना। रत्यानुगृह्यमाणोयं हासो हासरतिर्भवेत्॥ यथा॥ मयाद्य
गपिनार्पिता जरतिदद्धितुभ्यं शापेव धूस्तव निरर्गला तदपि मे मुखं जिघ्रति। प्रशाधि तदिमां मु
धाछलितसाधु मित्यच्युते वदत्य जनि दूतिका हसितरोधने न क्षमा॥ अथ विस्मयरतिः॥ लोको
त्तरार्थवीक्ष्यादेर्विस्मयश्चित्तविस्तृतिः। अत्र स्यान्नेत्रविस्तारसोक्तिपुलकादयः। पूर्वोक्तरीत्या नि

६४

64

५१

ष्पन्नःसविस्मयरतिर्भवेत्॥यथा।गवांगोपालानामपिशिशुगणःपीतवसनोलसच्छ्रीवत्सांकःपृथु
भुजचतुष्कैर्धृतरुचिः।कृतस्तोत्रारंभःसविधिभिरजांडालिभिरलंपरब्रह्मोल्लासान्वहतिकिमिदं
हंतकिमिदं॥अथोत्साहरतिः॥स्थेयसीसाधुभिःश्लाघ्यफलेस्वाभीष्टकर्मणि।स्वसत्वरामानसा
सक्तिरुत्साहइतिकीर्त्यते।कालानवेक्षणंधैर्यंतत्रत्यागोद्यमादयः।सिद्धःपूर्वोक्तविधिनासउ
त्साहरतिर्भवेत्॥यथा।कालिंदीतटमनुविपत्रशृंगर्वंशीनिक्वाणैरिहमुखरीकृतांबरायां।वि
स्फूर्जन्नघदमनेनयोद्धुकामःश्रीदामापरिकरमुद्भटंबबंध॥अथशोकरतिः॥शोकस्त्विष्ट
वियोगाद्यैश्चित्तक्लेशभरःस्मृतः।विलापपातनिःश्वासमुखशोषभ्रमादिकृत्॥पूर्वोक्त
विधिनैवायंसिद्धःशोकरतिर्भवेत्॥यथाश्रीदशमे॥रुदितमनुनिशम्यतत्रगोप्यो
भृशमनुरक्तधियोश्रुपूर्णमुख्यः।रुरुदुरनुपलभ्यनंदसूनुंपवनउपारतपांशुवर्ष
वेगो॥अवलोक्यफणींद्रयंत्रितंतनयंप्राणसहस्रवल्लभं।हृदयंनविदीर्यतेद्विधाधिगिमांमर्त्यतनोःकठोर
तां॥अथक्रोधरतिः॥प्रातिकूल्यादिभिश्चित्तज्वलनंक्रोधईर्यते।पारुष्यभ्रूकुटीनेत्रलौहित्यादिविकारकृत्॥

प्रथाना २

रसा०

एतंपूर्वोक्तवत्सिद्धंविदुःक्रोधरतिंवुधाः।द्विधासौकृष्णतद्वैरिविभावत्वेनकीर्त्तिता॥तत्रकृष्णविभावायथा
॥कंठसीमनिहरेर्द्युतिभाजंराधिकामणिसरंपरिचित्य।तंचिरेणजटिलाविकटभ्रूभंगभीमतरदृष्टिद
दर्श॥तद्वैरिविभावा।यथा।अथकंससहोदरोग्रदावेहरिमभ्युद्यतितीव्रहेतिजाङ्गि।रत्नसादलिकांवरे
प्रलंवद्विषतोभूभृद्भ्रुकुटीपयोदलेखा॥अथभयरतिः॥भयंविभातिवांचल्यंमंतुघोरेक्षणादिभिः।आत्म
गोपनकृच्छोषविद्रवभ्रमणादिकृत्।निष्पन्नंपूर्ववदिदंवुधाभयरतिंविदुः।एषापिक्रोधरतिवद्द्विविधा

श्री०

कथितावुधैः॥तत्रकृष्णविभावायथा॥याचितःपटिमत्तिःस्वमंतकं।शौरिणासदसिगांदिनीसुतः।व
स्त्रगूढमणिरेषमूढधीस्तत्रशुष्यदधरःक्ष्मांययौ॥दुष्टविभावायथा॥भैरवंरुवतिहंतगोकुलद्वारिवा
रिदनिभेवृषासुरे।पुत्रगुप्तिधृतयत्नवैभवाकंप्रमूर्त्तिरभवद्व्रजेश्वरी॥अथजुगुप्सारतिः॥जुगुप्सास्यादहृ
द्यानुभावच्छिन्ननिमीलनैः।तत्रनिष्ठीवनंवक्त्रकूणनंकुत्सनादयः।रतेरनुग्रहाज्जातासाजुगुप्सारतिर्म
ता॥यथा।यदवधिममचेतःकृष्णपादारविंदेनवनवरसधामन्युद्यतंरंतुमासीत्।तदवधिवतनारीसंगमे
स्मर्यमाणेभवतिमुखविकारःसुष्ठुनिष्ठीवनंच॥रतिर्वाप्रथमैकैवसप्तहास्यादयस्तथा।इत्यष्टौस्थायिनो

यावद्रसावस्थांनसंश्रिताभवेत्स्वतंत्रास्त्रयस्त्रिंशद्भवेयुर्व्यभिचारिणः। इत्यष्टौसात्त्विकाश्चैते भावाख्यास्तान
संख्यकाः॥ कृष्णान्वयाद्गुणातीतप्रौढानंदमयाअपि। भांतामीत्रिगुणोत्पन्नसुखदुःखमयाइव। तत्रस्फुरं॥
तीकृष्णबोधोत्साहाद्याःसात्त्विकाइव। तथाराजसवज्जर्वहर्षसुप्तिहसादयः। विषाददीनतामोहशोकाद्या
स्तामसाइव। प्रायःसुखमयाःशीताउष्णादुःखमयाइह। चित्रेयंपरमानंदसांद्राप्युष्णारतिर्मता। शीतैर्नवि
वर्लिष्टैस्तुपुष्टाशीतायतेह्यसौ। उष्णैस्तुरतिरत्युष्णातापयंतीवभासते। विप्रलंभेततोदुःखजनतास्यकदुच्य
ते॥ रतिर्द्विधापिकृष्णाद्यैःश्रुतैरवगतैःस्मृतैः। तैर्विभावादितांयद्भिस्तद्भक्तेषुरसोभवेत्॥ यथादध्यादिकं
द्रव्यंशर्करामरिचादिभिः। सुष्ठुयुक्तिविशेषेणखांडवाख्योरसोभवेत्। तदत्रसर्वथासाक्षात्कृष्णाद्यनुभ
रस्य ४ वाद्भुतः। प्रौढानंदचमत्कारोभक्तैःकोप्यनुभूयते। सरत्यादिविभावाद्यैरेकीभावमयोपिसन्। ज्ञप्ततत्त
द्विशेषश्चतत्तद्भेदतोभवेत्॥ तथाचोक्तं। प्रतीयमानाःप्रथमंविभावाद्यास्तुभागशः। गच्छंतोरसरूपत्वं॥
मिलितायांत्यखंडतां॥ यथामरिचखंडादेरेकीभावेपिपानके। उद्भासःकस्यचित्क्वापिविभावादेस्तथारसे
इति। रतेःकारणभूतायेकृष्णकृष्णप्रियादयः। स्तंभाद्याःकार्यभूताश्चनिर्वेदाद्याःसहायकाः। हित्वाका

संयोजनविशेषेणरसालाख्योरसोभवेत् । १५

श्रीरसा०

रागकार्यादिशब्दवाच्यत्वमत्रतो। रसोद्बोधे विभावादिव्यपदेशमवाप्नुयुः॥ रतेस्तुर्नंनदास्वादविशेषायाति
योग्यतां। विभावयंति कुर्वंतीत्युक्ता धीरैर्विभावकाः॥ तां चानुभावयंतीति तत्त्वं त्वास्वादनिर्भरां। इत्युक्तास्त्वनु-
भावास्ते कटाक्षाद्याः ससात्त्विकाः॥ संचारयंति वैचित्रीं नयंते तां तथाविधां। ये निर्वेदादयो भावास्ते तु संचा-
रिणो मताः॥ एतेषां तु तथाभावे भगवत्काव्यनाट्ययोः॥ सेवामाहुः परं हेतुं केचित्तत्पक्षरागिणः॥ किंतु तत्र
सुदुस्तर्कमाधुर्याद्भुतसंपदः॥ रतेरस्याः प्रभावोयं भवेत्कारणमुत्तमं। महाशक्तिविलासात्मा भावोऽचिंत्य-
स्वरूपभाक्। रत्याख्य इत्ययं युक्तो नहि तर्केण बाधितुं। तथा प्राक्तनैरप्युक्तं। प्रकृतिभ्यः परं यच्च तदचिंत-

श्री०

स्य लक्षणं। अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत्। विभावतादीनानीय कृष्णादीन्मंजुला रतिः॥ ए-
तैरेव तथाभूतैः स्वस्य वर्द्धयति स्फुटं॥ यथा स्वैरेव सलिलैः परिपूर्य बलाहकान्। रत्नालयो भवत्येभि-
र्वृष्टैस्तैरेव वारिधिः॥ नवेरत्वं कुरंजाते हरिभक्तस्य कस्यचित्। विभावत्वादिहेतुत्वं किंचित्तत्काव्यनाट्य-
योः॥ हरेरीषच्छ्रुतिविधौ रसास्वादः सतां भवेत्। रतेरेव प्रभावोयं हेतुस्तेषां तथा कृतौ। माधुर्याद्याश्रय-
त्वेन कृष्णादींस्तनुते रतिः॥ तथानुभूयमानास्ते विस्तीर्णं कुर्वते रतिं॥ अतस्तस्य विभावादिचतुष्कस्य

([illegible])

तिंगताः॥ आत्मारामास्तदीयाध्ववद्धश्रद्धाश्च तापसाः॥ तत्रात्मारामाः॥ [illegible] रामास्तु सनकसनंदनमुखा मताः। प्राधान्यात्सनकादीनां रूपं भक्तिश्च कथ्यते॥ तत्र रूपं। तौ पंचषाब्दवालाजाश्च ॥ स्वारस्ते जसोज्वलाः। गौरांगावातरसनाः। प्रायेण सहचारिणः॥ भक्तिः समस्तगुणवर्जितकरणतः प्रतीचीनतांगते ऽ ति किमपि वस्तुनि स्वयमदीपितावत्सुखं। नयावदियमद्भुतानवतमालनीलद्युते मुकुंदसुखचिद्घना तव वभूव साक्षात्कृतिः॥ अत तापसाः॥ भक्तिर्मुक्तौ व निर्विघ्नेत्यात्तयुक्तविरक्तताः। अनुज्झितमुमुक्षा ये भजंते ते तु तापसाः॥ यथा। कदा शैलद्रोण्यां पृथुलविटपिक्रोडवसतिर्वसानः कौपीनं रचितफलकंदाशनरुचिः। हृदि ध्यायं ध्यायं मुहुरिह मुकुंदाभिधमहं चिदानंदं ज्योतिः क्षणमिव विनेष्यामि रजनीः। भक्तात्मारामकरुणाप्रपंचेनैव तापसाः। शांत्याख्यनावचंद्रस्य ह्रदाकाशे कलां श्रिताः॥ अथोद्दीपनाः॥ श्रुतिर्महोपनिषदां विविक्तस्थानसेवनं। अंतर्वृत्तिविशेषः स्फूर्तिस्तत्त्वविवेचनं॥ विद्याशक्तिप्रधानत्वं विश्वरूपप्रदर्शनं। ज्ञानिभक्तेन संसर्गो ब्रह्मसत्रादयस्तथा॥ एवमसाधारणाः प्रोक्ता बुधैरुद्दीपना अमी। तत्र महोपनिषच्छ्रुतिर्यथा॥ अलं कैशाकम

मधुपुर

श्रीरसा०

लत्तुवः प्रविश्य गोष्ठीकुर्वंतः श्रुतिशिरसां श्रुतिं श्रुतज्ञाः। तत्तुंगं यदुपुरसंगमायरंगं योगींद्राः पु
लकन्तो नवाप्य वायुः॥ पादाब्जतुलसीगंधः शंखनादो मुरद्विषः। पुण्यशैलः शुनारण्यं सिद्धक्षे
त्रं सुरापगा। विषयादिक्षयिष्णुत्वं कालस्याखिलहारिता। इत्याद्युद्दीपनाः साधारणास्तेषां किला॥
श्रितैः॥ तत्र पादाब्जतुलसीगंधो यथा। तृतीये॥ तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुल
सीमकरंदवायुः। अंतर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः॥ अथानुभा
वाः॥ नासाग्रन्यस्तनेत्रत्वमवधूतविचेष्टितं। युगमात्रेक्षितगतिर्ज्ञानमुद्राप्रदर्शनं॥ हरेर्द्विषत्यपिन
द्वेषो नातिभक्तिः प्रियास्वपि। सिद्धतायास्तथा जीवन्मुक्तेश्च बहुमानिता। नैरपेक्ष्यं निर्ममता निरहंका
रिता तथा। मौनमित्यादयः शीताः स्युरसाधारणाः क्रियाः॥ तत्र नासाग्रनयनत्वं यथा॥ नासिकाग्रदृ
गयं पुरो मुनिः स्तीदवंधुरशिरा विराजते। चित्तकंदरतटीमनाकुलामस्य नूनमवगाहते हरिः॥
जृंभागमो टनं भक्तेरूपदेशो हरेर्नतिः। स्तवादयश्च दासाद्यैः शीताः साधारणाः क्रियाः॥ तत्र जृंभा
यथा। हृदयांबरे ध्रुवं तेजावांबरमणिरुदेति योगींद्रा। यदिदं वदनांभोजं जृंभामवलंबते नवतः॥

श्री०

67

स्ते ३

अथसात्विकाः॥रोमांचस्वेदकंपाद्याःसात्विकाःप्रलयंविना॥तत्ररोमांचोयथा।पांचजन्यजनितोध्वनि
रंतःक्षोभयन्सपदिविद्धसमाधिः॥योगिनांगिरिगुहानिलयानांपुंजलेपुलकपालिमनैषीत्॥
एषांनिरस्तिमानानांशारीरादिषुयोगिनां।सात्विकास्तुद्भवंतेवनतुदीप्ताभवंत्यमी॥अथसंचारिणः
।संचारिणोत्रनिर्वेदोधृतिर्हर्षोमतिःस्मृतिः।विषादोत्सुकतावेगवितर्काद्याःप्रकीर्त्तिताः॥तत्रनिर्वे
दोयथा।अस्मिन्सुखघनमूर्त्तौपरमात्मनिवृत्तिपत्तनेस्फुरति।आत्मारामतयामेवृथागतोवतचिर
कालः॥अथस्थायी॥अत्रशांतिरतिःस्थायीसमासांद्राचसाद्विधा॥तत्राद्या॥समाधौयोगिनस्तस्मि
न्संप्रज्ञातनामनि।लीलयामयिलब्धेस्पवन्वोकंपिनीतनुः॥सांद्रायथा।सर्वाविद्याध्वंसतोयः
समंतादाविर्भूतोनिर्विकल्पेसमाधौ।जातेसाक्षाद्यादवेंद्रेपविंदन्‌ मयानंदःसांद्रतांकोटिधाऽ
सीत्॥शांतोद्विधैषपारोक्ष्यसा . क्षाकारविभेदतः।तत्रपारोक्ष्यंयथा।प्रयास्यतिमदुत्तपःसफ
लतांकिमष्टांगिकामुनीश्वरपुरातनीपरमयोगचर्याप्यसो।नराकृतिवरांवुदद्युतिधरंपरंव्रह्ममे
विलोचनचमत्कृतिंकथयकिंनुनिर्मास्यति॥यथावा।क्षेत्रेकुरोःकिमपिचंडकरोपरागेसांद्रंयदध्य

(मनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः।या।संप्रज्ञातनामासौसमाधिरभिसंधीयते ।५)

निविलोचनयोरयासीत् ।तन्नीरदद्युतिमहः स्मरकुत्सुकं मे न प्रत्यगात्मनि मनो रमते पुरेव ॥साक्षा-
कारो यथा ।परमात्मतयाति मेदुरान्नवसाक्षात्करणप्रमोदतः ।भगवन्नधिकं प्रयोजनं कतरद्ब्रह्मवि-
दोपि विद्यते ॥यथा वा ।कृष्टः कंबुपतिस्वनैर्नु विलुठन्नीरांचलः संचलन्मूर्द्धा रूढदृगश्रुभिः पु-
लकितो द्रागेष लीनव्रतः ।अक्ष्णोरंगनमंजनत्विषि परब्रह्मण्यवाप्ते मुदां मुद्राभिः प्रकटीकरोत्यव-
मतिं योगी स्वरूपस्थितो ॥भवेत्कदाचित्कुत्रापि नंदसूनोः कृपाभरः ।प्रथमं ज्ञाननिष्ठोपि सोत्रैव
रतिमुद्वहेत् ॥यथा विल्वमंगलस्तवे ॥अद्वैतवीथीपथिकैरुपास्याः स्वानंदसिंहासनलब्धदी-
क्षाः ।शठेन केनापि वयं हठेन दासीकृता गोपवधूविटेन ॥तत्कारुण्यप्रश्लथीभूतज्ञानसंस्कारसंत-
तिः एष भक्तिरसानंदनिपुणः स्याद्यथा शुकः ॥शमस्य निर्विकारत्वान्नाट्यज्ञैर्नैष मन्यते ।शांत्या-
ख्याया रतेरत्र स्वीकारान्न विरुध्यते ॥शमो मन्निष्ठता बुद्धेरिति श्रीभगवद्वचः ।तन्निष्ठा दुर्घटा बुद्धे-
रेतां शांतिरतिं विना ॥यथा श्रीविष्णुधर्मोत्तरे ।नास्ति यत्र सुखं दुःखं न द्वेषो न च मत्सरः ।समः स-
र्वेषु भूतेषु स शांतः प्रथितो रसः ॥ सर्वथैवमहंकाररहितत्वं व्रजंति चेत् ।अत्रांतर्भावमर्हंति धर्म-

वीरादयस्तदा॥ धृतिस्थायिनमेके तु निर्वेदस्थायिनं परे। शांतमेव रसं पूर्वे प्राहुरेकमनेकधा॥ निर्वेदो विषयेस्थायीतत्वज्ञानोद्भवः सचेत्। इष्टानिष्टवियोगाप्तिकृतस्तु व्यभिचार्यसौ॥ ॥इति श्रीभक्तिरसामृतसिंधौ पश्चिमविभागे मुख्यभक्तिरसपंचकनिरूपणे शांतभक्तिरसलहरी॥ ॥श्री॥ ॥अथ प्रीतभक्तिरसः॥ श्रीधरस्वामिभिः स्पष्टमयमेव रसोत्तमः। रंगप्रसंगे सप्रेमभक्तिकाख्यः प्रकीर्त्तितः॥ रतिस्थायितया नाम कौमुदीकृद्भिरप्यसौ। शांतत्वेनायमेवाद्वासुदेवाद्यैश्च वर्णितः॥ आत्मोचितैर्विभावाद्यैः प्रीतिरास्वादनीयतां। नीता चेतसि भक्तानां प्रीतभक्तिरसो मतः॥ अनुग्राह्यस्य दासत्वाल्लाल्यत्वादप्ययं द्विधा। भिद्यते संभ्रमप्रीतो गौरवप्रीत इत्यपि॥ तत्र संभ्रमप्रीतः दासाभिमानिनां कृष्णे स्यात्प्रीतिः संभ्रमोत्तरा। पूर्ववत्पुष्यमाणोयं संभ्रमप्रीत उच्यते॥ तत्रालंबनाः हरिश्च तस्य दासाश्च ज्ञेया आलंबना इह॥ अत्र हरिः॥ आलंबनोस्मिन्द्विभुजः कृष्णो गोकुलवासिषु। अन्यत्र द्विभुजः क्वापि कुत्राप्येष चतुर्भुजः॥ तत्र व्रजे यथा॥ नवांबुधरबंधुरः करयुगेण वक्रांबुजे निधाय मुरलीं स्फुरन्पुरटनिंदिपट्टांबरः। शिखंडकृतशेखरः शिखरिणस्तटे पर्यटन्प्रभुर्दिविदिवौकसोन्नुविधिनोति।

(सुखयति)

भि ५

(शुक्ल)
(संकीर्ण) ४

श्रीरसा०

नश्च किंकरान्॥ अन्यत्र द्विस्तु ज्ञेयथा प्रभुरयमनिशंपिशंगवासाः करयुगनागरिकंवुरंवुदाभः॥
नवघनइव चंचलापिनद्धोरविशशिमंडलमंडितश्च कान्ति॥ चतुर्भुज्ञेयथाललितमाधवे॥ २
वंचकौस्तुभकौमुदीसमुच्चयः कौमोदकीचक्रयोः सख्येनोज्झातिते स्तथाजलजयोराढ्यः श्चतु
र्भिर्भुजैः॥ दिव्यालंकरणेनसंकटतनुः संगीविहंगेशितुर्माव्यस्मारयदेषकंसविद्विषीवैकुंठगोष्ठी
श्रियं॥ ब्रह्मांडकोटिधामैकरोमकूपः कृपांबुधिः॥ अविचिंत्यमहाशक्तिः सर्वसिद्धिनिषेवितः॥ अ
वतारावलीवीजंसदात्मारामइद्गुणः॥ ईश्वरः परमाराध्यः सर्वज्ञः सुदृढव्रतः॥ समृद्धिमान्क्षमा
शील श्शरणागतपालकः॥ दक्षिणः सत्यवचनो दक्षः सर्वशुभंकरः॥ प्रतापीधार्मिकः शास्त्रच
क्षुर्भक्तसुहृत्तमः॥ वदान्यस्तेजसायुक्तः कृतज्ञः कीर्त्तिसंश्रयः॥ वरीयान्वलवान्प्रेमवश्यइत्या
दिभिर्गुणैः॥ युतश्चतुर्विधेष्वेषदासेष्वालंवनोहरिः॥ अथदासाः॥ दासास्तुप्रश्रितास्तस्यनिदेशव
शवर्त्तिनः॥ विश्वस्ताः प्रभुताज्ञानविनम्रितधियश्चते॥ यथा॥ प्रभुरयमखिलैर्गुणैर्गरीयानितिततुल
नामपरः प्रयातिनास्य॥ इतिपरिणतनिर्णयेननम्रान्हृदितचरितान्हरिसेवकान्भजध्वं॥ चतुर्धा

= द्ध

१

८

७१

रंशंकापंकलवंमदादगणयन्कालाग्निरुद्रादपि।त्वय्येवार्पितबुद्धिरुद्धवमुखस्त्वत्पार्षदानांगणोद्वा
रिद्वारवतीपुरस्यपरितःसेवोत्सुकस्तिष्ठति॥एतेषांप्रवरःश्रीमानुद्धवःप्रेमविह्वलः॥तस्यरूपंय
था।कालिंदीमधुरत्विषंमधुपतेर्माल्येननिर्माल्यतांलब्धेनांचितमंवरेणावलसद्गोरोचनारोचि
षा।द्वंद्वेनार्गलसुंदरेणभुजयोर्भ्राजिष्णुमब्जेक्षणंमुख्यंपारिषदेषुभक्तिलहरीरुद्धंभजाम्युद्धवं
॥भक्तिर्यथा।मूर्द्धन्याङ्कुशशासनंप्रणयतेब्रह्मेशयोःशासितासिंधुंप्रार्थयतेभुवंतनुतरांब्रह्मां
डकोटीश्वरः।मंत्रंपृच्छतिमामपेशलधियांविज्ञानवारांनिधिर्विक्रीडत्यसकृद्विचित्रचरितःसो
यंप्रभुर्मादृशां॥अथानुगाः॥सर्वदापरिचर्यासुप्रभोरासक्तचेतसः।पुरस्थाश्चव्रजस्थाश्चेत्युदिता
अनुगाद्विधा।तत्रपुरस्थाः।सुचंद्रोमंडनस्तंबःसुतंबाद्याःपुरानुगाः।एषांपार्षदवत्प्रायोरूपालंकरणा
दयः॥सेवायथा।त्रपरिकनकदंडमंडनोविस्फुरणीतेधुवतिकिलसुचंद्रश्चामरंचंद्रचारु।त्रपरस्तुतिसुतंबः
सुष्टुतांबूलवीटींविदधतिपरिचर्यांसाधवोमाधवस्य॥अथव्रजस्थाः।रक्तःपत्रकःपत्रीमधुकंठोमधुव्र
तः।रसालःसुविलासश्चप्रेमकंदोमरंदकः।आनंदश्चंद्रहासश्चपयोदोवकुलस्तथा।रसदःशारदा॥

द्याश्चव्रजस्थाअनुगामताः।एषांरूपंयथा।मणिमयवरमंडनोज्ज्वलांगान्नूपुरटजवामधुलिदूपटीरजा
सः।निजवपुरनुरूपदिव्यवस्त्रान्व्रजपतिनंदनकिंकरान्नमामि॥सेवायथा।द्रुतंकुरुपरिष्कृतंवकुल
पट्टपीतांशुकंवरैरगुरुभिर्ज्वलंखयवासितंवारिदारसालपरिकल्पयोरगलतादलैर्वीटिकाः।प॥
रागपटलीगवांदिशामरुद्धपौरंदरी॥व्रजानुगेषुसर्वेषुवरीयान्रक्तकोमतः।अस्यरूपंयथा।रम्य
पिंगपटमंगरोचिषाखर्वितोरुशतपर्विकारुचं।सुष्ठुगोष्ठयुवराजसेविनंरक्तकंठमुपयामिरक्तकं॥भ
क्तिर्यथा।गिरिवरभृतिमर्ददारकेस्मिन्व्रजयुवराजतयागतेप्रसिद्धिं।शृणुरसदसदापदाम्निसे

वापटिमरतारतिरुत्तमाममामास्तु॥धुर्योधीरश्चवीरश्चत्रिधापारिषदादिकः।तत्रधुर्यः।कृष्णेस्वप्रे
यसीवर्गेदासादौचयथायथं।यःप्रीतितंनुतेभक्तःसधुर्यइतिकीर्त्यते॥यथा।देवःसेव्यतयायथास्फु
रतिमेदेवक्स्तथास्यप्रियाःसर्वाःप्राणसमानतांप्रचिनुतेतद्भक्तिभाजांगणः।स्मृत्वासहसिकंविन्नेमित

मर्हंभक्तान्निमानोन्नतंप्रीतिंतत्प्रणतेस्वरेष्वविद्वद्यद्यःस्वास्थ्यमालंबते॥धीरः॥आश्रित्यप्रेयसीमस्य
नातिसेवापरोपियः।तस्यप्रसादपात्रंस्यान्मुख्यंधीरःसनृज्यते॥यथा॥कृ.मपिचिरमनुज्ञैर्नचरामिप्र

यन्नंयदुकुलकमलार्कत्वत्प्रसादाश्रयेपि।समजनिननुदेव्याःपारिजातार्चितायांपरिजनलिखनांतःपा
त्तिनीमेयदाख्या॥ अथवीरः॥ कृपांतस्यसमाश्रित्यप्रौढानानामपेक्षते।अतुलांयोवहन्कृष्णेप्रीतिंवीरःसउ
च्यते॥यथा।प्रलंबरिपुरीश्वरोभवतुकाक्षतिस्तेनमेकुमारमकरध्वजादपिनकिंचिदास्तेफलं।किमन्यदहमु
द्धतःप्रभुकृपाकटाक्षश्रियाप्रियापरिषदग्रिमांनगणयामिभामामपि॥चतुर्थेच॥जगज्जनन्यांजगदीशावे
शासंस्यादेवयकर्मणिनःसमीहितं।करोबिफल्ग्वपुरुदीनवत्सलःस्वएवधिक्ष्येत्तिरतस्यकिंतया॥एतेषु
तस्यदोसेषुत्रिविधेष्वाश्रितादिषु।नित्यसिद्धाश्चसिद्धाश्चसाधकाअपिकीर्त्तिताः॥ अथोद्दीपना॥॥ अनुग्र
हस्यसंप्राप्तिस्तस्यांघ्रिरजसांतथा।भुक्तावशिष्टभक्तादेरपितद्भक्तसंगतिः।इत्यादयोविभावाःस्युरेषसा
धारणामताः।तत्रानुग्रहसंप्राप्तिर्यथा।कृष्णस्यपश्यतत्कृपांकृपाद्याःकृपणोमयि।ध्येयोसौनिधनेहंत
हृशोरध्वानमप्यगात्॥मुरलीशृंगयोःस्वानःस्मितपूर्वविलोकनं।गुणोत्कर्षश्रुतिःपद्मपदांकनवनीरदाः
।तदंगसौरभाद्याश्चसर्वैःसाधारणामताः।तत्रमुरलीस्वानोयथाविदग्धमाधवे॥सांकंठंमुरलीकलाप
रिमलानाकर्ण्यघूर्णन्निनोरेतस्याद्विसहस्रतःसुरपतेरश्रूणिसर्वैर्भुवि।चित्रंवारिधरान्विनापितरसायैर

(देशोनद्यंवुवृष्ट्यंवुसंपन्नव्रीहिपालितः।स्यान्नदीमातृकोदेवमातृकश्चयथाक्रमं।)१

(मातृ)५

श्रीरसा०

घधारामयै।ईरात्यन्नपतदेवमातृकमनूहृदाटवीमंडलं॥अथानुभावाः॥सर्वतःस्वनियोगानामाधिक्ये
नप्रतिग्रहः।ईर्ष्यालवेनवास्पृष्टामैत्रीतत्प्रणतेजने॥तन्निष्टताद्याःशीताःस्युरेषुसाधारणाःक्रियाः॥
तत्रस्वनियोगस्यसर्वतआधिक्यंयथा॥अंगस्तंभारंभमुत्तुंगयंतंप्रेमानंदंदारुकोनान्वनंदत्।कंसारा
तेर्वीजनेयेनसाक्षादक्षोदीयानंतरायोव्यधायि॥त्वज्ञास्वरांपुरोक्तायेतथास्यसुहृदादरः।विरागाद्या
श्चयेशीताःप्रोक्ताःसाधारणास्तुते॥तत्रत्वंयथाश्रीदशमे॥श्रुतदेवोऽच्युतंप्राप्तंस्वगृहाञ्जनकोय
था।नत्वामुनीशसंहृष्टोधुन्वन्वासोननर्त्तह॥यथावा।त्वंकलास्वकुशलोपिनर्त्तनंप्रेमनाद्यगुरु

श्री०

णासिपाठितः।यद्विचित्रगतिचर्ययांचितद्धित्रयस्यहृदहारणानवि॥अथसात्विकाः॥स्तंभाद्याःसा
त्विकाःसर्वेप्रीतादित्रितयेमताः॥यथा॥गोकुलेंद्रगुणगानरसेनस्तंभमद्भुतमसौभजमानः।पक्षपा
तक्रिरसमंडपमूलस्तंभतांवहतिवैष्णववर्यः॥श्रीदशमेच॥सइंद्रसेनोभगवत्पदांवुजंविभ्रन्मुहुः
प्रेमविभिन्नयाधिया।उवाचहानंदजलाकुलेक्षणःप्रहृष्टरोमानृपगद्गदाक्षरं॥अथव्यभिचारिणः॥
॥हर्षोगर्वोधृतिः[illegible]निर्वेदोथविषमता।दैन्यंचिंतास्मृतिः[illegible]मतिरौत्सुक्यचापलं।वितर्को

७४

भात्र

२४

शंका१

ड्डिमावेगश्रमोद्दोन्मादावहित्थिकाः।बोधःस्वप्नःक्लमोव्याधिर्मृतिश्चव्यभिचारिणः।इतरेषांमदादी
नांनातिपोषतान्नवेत्।योगेत्रयःसुधृत्यंता।अयोगेतुक्लमादयः।अन्येयत्रपरेशेषानिर्वेदाद्याःसतां
मताः।तत्रहर्षोयथा।प्रथमे।प्रीत्युत्फुल्लमुखाःप्रोचुर्हर्षगद्गदयागिरा।पितरंसर्वसुहृदमवितारमि
वार्भकाः॥यथावा।हरिमवलोक्यपुरोनुविपतितोदंडप्रणामशतकामः।प्रमदविमुग्धोनृपतिःपु
नरुत्थानंविसस्मार॥क्लमोयथास्कांदे॥अशोषयन्मनस्तस्यम्लापयन्मुखपंकजं।आधिस्त्वद्विरहेदेव
ग्रीष्मेसरइवांशुमान्॥निर्वेदोयथा।धन्याःस्फुरंतितवसूर्यकराःसहस्रंयेसर्वदायदुपतेःपदयोःपतंति
।वंध्यादृशांदशशतीध्रियतेममासौदूरेमुहूर्तमपियानविलोकतेत्वं॥अथस्थायी॥संभ्रमःप्रभुताज्ञा
नात्कंपश्चेतसिसादरः।अनेनैक्यंगताप्रीतिःसंभ्रमःप्रीतिरुच्यते॥एषारसेत्रकथितास्थायिभावतया
बुधैः।आश्रितादेःपुरैवोक्तःप्रकारोरतिजन्मनि॥तत्रपारिषदादेस्तुहेतुःसंस्कारएवहि।संस्कारोद्बो
धकास्तस्यदर्शनश्रवणादयः।एषातुसंभ्रमप्रीतिःप्राप्नुवत्युत्तरोत्तरां।वृद्धिंप्रेमाततःस्नेहस्ततोरा
गइतित्रिधा॥तत्रसंभ्रमप्रीतिर्यथा।श्रीदशमे।ममाद्यामंगलंनष्टंफलवांश्चैवमेभवः।यन्नमस्येभगव

(नरकविशेष)

श्रीरसा°

तोयोगिध्येयांघ्रिपंकजौ॥ यथा वा। कलिंदनंदिनीकूलकदंबवनवल्लभौ। कदा नमस्करिष्यामि गोप
रूपं तमीश्वरौ। अथ प्रेमा। ह्रासशंकाच्युता बद्धमूला प्रेमेयमुच्यते। अस्यानुभावाः कथितास्तत्र व्यस
नितादयः। यथा। अणिमादिसौख्यवीचीमैत्री विदुःखप्रवाहेवा। न यमां विकृतिर्निर्हिमेवत्मोत्य द्रक
मलावलंवस्य॥ यथा वा। रूषाद्वारितबुद्धिना नृगसुतेन राज्ञोप्यलं मया ह्यतज्जगत्त्रयोप्यतनुकेतवं
तच्चतं॥ विनिंद्यकृतबंधनोप्युरगराजपाशैर्बलादरज्यत समप्यहो द्विगुणमेव वैरोचनिः॥ अथ स्ने
हः॥ सांद्रश्चित्तद्रवं कुर्वन् प्रेमा स्नेह इतीर्यते। क्षणिकस्यापि नेह स्याद्विश्लेषस्यासहिष्णुता॥ यथा। द
त्तेन वाष्पांवुभरस्य केशवं वीक्षाद्रवच्चित्तमसुस्ववत्तवा इत्युच्चकैर्धारयितो विचित्रतां चित्रानते दारुक
दारुकल्पतां॥ यथा वा। पन्नीरत्ननिधेः परामुपहरन् पूरेण वाष्पांभसां रज्यन्मंजुलकंठगर्भलुठितस्तो
त्राक्षरोपक्रमः। वुंवन् फुल्लकदंवडंवरतुलामंगैः समीक्ष्याच्युतं स्तब्धोप्यन्यधिकां श्रियं प्रणामतां
इंदाद्दधारोद्धवः॥ अथ रागः॥ स्नेहः स रागो येन स्यात्सुखं दुःखमपि स्फुटं। तत्संबंधलवेप्यत्र प्रीतिः
प्राणव्ययैरपि॥ यथा। गुरुरपि भुजगाज्जीसत्क्षका त्राज्यराजिर्ज्यच्युतिरतिशायिनी च प्रायवर्या च॥

श्री°

(अधिकृताश्रितयोः) ३ (रसाभिप्रायः) २ (अतःशूरात्) ४

पौ २

गुर्वी। अतनुतमुदमुच्चैः कृष्णलीलासुधांतर्विहरणसचिवत्वादौत्तरेयस्य राज्ञः॥ यथा वा। केशवस्य क
रुणालवोऽपि चेद्वाडवोऽपि किल शौंडवो मम। अस्य यद्यदयताकुशस्थलीपूर्णसिद्धिरपि मे कुशस्थ
ली॥ प्रायः आद्यद्वये प्रेमास्नेहः पारिषदेषु असौ। परीक्षिति नवेक्षागोदारुकेच तथोद्धवे॥ व्रजानुगेष्व
नेकेषु रक्तकप्रमुखेषु च। अस्मिन्नत्युदिते भावः प्रायः स्यात्सख्यलेशभाक्॥ यथा शुद्धौ तान्विमाल्लितं वाक्य
रूद्धवागुद्धवोहरिः। किंचिकुंचितनेत्रांतः स्मितेनप्यअरिषस्वजे॥ अयोगयोगावेतस्य प्रभेदौ कथितौ
बुधैः॥ तत्रायोगः॥ ~~तन्नोत्कंठितं॥ अदृष्टपूर्वस्य~~। संगाभावो हरेधीरैरयोग इति कथ्यते। अयोगे त
न्मनस्कत्वं तद्गुणाद्यनुसंधयः। तत्प्राप्त्युपायचिंताद्याः सर्वेषां कथिताः क्रियाः। उत्कंठितं वियोगश्चेत्यया
गोऽपि द्विधोच्यते॥ तत्रोत्कंठितं॥ अदृष्टपूर्वस्य हरेर्दिदृक्षोत्कंठितं मतं॥ यथा नारसिंहपुराणे॥ च
कारमेघेतद्गुणेविक्रमार्थरतिं नृपः। पक्षपातेन तन्नाम्नि मृगे पद्मे च तद्दृशि॥ यथा वा श्रीदशमे॥ अ
पद्यविष्णोर्मनुजत्वमीयुषो नारावताराय गुवो निजेच्छया। लावण्यधाम्नोजनितो पलंभनं मृहीतनन
स्यात्फलमंजसा दृशाः॥ अत्रायोगप्रसक्तानां सर्वेषामपि संभवे। औत्सुक्यदैन्यनिर्वेदचिंतानां चापल

(सखे) ४
र ४

=श ४

ध ५

ल ५

न ३ ने ७

स्यचाजडतोन्मादमोहानामपिस्यादतिरिक्तता॥ तत्रौत्सुक्यं॥ यथा कर्णामृते॥ अमून्यधन्यानि दिनांतराणि
हरे त्वदालोकनमंतरेण। अनाथबंधो करुणैकसिंधो हा हंत हा हंत कथं नयामि॥ यथा वा। विलोचनेंसां
बुधेस्तवपदारविंदद्वयी विलोकनरसच्छटामनुपलभ्य विक्षुन्मूतः। मनो मम मनागपि क्वचिदनाप्नुव
न्निर्वृतिं क्षणार्द्धमपि मन्यते व्रजमहेंद्रवर्षव्रजं॥ दैन्यं यथा तत्रैव। निबद्धमूर्द्धांजलिरेष याचे नीरंध्र
दैन्योन्नतिमुक्तकंठं। दयांबुधे देव भवत्कटाक्षदाक्षिण्यलेशेन सकृन्निषिंच॥ यथा वा। असिश
शिमुकुटाद्यैरपाल्योक्षणस्त्वं लघुरघहरकीकटादप्यहं कूटकर्मा। इति विसदृशतापि प्रार्थने प्रार्थया
मि स्नपय कृपणबंधो मामपांगच्छटाभिः॥ निर्वेदो यथा। स्फुटं श्रितवतोरपि श्रुतिनिषेवया श्लाघ्यतां ममा
नवनिरेतयोर्नवतु नेत्रयोर्मंदयोः। न वेन्नह्रियया पदं मधुरिमश्रियामास्पदं पदांबुजनखांकुरादपि वि
सारिरोचिस्तव॥ चिंता यथा। हरिपदकमलावलोकतृष्णातरलमतेरपि योग्यतामवीक्ष्य। अवनतव
दनस्य चिंतया मे हरि हरि निश्वसतो निशाः प्रयांति॥ चापलं यथा कर्णामृते॥ त्वच्छैशवं त्रिभुवनाद्भुतमि
त्यवेहि मच्चापलं च तव वा मम वाधिगम्यं। तत्किं करोमि विरणं मुरलीविलासि मुग्धं मुखांबुजमुदी

श्री०

क्षितुमीक्षणान्यां॥यथावा॥क्रियमघहरमुक्ताट्टकूपतंगीममासौनयममिदमयित्वानक्तंदिवंदाक्ष
षांधा॥निरवाधिमविचार्यस्वस्यचक्षोदिमानंतवचरणसरोजलेढुमन्विष्यतीशा॥जडतायथा॥सव्रम
स्कंधे।न्यस्तक्रीडनकोवालोजडवत्तन्मनस्तया।कृष्णग्रहगृहीतात्मानवेदजगदीश्वरी॥यथावा॥निमे॥
षोन्मुक्ताक्षाःकथमिदपरिस्पंदविधुरांतनुंविन्यस्यःप्रतिकृतिरिवास्तेद्विजपतिः॥अयेज्ञातंवंशीर
क्षिकनवरागव्यसनिनापुरःऋपामांतोदेवताविनिहिताहष्टिरमुना॥उन्मादोयथातत्रैव॥नदतिउच्चैः
ठोविलज्जोनृत्यतिक्वचित्।क्वचित्तद्भावनायुक्तस्तन्मयोनुचकारह।यथावा॥क्वचिन्नटतिनिष्पटंक्वचि
दसंनवस्त्रंजनेक्वापिह्विहसतिस्फुटंक्वचिदमंदमाक्रंदति।लसत्पनलसंक्वचित्क्वचिदपार्थमात्रायते।
हरेरन्तिनवोद्भुरप्रणयशीधुमत्तोमुनिः॥मोहोयथा॥हरिन्नाक्षिसुधोदयेदय॥अयोग्यमात्मनमितीशद
र्शनेसमन्यमानस्तदनान्तिकातरः॥उद्वेलदुःखार्णवमग्नमानसःश्रुतास्तुधारोद्विजमूर्छितोऽपतत्॥
॥यथावा॥हरिचरणविलोकालङ्घितापावलीनिर्वर्तविधुतचिदंतस्यत्रनस्तीर्थवर्येश्रुतिपुटपरिवादे
नेशानामामृतानिक्षिपतननुसतीर्थाश्चेष्टतांप्राणहंसः॥अथवियोगः॥वियोगोलब्धसंगेनविच्छे

कवि ५

(उज्ज्वले २

श्रीरसा०

दोदन्नुज्ञद्विषा॥यथा॥वालिसुतन्तुज्ञखंडखंडनायहतज्ञपुरंपुरुषोत्तमेप्रयाते॥विधुतविधुरबु
द्धिरुद्धबोधोयंविहरेनिरुद्धमना॥निरुद्धबोभूत्॥अंगेषुतापः॥कृशताजागर्यालिवशून्यता॥अ
धृतिर्जडताव्याधिरुन्मादोमूर्च्छितंमृतिः॥वियोगेसंभ्रमप्रीतेदशावस्थाःप्रकीर्त्तिताः॥अनव
स्थितिराख्याताचित्तस्यालंवशून्यता॥अरागितातुसर्वस्मिन्नधृतिःकथिताबुधैः॥अन्येःष्टोप्रक
टार्थत्वान्नापाद्यानहिलक्षिताः॥तत्रतापोयथा॥अस्मान्नदुनोतुकमलंतपनस्यमित्रंरत्नाक
रश्चवडवानलगूढमूर्त्तिः॥इंदीवरंविधुसुहृत्कथमीश्वरंवातंस्मारयद्दहतिपारिषदान्मुनी
न्द्र॥कृशतायथा॥दधातितवतथाद्यसेवकानांनुजपरिघाःकृशतांचपांडुतांच॥पततिवतयथा
मृणालबुद्ध्यास्फुटमिदंपांडवमित्रपांडुपत्रः॥जागर्यायथा॥विरहान्मुरविद्विषच्छिरंविधुरां
गेपरिक्लिन्नचेतसि॥क्षणदाःक्षणदायितोज्झिताबकुलाश्चबकुलास्तदाऽनवन्॥आलंवशून्य
ता॥विजयरथकुटुंबिना॥विमानानामाकिलकुटुंबमिदास्तिनास्त्रिलोक्याः॥भ्रमादिदमनवेद्मयत्व
दावुंव्रक्वचिदपिनचावतिष्ठतेद्यचेतः॥अधृतिर्यथा॥प्रेक्ष्यापिंछकुलमक्षिपिधत्तेनैचकीनि

२२

(द्युति)१

(उद्धवः)४

चयमुज्झतिदूरे।वंष्टियष्टिमपिनाद्यमुरारेरक्ककस्तवपदांबुजरक्तः॥जडतायथा।योद्विष्टिरंपुरमु
पेयुषिपद्मनाभेखेदानलव्यतिकरैरतिविक्लवस्य।स्वेदाश्रुभिर्नदिपरंजलतामवापुरंगानिनिष्क्रि
यतयाचकिलोद्धवस्य॥व्याधिर्यथा।विरयतिमणिमञ्चेष्टुंचलितेमुरत्निदिकुञ्जस्थलीपुरतःसमज्ञ
निध्नतनव्याधिःपवनव्याधिर्यथार्थाख्यः॥उन्मादोयथा।प्रोषितेवतंनिज्ञाधिदेवतेरैवतेनवमवे
क्ष्यनीरदं।त्वांतधीरयमधीरमुद्धवःपश्यनौतिरमतेनमस्यति॥मूर्छितं।समज्ञनिदशाविश्लेषात्तेपदां
बुजसेविनांव्रजभुवितथानासीन्निद्रालवोपियथापुरा।यदुवरदरश्वासेनामीवितर्कितजीविताः
सततमधुनानिश्चेष्टांगास्तटान्यधिसेरते॥मृतिर्यथा।दनुजदमनयातेजीवनेत्वय्यकस्मात्प्रपुरः॥
विरहतापैर्ध्वस्तकृत्यैकजाभाँ।व्रजमभिपरितस्तेदासकासारपंक्तौनकिलवसतिमात्रःकर्तुमिच्छं
तिहंसाः॥अशिवत्वान्नघटतेन्तकेकुत्राप्यसौमृतिः।किंतोभकत्वाद्वियोगस्यजातप्रायेतिकथ्यते॥॥

अ थयोगः॥कृष्णेनसंगमोयस्तुसयोगइतिकीर्त्यते।योगोपिकथितःसिद्धिस्तुष्टिःस्थितिरितित्रिधा
।तत्रसिद्धिः।उत्कंठितेहरेःप्राप्तिःसिद्धिरित्यभिधीयते।यथाकर्णामृते॥मौलिश्चंद्रकभूषणामरक

ले १

श्रीरसा॰

तस्तंनास्तिरामंवपुर्वक्त्रंचित्रविमुग्धहाससमधुरंवालेविलोमेदृशो। वाचः शैशवशीतलामदगज
श्लाघ्याविलासस्थितिर्मंदंमंद[struck]मयकएषमथुरावीथीं॥ मिथोगाहते॥ यथावा। श्रीदशमे। र
थात्तूर्णमवप्लुत्यसोऽक्रूरः प्रेमविह्वलः। पपातचरणोपांतेदंडवद्रामकृष्णयोः॥ तुष्टिः॥ ज्ञातेवियो
गेकंसारेः संप्राप्तिस्तुष्टिरुच्यते॥ यथा। प्रथमस्कंधे। कथंवयंनाथचिरोषितेत्वयिप्रसन्नदृष्ट्याखि
लतापशोषणं। जीवामतेसुंदरहाससशोभितमपश्यमानावदनंमनोहरं॥ यथावा। समक्षमक्षमः
प्रेक्ष्यहरिमंजलिबंधने। दारुकोद्वारकाद्वारितत्रचित्रदशांययौ॥ स्थितिः। सहवासोमुकुंदेन
स्थितिर्निगदिताबुधैः॥ यथाहंसदूते॥ पुरस्तादाभीरीगणभयदनामासकठिनोमणिस्तंभाले
वीकुरुकुलकथांसंकथयिता। सज्ञानुज्ञामष्टापदभुवमवष्टभ्यभविता गुरोः शिष्योनूनंपदक
मलसंवाहनरतः॥ निद्रावसरशुश्रूषाविधानेसावधानता॥ पुरस्तस्यानिवेशाद्यायोगेमीषांक्रियाम
ताः केचिदस्यारतेः कृष्णभक्त्यास्वादबहिर्मुखाः। भावत्वमेवनिश्चित्यनरसावस्थतांजगुः॥ इति
तावदसाधीयोयत्पुराणेषुकेषुचित्। श्रीमद्भागवतेचैषप्रकटंदृश्यतेरसः॥ तथाहि। क्वचिद्रुदंति

श्री॰

७८

(सुवर्ण)

त्यच्युतश्चिंतयाक्वचिद्धसंति नंदंति वदंत्यलौकिकाः। नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं प
रमेत्य निर्वृताः॥ निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि। यदाति हर्षोत्पुल
काश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यतीति॥ अथ गौरवप्रीतः। लाल्याभिमानिनां कृष्णे स्या
त्प्रीतिर्गौरवोत्तरा। सा विज्ञैर्वादिभिः पुष्टा गौरवप्रीत उच्यते॥ अत्रालंबनाः। हरिश्चतस्य लाल्याश्च
भवंत्यालंबना इह॥ तत्र हरिर्यथा। अयमुपहितकर्णः प्रस्तुते दृष्टिबद्धे यदुपतिरिति हासे मंदहासो
ज्ज्वलास्यः। उपदिशति सुधर्मामध्यमध्यास्य दीव्यन्हितमिह निजयाग्रे चेष्टयैवात्मजान्नः॥ महागुरु
र्महाकीर्त्तिर्महाबुद्धिर्महाबलः। रक्षी लालक इत्याद्यैर्गुणैरालंबनो हरिः॥ अथ लाल्याः। लाल्याः किल
कनिष्ठत्वपुत्रत्वाद्यभिमानिनः। कनिष्ठाः सारणगदसुभद्राप्रमुखाः स्मृताः। प्रद्युम्नचारुदेष्णाद्याः
सांबाद्याश्च कुमारकाः॥ एषां रूपं। अपि मुरांतकपार्षदमंडलादधिकमंडनवेशगुणश्रियः। असितपी
तसितद्युतिभिर्युता यदुकुमारगणाः पुरि रेमिरे॥ भक्तिः॥ सग्धिं भजंति हरिणा मुखमुन्नमय्य तांबूल
चर्वितमदंति च दीयमानं। घ्राताश्च मूर्ध्नि परिरभ्य भवंत्युदस्राः सांबादयः कति पुरा विदधुस्तपांसि॥ रु

(सद्भोजनं) २

श्रीरसा०

क्मिणीनंदनस्तेषुलाल्येषुप्रवरोमतः॥तस्यरूपं।।सजयतिशांवरदमनःसुकुमारोयदुकुमार
कुलमौलिः।जनयतिजनेषुजनकभ्रांतिंयःसुष्ठुरूपेण॥लक्षितः। प्रभावतिसमीक्षंतांदिविरूपांबु
धिर्महिम्नां सएषपरमोगुरुर्गरुडगोयदूनांपतिः।यतःकिमपिलालनंवयमवाप्यदर्पोद्धुराः।पुरारिम
पिसंगरेगुरुस्वषंतिरस्कुर्महे।।अन्येषांसदाराध्यधियैवजनतामपि।सेवकानामिहैश्वर्यज्ञान
स्यैवप्रधानता।लाल्यानांतुस्वसंबंधस्फूर्तेरेवसमंततः।व्रजस्थानांपरैश्वर्यज्ञानशून्याधिया
मपि॥अस्त्येववल्लवाधीशेपुत्रत्वेश्वर्यमैथवेदनं॥अथोद्दीपनाः।उद्दीपनास्तुवात्सल्यस्मितप्रेक्षा
दयोहरेः।यथा।अग्रेमातुर्ग्रहंपश्यन्नयजंवाग्रमानसः।गदः।पदारविंदस्यविदधेदंडवन्नतिं।
।अथानुभावाः॥अनुभावास्तुतस्याग्रेनीचासननिवेशनं।गुरोर्वर्त्मानुसारित्वंधुरस्तस्यपरिग्र
हः।स्वैराचारविमोक्षाद्यालाल्येषुपरिकीर्त्तिताः॥तत्रनीचासननिवेशनंयथा।यदुसदसिसुरेंद्रै
र्गुरुपस्थीयमानःसुखदकरकवार्त्तिन्द्रंश्लाणान्युपलक्षितांगः।मधुरिपुमत्तिबंधस्वर्णपीठानिसु
न्नुवभमन्निमकरांकोरांकवंस्वीचकार॥दासेःसाधारणाश्चान्येप्रोक्तास्तेमीषुकेचन।प्र

श्री०

च

रस २

७०

णामो मौनवाङ्कुल्यं संकोचः प्रश्रयाढ्यता ॥ निजप्राणव्ययेनापि तदाज्ञापरिपालनं । अधोवदनता
स्थैर्यं कासहासादिवर्जनं । तदीयादिरहः केलिवार्त्तास्वुपरमादयः ॥ अथ सात्विकाः ॥ कंदर्पविंद
ति मुकुंदपदारविंदद्वंद्वे दृशोः पदमसौ किल निष्प्रकंपा । प्रालेयविंदुनिचितं धृतकंटका
ते स्विन्नाः घ कंटकि फलं तनुरच्च काषीत् ॥ अथ व्यभिचारिणः ॥ अनंतरोक्ताः सर्वेऽत्र भवंति व्य
भिचारिणः ॥ तत्राद्दर्षो यथा । दूरे दरेंद्रस्य नन्स्युदीर्णे ध्वनौ स्थितानां यदुराजधान्यां । त
नूरुहैस्तत्र कुमारकाणां नटैश्च हृष्यद्भिरकारि नृत्यं ॥ निर्वेदो यथा । धन्यः सांवभवानुसरिंग
णमयन्पार्श्वे रजः कर्वुरो यस्तास्तेन विकृष्य वत्सलतया स्वोत्संगमारोपितः ॥ धिग्मां दुर्जनगमत्र शांवरमये
दुर्दैवविस्फूर्जितैः प्राप्तानक्षणिकापि लालनरतिः सा येन बाल्ये पितुः ॥ अथ स्थायी ॥ देहसंबंधितामानाद्गु
रु धीरत्र गौरवं । तन्मयी लालके प्रीतिर्गौरवप्रीतिरुच्यते ॥ स्थायी भावो रसा येषामामूलात्स्वयमु
ज्झिताः ॥ कचिद्विशेषमापन्ना प्रेमेति स्नेह इत्यपि । राग इत्युच्यते चात्र गौरवप्रीतिरेव सा ॥ तत्र गौरवप्रीतिर्यथा ।
मुद्रां भिनत्ति न रदच्छदयो रमीदां वक्त्रं च नो नमयति स्तवदस्तकीर्णं । चीरं परं किमपि संकुचती रुषां कोहं

२ विलुंठन्तुष्टुवेपथुर्विसृज्य कंठकुंठायितं निःश्वस्य मायनिक्षिपन् स वरदश्चाशौरिदृशो। करं जमकरध्वजभ्रकुटंकर्कंटकालंकृतान्नि

श्रीरसा०

क्षितिं क्षिपत्यघजिद्दशशतारविंदे॥ प्रेमा यथा॥ द्विषद्भिः क्षोदिष्ठैर्गदविदलितेभ्यः स्वजनतः करादाकृष्यैव प्रसभमग्निमन्या वपि दहते। सुभद्रायाः प्रीतिर्दनुजदमन त्वद्विषयका प्रपेदे कल्याणी न हि मलिनिमानं लवमपि॥ स्नेहो यथा॥ विषमपि मुदितः सुधामिवोग्रं स पिबति चेत्पितुरिंगितं झषांकः। विसृजति तदसम्मतां विषमो विषमिव हंत सुधामपींदुशुद्धां॥ त्रिष्वेवायोगयोगाद्या भेदाः पूर्ववदीरिताः॥ तत्रोत्कंठितं॥ शंवरः सुमुखिलब्धदुर्विपक्षुंवरः सरिपुरंवरायितः। अंबुराजमहसं कदा गुरुं कंबुराजिकरमीक्षितास्म्यहे॥ अथ वियोगः॥ मनो मम मेष्टाम पिगेंडुलीलां नवष्टियोग्यां च तथास्त्रयोग्यां। गुरोः पुरं कौरवमन्युपेते कारामिव द्वारवतीमवैति॥ सिद्धिः॥ मिलितः शंवरपुरतो मदनः पुरतो विलोकयन् पितरं। कोऽहमिति स्वं प्रमदान्न धीरधीरप्यसौ वेद॥ तुष्टिः॥ मिलितः श्रीमद्धिष्ठितगरुडं प्रेक्ष्य युधिष्ठिरपुरान्मुरारातिं। अजनि मुदा यदुनगरे संभ्रमभूमा कुमाराणां॥ स्थितिः॥ कुंचयन्नक्षिणी किंचिद्बाष्पानिस्यंदिपक्ष्मणी। वंदते पदयोर्द्वंद्वं पितुः प्रतिदिनं स्मरः॥ उत्कंठितवियोगादौ यद्यप्युद्दिष्टारितं न हि। संभ्रमप्रीतवज्ज्ञेयं तत्तदेवाखिलं कुधैः॥ ॥इति श्रीभक्तिरसामृतसिंधौ पश्चिमविभागे मुख्यभक्तिरसपंचेनिरूपणे प्रीतभक्तिरसलहरी

श्री०

(गौरवप्रीतप्रेयोवत्सल...)

८०

री॥ ॥अथप्रेयोभक्तिरसः॥ स्थायीभावोविभावाद्यैःसख्यमात्मोचितैर्हरेः॥ नीतःचित्तेसतांपुष्टिं
रसःप्रेयानुदीर्यते॥ तत्रालंबनाः॥ कृष्णश्चतद्वयस्याश्चतस्मिन्नालंबनामताः॥ तत्रहरिः॥ द्विभुजत्वा
द्विभुजत्वादिभागत्रप्राग्वदालंबनोहरिः॥ तत्रव्रजेयथा॥ महेंद्रमणिमंजुलद्युतिरमंदकुं
दस्मितःस्फुरत्पुरटकेतकीकुसुमरम्यपट्टांबरः॥ स्रगुल्लसदुरस्थलःक्वणितवेणुरत्रव्रजन्व्रजा
दघहरोहरत्यहह्नःसखीनांमनः॥ अन्यत्रयथा॥ चंचकौस्तुभकौमुदीसमुदयंकौमोदकीचक्रयोःस॥
ख्यनोज्वलितैस्तथाजलजयोराढ्यंचतुर्भिर्भुजैः॥ दृष्ट्वाहारिहरिन्मणिद्युतिहरंशौरिंहिरण्यांबरं
जग्मुःपांडुसुताःप्रमोदमधुभिर्नैवात्मसंभावनां॥ सुवेषःसर्वसल्लक्ष्मलक्षितोबलिनांवरः॥
विविधाद्भुतभाषाविद्वावदूकःसुपंडितः॥ विपुलप्रतिभोदक्षःकरुणावीरशेखरः॥ विदग्धो
बुधिमान्क्षंतारक्तलोकःसमृद्धिमान्॥ सुखीवरीयानित्याद्यागुणास्तस्येहकीर्तिताः॥ अथतद्व
यस्याःरूपवेषगुणाद्यैस्तुसमाःसम्यगयंत्रिताः॥ विस्रंभसंभृतात्मानोवयस्यास्तस्यकीर्तिताः॥
॥यथा॥ साम्येनभीतिविधुरेणविधीयमानभक्तिप्रपंचमनुदंचदनुग्रहेण॥ विस्रंभसारनिकुरं

(नकुलसहदेवौ)४

श्रीरसा०

वकरंवितेनवंदेतरामघद्रस्यवयस्यवृंदं॥तेपुरव्रजसंवंधाद्द्विविधाःप्रायईरिताः॥तत्रपुरसंवंधि
नः॥अर्जुनोभीमसेनश्चदुहिताद्रुपदस्यच।श्रीदामभूसुराद्याश्चसखायःपुरसंश्रयाः॥एषप्रांसखी
यथा॥शिरसिन्नृपतिर्द्रागघ्रासीदघारिमधीरधीर्जुडपरिघयोःश्लिष्टौभीमार्जुनौपुलकोज्ज्वलौ॥पदक
मलयोःसास्रोदस्त्वात्मजौचनिपेततुस्तमवराधियःप्रौढानंदादरुंधतपांडवाः॥श्रेष्ठःपुरव
यस्येषुभगवान्वानरध्वजः॥अस्यरूपंयथा।गांडीवपाणिःकरिराजशुंडारम्योरुरिंदीवरसुंदरा
भः।रथांगिनारथ्याधिरोहीसरोहितात्तःसुतरामराजीत्॥सख्यंयथा॥पर्यंकेमहतिसुरारिह

श्री०

तुरंकेनिःशंकःप्रणयनिसृष्टपूर्वकायः।उन्मीलन्नवनवनर्मकर्मठोयंगांडीवीस्मितवदनांबुजो
व्यराजीत्॥अथव्रजसंबंधिनः॥क्षणादर्शनतोदीनाःसदासहविहारिणः॥तदेकजीविताःप्रो
क्तावयस्याव्रजवासिनः॥अतःसर्ववयस्येषुप्रधानत्वंभजंत्यमी॥एषांरूपंयथा॥वलानुजस
दृग्वयोगुणविलासवेशाःश्रियःप्रियंकरणवल्लकीमुरलिश्रृंगवाद्यांकिताः॥महेंद्रमणिहाटक
स्फटिकपद्मरागत्विषःसदाप्रणयशालिनःसहचराहरेःपांतुवः॥सख्यंयथा॥उन्निद्रस्ययु

८१

(वीणा)२

स्त्वाद्यविरतिंसभद्रःपापास्तिष्ठतोऽन्तःश्रांतइवासिनिक्षिपसखेश्रीदामपाणौगिरिं।आधिर्विध्यतिनस्त्वमर्पय
करेकिंवाक्षणंदक्षिणेदोष्णस्तेकरवामकाममधुनासव्यस्यसंवाहनं॥यथावाश्रीदशमे॥इत्थंसतांब्र
ह्मसुखानुभूत्यादास्यंगतानांपरदैवतेन।मायाश्रितानांनरदारकेणसाकंविजह्रुःकृतपुण्यपु
ण्यपुंजाः॥एषुकृष्णस्ययथा।सहचरनिकुरंबंभ्रातरार्यप्रविष्टंद्रुतमघजठरांतःकोटरेप्रेक्षमाणः
।स्खलदशिशिरबाष्पक्षालितःक्षामगंडःक्षणमहहमवसीदन्शून्यचित्तस्तदासीत्॥सुहृदश्चसखा
यश्चतथाप्रियसखाःपरे।प्रियनर्मवयस्याश्चेत्युक्तागोष्ठेचतुर्विधाः॥तत्रसुहृदः॥वात्सल्यगंधिस
ख्यास्तुकिंचित्तेवयसाधिकाः।सायुधास्तस्यदुष्टेभ्यःसदारक्षापरायणाः॥सुभद्रमंडलीभद्रभद्रव
र्द्धनगोभटाः।यक्षेंद्रभटभद्रांगवीरभद्रमहागुणाः।विजयोबलभद्राद्याःसुहृदस्तस्यकीर्त्तिताः॥
एषांसख्यंयथा।धुन्वन्नूधावसिमंडलाग्रममलंत्वंमंडलीभद्रकिंगुर्वीमार्यगदांगृहाणविजयक्षो
भंवृथामाकृथाः।शक्तिंनक्षिपभद्रवर्द्धनपुरोगोवर्द्धनंगाहतेगर्जन्नेषघनोबलीनतुबलीवर्दा
कृतिर्दानवः॥सुहृत्सुमंडलीभद्रबलभद्रौकिलोत्तमौ॥तत्रमंडलीभद्रस्यरूपंयथा।पाटलपटल

श्रीरसा०

सगंदोत्लकुटकरः शेखरी शिखंडेनाद्युतिमंडलीमलिनिर्माल्यातिदधन्मंडलीन्द्रः ॥ सख्यं यथा ॥
वनभ्रमणकेलिनिर्गुरुरुतिरङ्गिखिन्नीकृतः सुखं स्वपितु नः सुहृद्व्रजनिशांतमध्ये निशि । अहं
शिरसि मर्दनं मृदु करोमि कर्णे कथां त्वमस्य विसृजन्नलं सुबल लुंजमालं वेप्रलेनद्विषु ॥ सख्यं यथा ॥
ऊनितिथिरिति पुत्रप्रेमसंवीतयाद्य स्नपयितुमिह सद्मन्यंबयास्तन्मितोस्मि । इति सुबल गिरा मे संदि-
शात्वं मुकुंद फणिपतिकृद कच्छेनाद्य गच्छेः कदापि ॥ अथ सखायः ॥ कनिष्ठकल्याः सख्येन संबद्धाः प्री-
तिगंधिना ॥ विशालवृषभोजस्वि देवप्रस्थवरूथपाः ॥ मरंदकुसुमापीडमणिबंधकरंधमाः ॥ इत्याद-
यः सखायोस्य सेवासौख्यैकरागिणः ॥ एषां सख्यं यथा ॥ विशालविशिनीदलैः कलयवीजनप्रक्रि-
यां । वरूथप विलंबिनालकवरूथमुत्सारय । मृषा वृषभ जल्पितं त्यज भजांगसंवाहनं यदुग्र-
भुजसंगरे गुरुमगात्क्लमं नः सखा । सर्वेषु सखिषु श्रेष्ठो देवप्रस्थोयमीरितः ॥ तस्य रूपं यथा ॥
विचित्रकंदुकपांडुरोद्भासवासाः पारिश्चोत्तुंगमौलिर्वल्लीयान्वद्धकांतः सिंधुरस्यद्धिंनलीलो देवप्र-
स्थः कृष्णपार्श्वे प्रतस्थे ॥ सख्यं यथा । श्रीदाम्नः पृथुलात्तुजामनि शिरो विन्यस्य मित्रामिति दाम्नः

श्री०

८२

सवयकरानुविद्धहृदयंशय्याविराजत्तनुं॥मध्येसुंदरिकंदरस्यपदयोःसंवाहनेनप्रियंदेवप्रस्थहला:
कृतीसुखयतिप्रेम्णाव्रजेंद्रात्मजं॥ अथप्रियसखाः॥वयस्तुल्याःप्रियसखाःसख्यंकेवलमाश्रिताः
॥श्रीदामाचसुदामाचदामाचवसुदामकः॥किंकिणीस्तोककृष्णांशुभद्रसेनविलासिनः॥पुंडरीकवि
टंकाक्षकलविंकादयोप्यमी॥रमयंतिप्रियसखाःकेलिभिर्विविधैःसदा॥नियुद्धदंडयुद्धादिकौ
तुकैरपिकेशवं॥एषांसख्यंयथा॥सगद्गदपदैर्हरिंहसतिकोपिवक्रोदितैःप्रसार्यभुजयोर्युगं
पुलकिकश्चिदाश्लिष्यति।करेणचलताहृशौनिभृतमेत्यरुंधेपरःकृशांगिसुखयंत्यमीप्रियस
खाःसखायंतव॥एषुप्रियवयस्येषुश्रीदामाप्रवरोमतः॥तस्यरूपं॥वासःपिंगंविचित्रंतशृंगपा
णिंवद्धस्पर्द्धंसौहृदान्माधवेन॥ताम्रोष्णीषंरामधामाभिरामंश्रीदामानंदामभाजंभजामि॥सख्यंय
था॥त्वंनःप्राञ्ज्यककठोरयामुनतटेकस्मादकस्माद्गतोदिष्ट्याद्दृष्टिमितोसिहंतनिविडाश्लेषैःस
खीन्प्राणय।ब्रूमःसत्यमदर्शनेतवमनाकूकाधेनवःकेवयंकिंगोष्ठंकिमभीष्टमित्यचिरतःसर्वंविप
र्यस्यति॥ अथप्रियनर्मवयस्याः॥प्रियनर्मवयस्यास्तुपूर्वतोप्यभितोवराः॥आत्यंतकरहस्येषुयु

श्रीरसा०

क्रात्मा व विशेषिणः ॥ सुवलार्जुनगंधर्वास्तेवसंतोज्ज्वलादयः ॥ एषां सख्यं यथा । राधासंदेशवृंदं कथयति सुवलः पुरः पद्मस्य कर्णे श्यामाकंदर्पलेखं निभृतमुपहरत्युज्ज्वलः पाणिपद्मे । पालीतांवूलमास्ये वितरति चतुरः कोकिलो मूर्द्ध्नि धत्ते तारादामेति नर्मप्रणयिसहचरास्तन्वितन्वंति सेवां ॥ प्रियनर्मवयस्येषु प्रवरौ सुवलोज्ज्वलौ ॥ तत्र सुवलस्य रूपं यथा ॥ तनुरुचिविजितहिरण्यं हरिदयितं हारिणं हरिद्वसनं । सुवलं कुवलयनयनं नयनंदितवांधवं वंदे ॥ सख्यं यथा । वयस्यगोष्ठ्यामखिलेंगितेषु विशारदायामपि माधवस्य । परैरदुरूहा सुवलेन सार्द्धं संज्ञामयी कापि वभूव वार्त्ता ॥ उज्ज्वलस्य रूपं यथा । अरुणांवरमुज्ज्वलेक्षणं मधुपुष्पावलिभिः प्रसाधितं । हरिनीलरुचिं हरिप्रियं मणिहारोज्ज्वलमुज्ज्वलं भजे ॥ सख्यं यथा । शक्तास्मि मानमवितुं कथमुज्ज्वलोयं दूतः समेति सखि यत्र मिलत्युदूरे । सापत्रपापि कुलजापि पतिव्रतापि का वा वृषस्यति न गोपदृषी किशोरी ॥ उज्ज्वलोयं विशेषेण सदा नर्मोक्तिलालसः ॥ यथा । स्फुरदतनुतरंगावर्द्धितानल्पवेलः सुमधुररसरूपाद्दुर्गमावारपारः ॥ जगति युवतिजातिर्निम्नगात्वं समुद्रस्त्वदियमघहरत्वामेति सत्यं धिनैव ॥ एतेषु केपि शास्त्रेषु

श्री०

८३

(कामयतो) ३

(...हरिता १ नल्पवेलाकालोयेन)

केपिल्लोकेपिविश्रुताः॥नित्यप्रियाःसुरवराःसाधकाश्चेतितेत्रिधा॥केचिद्देषुस्थिराज्ञात्यामंत्रिवत्त
मुपासते।तंहासयंतिचपलाःकेचिद्वैहासिकोमताः॥केचिद्दार्जवसारेणसरलाःशीलयंतितं।वा
मावक्रिमचक्रेणकेचिद्विस्मेरयंत्यमुं।केचित्प्रगल्भाःकुर्वंतिवितंडाममुनासमं।सौम्याःसूनृतया
वाचाधन्याधिन्वंतितंपरे।एवंविविधयासर्वप्रकृत्यामधुराश्रमी।पवित्रमैत्रीवैचित्रीचारुतामुपचि
न्वते॥अथोद्दीपनाः॥तद्दीपनावयोरूपशृंगवेणुदरादरः॥विनोदनर्मविक्रांतिगुणाःप्रेष्ठजनास्तथा
।राजदेवावतारादिचेष्टानुकरणादयः॥तत्रवयः॥वयःकौमारपौगंडकैशोरमिहसंमतं।गोष्ठेकौ
मारपौगंडकैशोरंपुरगोष्ठयोः॥तत्रकौमारं॥कौमारंवत्सलेवाच्यंततःसंक्षिप्यलिख्यते॥यथाश्रीद
शमे॥बिभ्रद्वेणुंजठरपटयोःशृंगवेत्रेचकक्षेवामेपाणौमसृणकवलंतत्फलान्यंगुलीषु।तिष्ठन्म
ध्येस्वपरिसुहृदोहासयन्नर्मभिःस्वैःस्वर्गेलोकेमिषतिबुभुजेयज्ञभुग्बालकेलिः॥अथपौगंडं॥॥
आद्यंमध्यंतथाशेषंपौगंडंचत्रिधाभवेत्॥तत्राद्यंपौगंडं॥अधरादेःसुलौहित्यंजठरस्यचतान
वं।कंबुग्रीवाज्ञमाद्यंचपौगंडेप्रथमेसति॥यथातुदविंदतितेमुकुंदशानकेरश्वत्थपत्रश्रियंकंठः

(पद्मराग)

(ज्याम)

श्री०नं०रसा०

कंबुवदंबुजाद्दाननजातेरेखात्रयीमुज्ज्वली॥ आरूढे कुरुविंदकंदलरुचिं नूचंद्रदंतच्छदोलक्ष्मीरा
धुनिकीं धिनोति सुज्ञदामन्दी।णिन॰काप्यसौ॥ पुष्पमंडनवैचित्री चित्रा णि गिरिधातुभिः॥ पीत
पट्टदुकूलाद्यमिह प्रोक्तं प्रसाधनं॥ सर्वाटवीप्रचारेण नैचिकीचयचारणं॥ नियुद्धकेलिनृत्या
दिशिक्षारंभोत्र चेष्टितं॥ यथा॥ वृंदारण्ये समंतात्सुरभिणि सुरभीवृंदरक्षाविहारी गुंजाहारी
शिखंडप्रकटितमुकुटः पीतपट्टांबरश्रीः॥ कर्णाभ्यां कर्णिकारे दधदलमुरसा मल्लिमाल्यं च फुल्लं नृ
त्यं दोर्युद्धरंगे नटवदिह सखीन्नंदयत्येष कृष्णः॥ अथ मध्यं॥ नासासु शिखरा तुंगा कपोलौ म
डलाकृती॥ पार्श्वाद्यंगं सुवलितं पौगंडे सति मध्यमे। यथा॥ तिलकुसुमविहासि नासिका

८४

श्रीर्नवमणिदर्पणा दर्पनाशि गंडः॥ हरिरिह परिमृष्टपार्श्वसीमा सुखयति सुष्टु सखीनुरस्वश्या
नये वा॥ त्र उष्णीषः पट्टसूत्रोत्थपाशो नात्र तडित्त्विषा॥ यष्टिः श्यामा त्रिहस्तोच्चा स्वर्णाग्रेत्यादि म
डनं॥ भांडीरे क्रीडनं शैलोद्धारणाद्यं च चेष्टितं॥ यथा॥ यष्टिं हस्तत्रयमपरिमितां प्रांतयोः स्व
र्णबद्धां बिभ्रन्नीलां चटुलचमरीचारुचूडोज्ज्वलश्रीः॥ बद्धोष्णीषः स्फुरटरुचिना पट्टपाशे

थ३

नपार्श्वेपश्यन्क्रीडन्नसुखयतिसखेमित्रवृंदंमुकुंदः॥पौगंडमध्यएवायंहरिर्दीव्यन्वि
राजते।माधुर्याद्भुतरूपत्वात्कैशोराग्रांशभागिव॥अथशेषं॥वेणीनितंबलंबाग्रालीला
लकलताद्युतिः।अंसयोस्तुंगतेत्यादिपौगंडेचरमेसति॥यथा॥अग्रेनीलालकलतिकया
लंकृतांवित्रदास्यंचंचद्वेणीशिखरशिखयाचुंबितश्रोणिबिंबः।तन्तुंगांसच्छविरघहरो
रंगमंगश्रियैवन्यस्यन्नेषप्रियसवयसांगोकुलान्निर्दिदीते॥उष्णीषेवक्रिमालीलासरसी
रुहपाणिता।काश्मीरेणोर्ध्वपुंड्राद्यमिहमंडनमीरितं॥यथा।उष्णीषेदरमक्रिमाकरतलेव्या
जृंभिलीलांबुजंगौरश्रीरलिकेकिलोर्ध्वतिलकःकस्तूरिकाबिंदुमान्।वेशःकेशवपेशलः
सुबलमप्याघूर्णयत्यद्यतेविक्रांतंकिमुतस्वभावमृदुलांगोष्ठाबलानांततिं॥अत्रतुंगीगिरांन
र्मसखैःकर्णकथारसः।पशुपगोकुलबालानांश्रीश्लाघेत्यादिचेष्टितं॥धूर्तस्त्वंयदवेषिकृष्णतमः
कर्णांतववर्णाकियंमोहनता।समृद्धिरधुनागोधुकूकुमारीगणे।अत्रापिद्युतिरत्नरोहनभुवोवा॥
लाःसखेपंचषाःपंचषड्जगतांजयेनिजधुरांयत्रार्पयन्माद्यति॥अथकैशोरं॥कैशोरंपू

रू॰वे २

(सहृद् २ ग ३ (चेष्टा) (नेत्र) २ (अलंकरणस्थोः प्रतिबेधयोः ...। अलंकारोनकर्णी यद्रूपस्य

श्रीरसा०

र्वमिवोक्तं संक्षेपेणोच्यतेतत्तः॥ यथा॥ पत्रयोः सिक्तवलित्रयीवरलतेवासस्तडिन्मंजुलेप्रोन्मीलद्व
नमालिकापरिमलस्तोमितमालाविषि॥ त्वत्तत्यंबकवातकानुस्मितरसैर्दामोदरांगोधरेश्रीदामा
रमणीयरोमकलिकाकीर्णाशाखीवत्तो॥ प्रायः किशोरएवायंसर्वभक्तेषुभासते॥ तेन यौवनसो
भाःस्पनेहकाचित्प्रपंचिता॥ अथरूपं॥ यथा॥ अलंकारमलंकृत्वा तवांगेषंकजेक्षणा सखीनूके
वलमेवेदंधाम्नाधीमनूधिनोतिनः॥ अथशृंगं॥ यथा॥ व्रजपतिवडभीवितर्द्दिकायांमुषसिविषा

श्री०

णावरेरूवत्युदग्रं॥ अहहसवयसांतदीयरोमोद्गमपिनिवहाःसममेवजाग्रतिस्म॥ वेणुर्यथा॥ सु
ह्रदोनहियातकातरा हरिमन्वेष्टुमितःसुतांरवेः कथयन्नमुमत्रवेणवध्वनिदूतःशिखरेधि
नोतिनः॥ शंखोयथा॥ पांचालीपतयःश्रुत्वा पीचडन्यस्यनिस्वनं॥ पंचास्यपञ्चमुदिताःपंचास्य
प्रतिमाययुः॥ विनोदोयथा॥ स्फुरदरुणदुकूलैर्जागुडैगैरिगात्रैः कृतवरकवरीकैरनताडं॥
किकर्णामधुरिपुमिहराधावेषमुवीक्ष्यसाक्षात्प्रियसखिसुबलोनूद्विस्मितःसस्मितश्च॥ अथानु
भावाः॥ नियुद्धकंदुकद्यूतवाह्यवाहादिकेलिभिः॥ लगुडालगुडिक्रीडासंगरैश्चास्यतो

(अलंकार...)

...

लं कं ... २

षणां। पल्यंकासनदोलासुसह स्वापौपवेशनं। वारुचित्रपरीहासो विहारः सलिलाशये। युग्म
त्वेनास्य गानाद्याः सर्वसाधारणाः क्रियाः। तत्र नियुद्धेन तोषणं॥ यथा। अघहरडिंत काशीयुद्ध
कंडूलवाहुस्त्वमटसि सख्विगोष्ठ्यामात्मवीर्यंस्तुवानः। कथयकिमुममोद्वेश्वं डदोर्दंडचेष्टाविर
मितरणरंगोनिःसहांगः स्थितोसि॥ युक्तायुक्तादिकथनं हितकृत्येप्रवर्त्तनं। प्रायः पुरःसरत्वा
द्याः सुहृदामीरिताः क्रियाः। तांबूलाद्यर्पणं वक्रेतिलकस्यासकक्रिया। पत्रांकुरविलेखादिस
खीनां कर्मकीर्त्तितं। निर्ज्जितीकरणीयुद्धेवस्त्रे ध्दृत्वास्य कर्षणं। पुष्पाद्याच्छेदनं हस्तात् कृष्णेन स्वप्र
साधनं। हस्ताहस्ति प्रसंगाद्याः प्रोक्ताः प्रियसखक्रियाः। दूत्यंव्रजकिशोरीषुतासांप्रणयगामि
ता॥ तास्विःकेलिकलौ साक्षात्सख्युः पक्षपरिग्रहः। असाक्षात्स्वस्वयूथस्थेशापक्षस्थापनचा
तुरी। कर्णकर्णिकथाद्याश्च प्रियनर्मसखक्रियाः। वन्यरत्नाद्यलंकारैर्माधवस्य प्रसाधनं। पु
रस्तौर्यत्रिकं तस्यगवांसंनालनक्रियाः। अंगसवाहनं माल्यगुंफनं वीज्ञनादयः। एताः साधार
णाः दासैर्वयस्यानां क्रियामताः। पूर्वोक्तेष्वपराश्चात्र ज्ञेयाधीरैर्यथोचितं। अथसात्विकाः॥

नू. तः नवा
धर्म पं

श्रीरसा०

तत्रस्तंभोयथा।निःक्रामंतीनागमुन्मथ्यकृष्णंश्रीदामायंद्राक्परिष्वक्तुकामः।लब्धस्तंभोसंभ्रमा
रंभशालीवाकुस्तंभौपश्यपनोद्वेष्टुमीष्टे।स्वेदोयथा।।क्रीडोत्सवानंदरसंमुकुंदस्यात्यंनुदेववर्ष
तिरम्यघोषे।श्रीदाममूर्त्तिर्वरभुक्तिरेषास्वेदांबुमुक्तापटलीप्रसूते।।रोमांचोयथादानके।।
लिकौमुद्यां।।अपिगुरुपुरस्त्वंदोस्तंभोप्रमार्यनिरर्गलंविपुलपुलकोधन्यःस्वैरीपरिष्वज
सेहरिं।प्रणयतितवस्कंधेयासौभुजंभुजगोपमं।।इकसुवलपुरासिद्धंकोत्रेचकर्थंक्रियत्तपः।।स्वरभे
दादिचतुष्कंयथा।प्रविष्टवतिमाधवेभुजगराजनाजंकदंतदीयसुहृदस्तदापृथुलवेपथुव्याकुलाः।विव
र्णवपुषःक्षणाद्विकटघर्घरध्मायिनोनिपत्यनिकटस्थलीभुविसुबुद्धिमारेनिरे।।अश्रुर्यथा।।दावंसमी
क्ष्यविचरंतमिषीकतूलैस्तस्यक्षयार्थमिववाष्पऊरंकिरंती।स्वामप्यपेक्ष्यतनुमंबुजमालधारिण्यानीर
वीथिरस्तिताहरिमावरिष्ट।।अथव्यभिचारिणः।।औग्र्यत्रासंतथालस्यंवर्जयित्वाखिलाःपरेः।रसेप्रेय
सिभावज्ञैःकथिताव्यभिचारिणः।।तत्रायोगेमदंहर्षंगर्वंनिद्रांधृतिंविना।योगेमृतिंक्लमंव्याधिंविनाप
स्मृतिदीनते।।तत्रहर्षोयथा।निःक्रमय्यकिलकालियोरगंवल्लवेस्वैरसुतेसमीयुषि।।संमदेनसुहृद

श्री०

(श्रीर्णि:)२

स्ववल्लत्यदास्तङ्गिरश्च विवसांगतांदधुः॥अथस्थायी॥विमुक्तसंभ्रमायास्याद्विस्रंभात्मारतिर्द्वयोः।प्रायःस
मानयोरत्रसासख्यंस्थायिशब्दभाक्॥विस्रंभोगाढविश्वासविशेषोयंत्रणोज्झितः।एषासख्यरतिर्वृद्धिंगच्छं
तीप्रणयःक्रमात्।प्रेमास्नेहस्तथारागइतिपंचभिदोदिता॥तत्रसख्यरतिर्यथा।मुकुंदोगांदिनीपुत्रत्वयासी
द्विरूपतामिति।गरुडांकगुडाकेशास्त्वांकदापरिरप्स्यते॥यथाप्रणयः॥प्राप्तायांसंभ्रमादीनांयोग्यतायाम
पिस्फुटं।तद्गंधेनाप्यसंस्पृष्टारतिःप्रणयउच्यते॥यथा।सुरैस्त्रिपुरजिन्मुखैरपिविधीयमानस्तुतेरपिप्रथ
यतःपरामधिकपारमेश्यश्रियं।दधत्पुलकिनंहरेरधिशिरोधिसव्यंभुजंससंभ्रममकुरुतपांशुलान्शिरसि
चंद्रकानर्जुनः॥प्रेमायथा।नवत्युदयतीश्वरेसुहृदिहंतराज्यच्युतिर्मुकुंदवसतिर्वनेपरगृहेचदास्यक्रि
या।इयंस्फुटममंगलाभवतुपांडवानांगतिःपरंतुववृधेत्वयिद्विगुणमेवसख्यामृतं॥स्नेहोयथाश्रीदश
मे॥अन्यत्तदनुरूपाणिमनोज्ञानिमहात्मनः।गायंतिस्ममहाराजस्नेहक्लिन्नधियःशनैः॥यथावा॥
प्रत्यग्रगर्भ॥स्ववत्लदष्टधातुषुसुहृज्जनेषुलीलारसंवर्षत्सुस्वसितेषुकृष्णुदिरेव्यक्तंवनूवाद्भुतं।याप्रा
गास्तसरस्वतीद्रुतमसौलीनोपकंठस्थलेयानासीदुदगाद्घशोःपथिसदानीरोरुधाराःत्रसा॥रा

मु२

श्रीरसा०

गोयथा। अस्त्रेण द्रुः प्रपरिहृ राहरयेवाकारियापत्रिपंक्तिरकरूपेणकृपीसुतेन। उत्प्लुत्य गांडिवन्न्तताड्ढ
दिगृह्यमाणा ज्ञाता। सा सा कुसुमवृष्टिरिवोत्सवाय॥ यथा वा। कुसुमान्यवचिन्वतः समंताद्वनमालारच
नोचितान्यरण्ये। वृषभस्य वृषार्कजामरीविर्दिवसार्द्धेपि नूनकौमुदीव॥ अथायोगेनकंठितं॥ यथा। ध
नुर्वेदमधीयानो मध्यमस्त्वयि पांडवः। वाष्पसंकीर्णया कृष्णगिराश्लेषवाञ्छिज्ञपत्॥ अथ वियोगः यथा॥
अघस्य जठरानलात्फणिकृदस्य चक्रोड्डतो दवस्य कवलादपि त्वमविता त्रयेषामभूः। इतस्त्वितयतोध्यति
प्रकटघोरधाटीधराकथं सुनविरहज्वरादवसितान्सखीनद्य नः॥ अत्रापि पूर्ववत्प्रोक्ताः तापाद्यास्ताद्दशा
दश॥ तत्र तापः। प्रपन्नोत्तांडीरे प्यधिकृशि शिरेचंडिमभरं तुषारैपि प्रोढिं दिनकरसुतास्रोतसि गतः। अ
पूर्वः कंसारे सुबलमुखमित्रावलिमसो वलीयानुत्तापस्तव विरहजन्मा ज्वलयति॥ कृशता। त्वयि प्राप्ते
कंसक्षितिपतिविमोक्षाय नगरीं गभीराद्राभीरावलितनुषु खेदादनुदिनं। चतुर्णांमनूतानामङ्गनितनि
मादानवरिपो समीरस्य घ्राणाध्वनि स्थूलता केवलमभूत्॥ जागर्या। नेत्रांबुजद्वंद्वमवेक्ष्य पूर्णवाष्पांबु
पूरेणवरूथपस्य। तत्रानुवृत्तिं किल यादवेंद्र निर्विद्य निद्रा मधुपीमुमोच॥ आलंबशून्यता॥ गतेद्दारा

श्री०

८७

ण्यात्प्रियसुहृद्दिगोष्ठेष्वरसुतेलघूर्णतंसद्यः पतदतितरामुत्पतदपि।नदन्मित्रामंत्रामंनजतिचक्रुलंतूल
मिवमेनिरालंवंचेतः क्वचिदपिविलंवंलवमपि॥अधृतिः॥रचयतिनिजवृत्तौपाशुपाल्येनिवृत्तिंकल
यतिचकलानांविस्मृतौयत्नकोटिं।किमपरमिहवाचंजीवितेप्यद्यधत्तेयदुवरविरहात्तेनार्थितांवंधुव
र्गः॥जडता॥अनाश्रितपरिच्छदाः कृशाविशीर्णरूक्षांगकाःसदाविफलवृत्तयोविरहिताः किलछायया
।विरावपरिवर्द्धितास्तवमुकुंदगोष्ठांतरेस्फुरंतिसुहृदांगणाः शिखरजाइवस्थावराः॥व्याधिः॥विरह
ज्वरसंज्वरेणतेज्वलिताविश्लथगात्रवंधना।यदुवीरतटेविचेष्टतेविरमाभीरकुमारमंडली॥उन्मादः
।विनाभवदनुस्मृतिंविरहविभ्रमेणाधुनाजगद्यवज्ञातिक्रमंनिखिलमेवविस्मारिताः लुठंतिभुविरो
रतेवतहसंतिधावंत्यमीरुदंतिमधुरापतेकिमपिवल्लवानांगणाः॥मूर्छितं।दीव्यतीहमधुरेमधुरायां
प्राप्यराज्यमधुनामधुनाथो।विश्वमेवमुदितंरुदितांधेगोकुलेतुमुकुंराकुलतान्नूनं॥मृतिः॥कंसारे॥
विरहज्वरोर्मिजनितज्वालावलीजर्जरागोपाः केलितटेतथाशिथिलतश्वासांकुराः शेरते।वारंवार
मखर्वलोचनजलैराप्लाव्यताञ्छिश्वलान्तःशोचंत्यद्ययथाचिरंपरिचयस्निग्धाः कुरंगाअपि।प्रोक्तेयंवि

(कुमस्कार)

श्रीरसा०

रहावस्थास्य ष्टलीलानुसारतः। कृष्णेविप्रयोगःस्यान्नजातुव्रजवासिनां॥ तथाचस्कांदे मथुराखंडे॥
वत्सैर्वत्सतरीभिश्चसदाक्रीडतिमाधवः। वृंदावनांतरगतःसरामोबालकैर्वृतः॥ अथयोगेसिद्धिः॥
यथा। पांडवःपुंडरीकाक्षंप्रेक्षाचक्रिनिकेतने। चित्राकारंभजन्नेवमित्राकारमदर्शयत्॥ तुष्टिर्य
थाश्रीदशमे। तंमातुलेयंपरिरभ्यनिर्वृतोभीमःस्मयंप्रेमजवाकुलेंद्रियः। यमौकिरीटीचसुहृ
त्तमंमुदाप्रवृद्धबाष्पाःपरिरेभिरेच्युतं॥ यथावा। कुरुजांगलेहरिमवेक्ष्यपुरःप्रियसंगमंव्र
जसुहृन्निकराः। भुजमंडलेनमतिकुंडलिनःपुलकांचितेनपरिषस्वजिरे॥ स्थितिः। यथाश्री

श्री०

दशमे। यत्पादपांशुर्बहुजन्मकृच्छ्रतोधृतात्मभिर्योगिभिरप्यलभ्यः। सएवयद्दृग्विषयःस्वयंस्थि
तःकिंवर्ण्यतेदिष्टमतोव्रजौकसां॥ द्वयोरप्येकजातीयभावमाधुर्यभागसौ। प्रेयान्कामपिपुष्णा
तिरसश्चित्तचमत्कृतिं। प्रीतेचवत्सलेचापिकृष्णतद्भक्तयोःपुनः। द्वयोरन्योन्यभावस्यभिन्नजा
तीयताभवेत्। प्रेयानेवभवेत्प्रेयानतःसर्वरसेष्वयं। सख्यसंघृक्तहृदयैःसद्भिरेवानुबुध्यते॥ ॥
॥ इतिश्रीभक्तिरसामृतसिंधौपश्चिमविभागेमुख्यभक्तिरसनिरूपणेप्रेयोभक्तिरसलहरी॥ ॥

॥श्री॥ ॥अथ वत्सलभक्तिरसः॥ विभावाद्यैस्तु वात्सल्यं स्थायी पुष्टिमुपागतः॥ एष वत्सलनामात्र प्रो
क्तो भक्तिरसो बुधैः॥ अत्रालंबनाः॥ कृष्णं तस्य गुरूंश्चात्र प्राहुरालंबनान्बुधाः॥ तत्र कृष्णो यथा॥
नवकुवलयदामश्यामलं कोमलांगं विचलदलकभृंगक्रांतनेत्रांबुजांतं। व्रजभुवि विहरंतं पुत्रमा
लोकयंती व्रजपतिदयितासीत्प्रस्नवोत्पीडदिग्धा॥ श्यामांगो रुचिरः सर्वसल्लक्षणयुतो मृदुः॥ प्रिय
वाक् सरलो ह्रीमान्विनयी मान्यमानकृत्। दातेत्यादिगुणः कृष्णो विभाव इह कथ्यते। एवं गुणस्य चास्या
नुग्राह्यत्वादेव कीर्त्तिता। प्रभावानास्पदतया वेद्यस्यात्र विभावता॥ यथा। श्रीदशमे। त्रय्या चोपनिष
द्भिश्च सांख्ययोगैश्च सात्वतैः। उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं॥ यथा वा। विष्णुर्नित्यमु
पास्यते सखि मया तेनात्र नीता क्षयं शंके पूतनिकादयः क्षितिरुहौ तौ वात्यया न्मूलितौ। प्रत्यक्षं
गिरिरेष गोष्ठपतिना रामेण सार्द्धं धृतस्तत्र कर्म दुरन्वयं मम शिशोः केनास्य संभाव्यते॥ अथ गु
रवः। अधिकंमन्यभावेन शिक्षाकारितयापि च। लालकत्वादिनाप्यत्र विभावा गुरवो मताः॥ यथा।
नूर्यनुग्रहचितेन चेतसा लालनोक्तिभिमन्तितः कृपाकुलं। गौरवेण गुरुणा जगद्गुरोर्गौरवं ग॥

श्रीरसा०

मगाण्यमाश्रये॥ तेतुतस्यात्रकथिताव्रजराज्ञीव्रजेश्वरः। रोहिणीताश्चवल्लव्यो याःप्रजङ्गतात्म

जाः। देवकीतत्सपत्न्यश्चकुंतीचानकदुंदुभिः। सांदीपनिमुखाश्चान्ये यथापूर्वममीवराः॥ व्रजेश्व

रीव्रजाधीशौ श्रेष्ठौगुरुजनेष्विमौ॥ तत्रव्रजेश्वर्यारूपं। यथाश्रीदशमे॥ क्षौमंवासःपृथुकटि

तटेबिभ्रतीसूत्रनद्धंपुत्रस्नेहस्नुतकुचयुगंजातकंपंचसुभ्रूः। रज्ज्वाकर्षश्रमभुजचलत्कंकणौकु

डलेच स्विन्नंवक्त्रंकबरविगलन्मालतीनिर्ममंथ॥ यथावा॥ डोरीजूटितवक्रकेशपटलासिंदू

श्री०

रविद्युल्लसत्सीमंतद्युतिरंगभूषणविधिंनातिप्रभूतंश्रिता। गोविंदास्यनिसृष्टसाश्रुनयनद्वंद्वा

नवेंदीवरश्यामश्यामरुचिर्विचित्रसिचयागोष्ठेश्वरीपातुवः॥ वात्सल्यं यथा। तनोमंत्रन्यासं

प्रणयतिहरेगद्गदमयीसबाष्पाक्षीरक्षातिलकमलिकेकल्पयतिच। स्नुवानाप्रत्यूषेदिशति

चकरेकार्मणमसौयशोदामूर्त्तेवस्फुरतिसुतवात्सल्यपटली॥ व्रजाधीशस्यरूपं॥ यथा। तिल ८९

तंडुलितैःकचैःस्फुरंतंनवडिंडीरपलाशचारुचेलं। अतितुंदिलमिंदुकांतिभाजंव्रजराजंवरकू

र्चमर्चयामि॥ वात्सल्यं यथा। अवलंब्यकरांगुलिंनिजांस्खलदंघ्रिप्रसरंतमंगने। व्रजसिस्तव

(कार्मणं मूलकर्म। ३ पद्यमितियावत्) ३ (व्रज) ५

दस्त्रैनिर्भरोमुमुदे प्रेक्ष्य सुतं व्रजाधिपः॥ अथोद्दीपनाः॥ कौमारादि वयो रूपवेशाः श्रोशाववाप
ती। जल्पितस्मितलीलाद्या बुधैरुद्दीपनाः स्मृताः॥ तत्र कौमारं॥ आद्यं मध्यं तथा शेषं कौमारं त्रि
विधं मतं॥ तत्राद्यं कौमारं॥ स्थूलमध्योरुतापांगश्वेतिमा स्वल्पदंतिता। प्रव्यक्तमार्दवाद्यं च कौमा
रे प्रथमे सति॥ यथा। त्रिचतुरदशनस्फुरन्मुखेंदुः पृथुतरमध्यकटीरकोरुसीमा। नवकुवलयको
मलः कुमारो मुदमधिकां व्रजनाथयोर्वितानीत्॥ अस्मिन्मुकुंदः पदद्मेमपः क्षणिकेरुदितस्मिते॥
स्वांगुष्ठपानमुत्तानशयनाद्यं च चेष्टितं॥ यथा। मुखपुटकृतपादांभोरुहांगुष्ठमूर्द्धप्रचलचरण॥
युग्मं पुत्रमुत्तानसुप्तं। क्षणमिह विरदंतं स्मेरवक्त्रं क्षणं सा तिलमपि विरतासीन्नेक्षितुं गोष्ठराज्ञी॥ अ
त्र व्याघ्रनखः कठेरक्षातिलकमंजनं। पट्टडोरी कटौ हस्ते सूत्रमित्यादि मंडनं॥ यथा। तरक्षुन
खमंडनेन वतमालपर्यंघ्रिशिशुरुचिररोचनाकृततमालपत्रश्रियं धृतप्रतिसरं कटस्फुरितपट्टसूत्र
स्रजं व्रजेशगृहिणी सुतं न किल वीक्ष्य तृप्तिंययौ॥ अथ मध्यं॥ वृत्तत्कटी नागलकता नग्नताछिद्रि
काणिता। कलोक्तिरिंगणाद्यं च कौमारे सति मध्यमे॥ यथा। विचलदलकरुद्धभ्रूतटी चंचलाक्षी

रसा०

कलवचनमुदंचन्नूतनश्रोत्ररंध्री। अलघुरवितरिंगं गोकुले दिग्दुकूलं तनयममृतसिंधौ प्रेक्ष्य मा
तान्यमंक्षीत्॥ घ्राणस्पर्शि खरे मुक्ता नवनीतं करांबुजे। किंकिण्यादि च कट्यादौ प्रसाधनमितोदि
तं॥ यथा॥ क्वणितकनककिंकिणीकलापं स्मितमुखमुज्ज्वलनासिकाग्रमुक्तं। करधृतनवनीतपिं
डमग्रे तनयमवेक्ष्य ननंद नंदपत्नी॥ अथ शैशवं॥ अत्र किंचित्स्फुरांमध्यमीषत्प्रथिमोन्मनागुरः
। शिरश्च काकपक्षाढ्यं कौमारे स्वरमे सति॥ यथा। समनागुपचीयमानमध्यः प्रथिमोपक्रमभृच्छि
क्षाणार्थिवक्षाः। दधदाकुलकाकपक्षलक्ष्मीं जननीस्तंभयति स्म दिव्यडिंभः॥ घटीफणापप

श्री०

टी चात्र किंचिद्वन्यविभूषणं। लघुवेत्रकरत्वादि मंडनं परिकीर्तितं। वत्सरक्षा व्रजाभ्यर्णे वयस्यैः
सह खेलनं। पावशृंगदलादीनां वादनाद्यत्र चेष्टितं॥ यथा॥ शिखंडकृतशेखरः फणापटीकटी
रे दधत् करे च लगुडीं लघुं स वयसां कुलैरावृतः। अवन्निहसितकृतकरीन् परिसरे व्रजस्य प्रियेसु
तस्तव कृतार्थयत्यहह पश्यनेत्राणि नः॥ अथ पौगंडं॥ पौगंडादिषु रैवोक्तौ तेन सीक्ष्ण्यलिख्यते
॥ यथा। प्रथिपथि सुरभीणामंशुकोत्तंसि मूर्द्धा धवलिमयुगपांगो मंडितः कंबुकेन। लघुलघुप

९०

(निकट)

क ४

(वत्सान्)२

रिगुंजन्मंजुमंजीरयुग्मंव्रजन्तु विममवन्न४कच्छदेशादुपैति॥ अथकैशोरं॥अरूणिमयुगपांगस्तु
गवक्ष४कपाटीविलुठदमलहारोरम्यरोमावलिश्री४पुरुषमणिरयंमेदेवकिश्यामलांगस्त्वदु
दरखनिजन्मानेत्रमुद्धैर्धिनोति॥नचैनयौवनेनापिदीव्यन्गोपेंद्रनंदन४नातिकेवलवात्सल्य
नाजांपौगंडत्नाशिव।सुकुमारेणकौमारवयसासंगतोप्यसौ॥किशोरान्न४सदादासविशेषाणां
प्रभासते॥अथद्वेशावचापल्ले॥यौरीन्निनिन्निविकिरत्यजिरेदधीनिसंतोनिकांहरतिहंततिमे
थर्दंडै।वक्षौक्षिपत्यविरतंनंवनीतिंनवनीतमित्थंमातु४प्रमोदजरसमेवदरिस्तनोति॥यथाव॥
प्रेक्ष्यप्रेक्ष्यदिशा४सशंकमसकृन्मंदंपदंनिक्षिपन्नायातोपलतांतरेस्फुटमितोगवांहरिष्य
नूहरि४।तिष्ठस्वैरमजानती।वमुखरेचौर्यभ्रमद्भूलतंत्रस्यल्लोचनमस्यपश्युषाद्धरंरमांदिहक्षे
मुखे॥अथानुभावा४॥अनुभावा४॥ अनुभावा४शिरोघ्राणंकरेणांगमार्जनं।अशीर्वादो
निदेशाश्चलालनंप्रतिपालनं।हितोपदेशदानाद्यावत्सलेपरिकीर्त्तिता४॥तत्रशिरोघ्राणं
यथा॥श्रीशादमे॥तदीक्षणोत्प्रेमरसाप्लुताशयाज्ञातानुरागागतमन्यवोर्भकान्।गङ्कृद्ये।

रसा०

र्निःपरिरम्भमूर्द्धिघ्राणैरवापुःपरमांमुदंते॥यथावा॥दुग्धेनदिग्धाकुचविच्युतेनसमग्रमाघ्रा
यशिरःसपिञ्छं।करेणगोष्ठेश्वरितुरंगनेयमंगानिपुत्रस्यमुहुर्ममार्ज॥चुंबाश्लेषौतथाह्वानंना
मग्रहणपूर्वकं।उपालंभादयश्चात्रमित्रैःसाधारणाःक्रियाः॥अथसात्विकाः॥नवात्रसात्वि
काःस्तन्यस्रवःस्तंभादयश्चते।तत्रस्तन्यस्रवोयथा।श्रीदशमे॥तन्मातरोवेणुरवत्वरोत्थिता
उद्धृत्यदोर्भिःपरिरभ्यनिर्भरं।स्नेहस्नुतस्तन्यपयःसुधासवंमत्वापरंब्रह्मसुतानपाययन्॥य

श्री०

थावा।ललितमाधवे।निचुलितगिरिधातुस्फीतपत्रावलीकानखिलसुरभिरेणून्क्षालयन्त्यार्य
शोदा।कुचकलशविमुक्तैःस्नेहमाध्वीकमध्यैस्तवनवमभिषेकंदुग्धपूरैःकरोति॥स्तंभादयो
यथा।कथमपिपरिरब्धुंनन्दनमास्तब्धगात्रीकलयितुमपिनालंवाष्पपूरस्नुताक्षी॥नवसुतमुप
देष्टुंरुद्धकंठीसमर्थादधतमचलमासीद्व्याकुलागोकुलेशी॥ अथव्यभिचारिणः॥अत्राप

९१

स्मारसहिताःप्रीतोक्ताव्यभिचारिणः॥तत्रहर्षोयथा॥श्रीदशमे॥यशोदाचमहाभागानष्टलब्ध
प्रजासती।परिष्वज्यांकमुमोचाश्रुकलांमुहुः॥यथावा।विदग्धमाधवे।जितचंद्रपरागचंद्रि

मारोप्य २

(कर्पूर) २

(उशीर) १

कान्तलदेंदीवरवंदनश्रियं।परितोमयिश्रोत्रमाधुरीवदतिस्पर्शमहोस्वस्तव।।अथस्थायी।।संभ्रमा
दिच्युतायास्यादनुकंपेनुकंपितुः।रतिसैवात्रवात्सल्यस्थायीभावोनिगद्यते।।गोपेंद्रादेस्तुवात्सल्य
रतिःप्रौढानिसर्गतः।प्रेमवत्स्नेहवद्भातिकदाचित्किलरागवत्।।तत्रवात्सल्यरतिर्यथाश्रीदशमे।नं
दःस्वपुत्रमादायप्रोष्यागतमुदारधीः।मूर्द्ध्न्यवघ्रायपरमांमुदंलेभेकुरूद्वह।।यथावा।विन्यस्तश्रु
तिपालिरद्यमुरलीनिस्वानशुश्रूषयान्नयः।प्रस्नववर्षिणीद्विगुणितोत्कंठाप्रदोषोदयेगेहाद्
गनमंगनात्पुनरसौगेहंविशंत्याकुलागोविंदस्यमुकुंदर्ब्रजेंद्रगृहिणीपंथानमालोकते।।प्रेम
वद्यथा।प्रेक्ष्यतत्रमुनिराजमंडलैःस्तूयमानमपिमुक्तसंभ्रमा।कृष्णमंकमनिगोकुलेश्वरीप्र
स्नुताविनशानेन्यवीविशत्।।यथावा।देवक्याविद्भुतप्रसूचरितयाप्युन्नम्यमानाननेनूयोनि
र्वसुदेवनंदनतयापुष्ठुष्यमानैर्जनैः।गोविंदे[illegible]हरग्रहोत्सुकतयाक्षेत्रंकुरोरागतेप्रेमावल्ल
वनाथयोरतितरामुल्लासमेवाप्ययौ।।स्नेहवद्यथा।पीयूषद्युतिनिःस्तनाद्विपतितैःक्षीरोत्करै
र्जाह्नवीकालिंदीचविलोचनाद्द्विगनिर्निर्गताञ्जनश्यामलैः।आरान्मध्यमवेदिमापतितयोः।

(अद्रजलद) १ मिदि ३ (मध्यमवेदि प्रयाग) १

च्छिन्नातयोः संगमे। दृष्टास्विव्रजराज्ञितसुतमुखप्रेक्षां स्फुटं वांछसि॥ रागवद्यथा। तुषारत्तिनुषान
लोप्युपरितस्यवद्धस्थितिर्नवितं समवलोकते यदि मुकुंदगोष्ठेश्वरी। सुधांबुधिरपि स्फुटं विकटकाल
कूटत्वलीस्थितायदिनतत्रतेवदनपद्ममुद्वीक्ष्यते॥ अथायोगेनकोठितो॥ वत्सस्यहंतशारदिंदुवि॥
निंदवक्त्रं संपादयिष्यतिकदानयनोत्सवं नः। इत्यच्युतेविहरतिव्रजवाटिकायामुर्वीत्वराज्ञय
तिदिवकनंदिनीनां॥ यथावा। त्रास्तनयं भ्रातुर्मम संदिशाक गांदिनीपुत्रात्त्वेषुवस
तीदृष्टतेत्वां हरेकुंती॥ अथवियोगः॥ श्रीदशमे। यशोदावर्ण्यमानानिसुतस्यचरितान्यसौ॥
शृण्वत्यश्रूण्यवास्राक्षीस्नेहस्नुतपयोधरा॥ यथावा। यातेराजपुरं हरौमुखतटीव्याकीर्णधूम्रा
लकापत्रस्पस्रस्ततनुः कठोरलुठनैर्देहंव्रणं कुर्वती। क्षीर्णागोष्ठमहेंद्रमहिषीहा पुत्रपुत्रेत्यसौ क्रो
शंतीकरयोर्युगेनकुरुते कष्टादुरस्ताडनं॥ बहूनामपिसद्भावेवियोगेत्रतुकेचन। चिंताविषाद
निर्वेदजाड्यदैन्यानिचापलं॥ उन्मादमोहचित्याद्या अत्युद्रेकंव्रजंत्यमी॥ तत्र चिंता। मंदस्यंदमभू
त्कमैरलघुनिःश्वसंदानितमानसा। दृग्द्वंद्वं लोचनयोश्चिरादविचलं व्यानुग्नतारं स्थितौ। निश्वासै

(र.सु.) ५

रघरश्चतेविधुरतांनीतः कदुश्चैवयंनूनंकल्लवराङ्गिपुत्रविरहोद्घूर्णान्निरा।क्रमयसे॥विषादः॥व
दनकमलंपुत्रस्याहंनिमीलतिशोशावेश्ववतरूणिमारंन्नोन्मृष्टंनरम्यमलोकयं।अत्निनववधूयुः॥
कैचामुंनहर्म्याःमवेशयंशिरसिंकुलिशांहंतद्विष्टंश्च फल्कसुतेनमे॥निर्वेदः॥धिगस्तुहृतजीवि
तंनरवधिश्रियोप्यद्यमेययानाहंदूरेःशिरःस्नुतकुचाग्रमाघ्रायते।मुधानवसुधाडुहाम॥
पिगवांपराङ्गंचधिकूसल्लुंचतिनचैवलःसुरभिगंधियासांदधि॥जाड्यं।यःपुंडरीकेक्षणग
मं.८ = तिष्ठतस्तेगोष्ठेकरांतोरूढईन्नोमन्नूरा।तंप्रेक्ष्यदंडस्तिमितेंद्रियान्यदंडाकृतिस्तेजन।नीवन्नूवा।देन्यं।याचते
वतविधातरूदस्वात्वांरदैस्तृणमुदस्यथशोदा।गोचरेसकृदपिक्षणमक्तोरघमस्मरममानयवत्सं॥चाप
लं।किमिविकुरूतेहर्म्येतिष्ठनयंनिरपत्रपोव्रजपतिरितिडूतेमुग्धोयमत्रमुदाजनः॥अहहतनयंप्राणेभ्यो
पिप्रियंपरिहृत्यतंकुलिशाङ्गदयागोष्ठेस्वैरीप्रविश्यसुखीयति॥उन्मादः॥क्वमेपुत्रोनीपाःकथयतकुरंगाः
किमिहवःसवत्राममात्याणिनगत:हुंदंतंमधुकरा॥इतिग्रामंग्रामंभ्रमभरविद्धनायदुपतेनवीतंद्रष्टं
तीदिशिदिशियशोदाविचरति।मोहः॥कुटंविनिमनस्तटेविधुरतांवचःसेकथंप्रसारयद्दृशांमनाकू

उद्वी... वृत्तीं १२

श्रीरसा०

तवसुतःपुरोवर्त्तताइदंगृहद्विणिगेगृहेनकुरुभृन्यमित्याकुलःसशोचतितवप्रसूःयदुकुलेंद्रनंदःपिता॥॥
अथयोगोसिद्धिः॥ विलोक्यरंगस्थलेलब्धसंगमंविलोचनाभीष्टविलोकनंहरिं।स्तन्यैरसिंचन्नवकुंच
कांचलंदेव्यःक्षणादानकदुंदुभिप्रियाः॥ तुष्टिः॥ प्रथमे॥ ताःपुत्रमंकमारोप्यस्नेहस्नुतपयोधराः।ह
र्षविह्वलितात्मानःसिषिचुर्नेत्रजैर्जलैः॥ यथावा॥ ललितमाधवे॥ नयनयोःस्तनयोरपियुग्मतः
परिपतद्भिरसौपयसांझरैः॥ अहहवल्लवराजविलासिनीस्वतनयंप्रणयादभिषिंचति॥ स्थितिः॥
विदग्धमाधवे॥ अहहकमलगंधेरत्रसौंदर्यवृंदेविनिहिततनयनेयंदुन्मुखंदोर्मुकुंद।कुचकल
शमुखाभ्यामेवरक्षौपमंवातवमुहुःरतिहर्षाद्वर्षतिक्षीरधारां॥ स्वीकुर्वतेरसमिमंनाद्यज्ञाअपि
केचन॥ तथाप्राहुः॥ स्फुटंचमत्कारितयावत्सलंचरसंविदुः॥ स्थायीवत्सलतास्येहपुत्राद्यालंबनंम
तं॥ किंच॥ अप्रतीतोहरिरतेःप्रीतस्यस्यादपुष्टता।प्रेयसस्तुतिरोभावोवत्सलस्यास्यनक्षतिः॥ एषार
सत्रयीप्रोक्ताप्रीतादिःपरमाद्भुता।तत्रकेषुचिदप्यस्याःसंकुलत्वमुदीर्यते॥ संकर्षणस्यसख्यंतुप्री
तिवात्सल्यसंगतं।युधिष्ठिरस्यवात्सल्यंप्रीत्यासख्येनचान्वितं॥ आहुकप्रभृतीनीनांतुप्रीतिवा

श्री०

ल २

९३

क्रौं ५

(अंबरं आर्डीकस

सख्यमिश्रिता।जरदाभीरिकादीनांवात्सल्यंसख्यमिश्रितं॥माद्रेयनारदादीनांसख्यंप्रीत्याकरंबि
तं।रुद्रताक्ष्योद्धवादीनांप्रीतिःसख्येनमिश्रिता॥अनिरुद्धादिनप्तॄणामेवंकेचिद्बभाषिरे।एवं
केषुचिदन्येषुविज्ञेयंभावमिश्रणं॥ ॥इतिश्रीरसामृतसिंधौपश्चिमविभागेमुख्यभक्तिरसनिरू
पणेवत्सलभक्तिरसलहरी॥ ४श्री॥ ॥अथमधुराख्यभक्तिरसः॥ आलोचितैर्विभावाद्यैःपुष्टिंनी =त्मो
तासतांहृदि।मधुराख्योभवेद्भक्तिरसोसौमधुरारतिः॥निवृत्तानुपयोगित्वाद्दुरूहत्वादयंरसः॥
रहस्यत्वाच्चसंक्षिप्यविततांगोपिलिख्यते॥तत्रालंबनाः॥अस्मिन्नालंबनःकृष्णःप्रियास्तस्यचसु
भ्रुवः॥तत्रकृष्णः॥असमानोर्द्धसौंदर्यलीलावैदग्ध्यसंपदां।आश्रयत्वेनमधुरेहरिरालंबनोमतः
।यथाश्रीगीतगोविंदे॥विश्वेषामनुरंजनेनजनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलैरुपन
यन्नंगैरनंगोत्सवं।स्वच्छंदंव्रजसुंदरीभिरभितःप्रत्यंगमालिंगितःशृंगारःसखिमूर्त्तिमानिवम
धौमुग्धोहरिःक्रीडति॥अथतस्यप्रेयस्यः॥नवनववरमाधुरीधुरीणाःप्रणयतरंगकरंबि
तांतरंगाः।निजरमणतयाहरिंनडंतीःप्रणमततापरमाद्भुताःकिशोरीः॥प्रेयसीषुहरेरासुप्रव

रावार्णवान्तनवी॥ अस्यारूपं॥ मदचकितचकोरीचारुताचोरदृष्टिर्वदनदमितराकारोहिणीकांतकी
र्त्तिः। अविकलकलधौतोद्धूतिधौरेयकश्रीर्मधुरिममधुपात्रीराजतेपश्यराधा॥ रतिः॥ नर्मोक्तौम
मनिर्मितोरूपरमानंदोऽस्मवायामपि। श्रोत्रस्यांततटीमपिस्फुटमनाधायस्थितोद्यन्मुखी। राधा
लाघवमप्यसादरगिरांत्वंगीत्रिरातन्वतीमैत्रीगौरवतोऽप्यसौज्ञातगुणांमत्प्रीतिमेवादधे॥ अथकृष्ण
रतिर्यथागीतगोविंदे॥ कंसारिरपिसंसारवासनाबंधशृंखलां। राधामाधायहृदयेतत्याजव्रज
सुंदरीः॥ अथोद्दीपनाः॥ उद्दीपनाइहप्रोक्तामुरलीनिस्वनादयः॥ यथापद्यावल्यां॥ गुरुजनग
जनमयशोगृहपतिचरितंचदारुणीकिमपि। विस्मारयतिसमस्तंशिवशिवमुरलीमुरारातेः॥
अथानुभावाः॥ अनुभावास्तुकथितादृगंतेक्षास्मितादयः॥ यथाललितमाधवे॥ कृष्णापांगतरं
गितद्युमणिजासंभेदवाणीकृतेराधायाःस्मितचंद्रिकासुरधुनीपूरेनिपीयामृतं। अंतस्तोषतु
षारसंप्लववलद्व्यालीढतापेक्रमात्क्रांत्वासप्तजगंतिसंप्रतिवयंसर्वोर्ध्वमध्यास्महे॥ अथसा
त्विकाः॥ यथापद्यावल्यां॥ कामंवपुःपुलकितंनयनेधृतास्रेवाचःसगद्गदपदाःसखिकंपिवक्षः

श्री०

(पृथ्वीमंडल) (सुंदर) (अशोक)

।ज्ञातंमुकुंदमुरलीरवमाधुरीतेचेतःसुधांशुवदनेतरलीकरोति॥ अथव्यभिचारिणः। आलस्यौग्र्य
विनासर्वेविज्ञेयाव्यभिचारिणः॥तत्रनिर्वेदोयथापद्यावल्यां॥मामुंचपंचशरपंचशरीशरीरेमा
सिंचसांद्रमकरंदरसेनवायो।अंगानितत्प्रणयभंगविगर्हितानिनालंवितुंकथमपिक्षमतेद्यजी
वः॥हर्षोयथा॥कुवलययुवतीभालेहृदयन्नैभक्षम्भंगैःकुवलयदललक्ष्मीलिंगिमाःस्वांगभासः॥मद
कलकलभेंद्रोल्लंघ्यलीलातरंगःकवलयतिधृतिंमेक्ष्माधराण्यधूर्त्तः॥अथस्थायी॥स्थायीभावो
भवेत्यत्रपूर्वोक्तामधुरारतिः॥यथा।पद्यावल्यां॥भ्रूवल्लितांडवकलामधुराननश्रीःकेकेल्लिकोर
ककरंवितकर्णपूरः।कोयंनवीननिकषोपलतुल्यवेषोवंशीरवेणसखिमामवशीकरोति॥राधा
माधवयोरेवक्वापिभावैःकदाप्यसो।सजातीयविजातीयैर्नैवविछिद्यतेरतिः॥यथा।इतोदूरेरा
ज्ञीस्फुरतिपरतोमित्रपटलीदृशोरग्रेचंद्रावलिरुपरिशैलस्यदनुजः।असव्येराधायांकुसुमि
तलतासंवृततनोदृगंतश्रीर्लीलातडिदिवमुकुंदस्यवलते॥घोराखंडितशंखचूडमजिरस्थे
त्रिवातामसीव्रह्मिष्टध्वसनःश्रामस्तुतिकथाप्रालेयमासिंचति॥अग्रेरामसुधारुचिर्विजयतेकृ

श्रीरस॰

ह्लप्रमोदो चितंराधायास्तदपि प्रफुल्लमनङ्गम्लानिंननावांबुजं॥ सविप्रलंभसंभोगभेदेन द्विविधोमतः॥ तत्रविप्रलंभः॥ सपूर्वरागोमानश्चप्रवासादिमयस्तथा॥ विप्रलंभोवहुविधोविद्वद्भिरिहकथ्यते॥ तत्रपूर्वरागः॥ प्रागसंगतयोर्भावः पूर्वरागोभवेद्द्वयोः॥ यथा पद्यावल्यां॥ अकस्मादेकस्मिन्पथि सखिमयायामुनतटंव्रजंत्या दृष्टो येनवजलधरश्यामलतनुः॥ सदृग्भंग्या किंवा॥ कृतनहि जाने तदिदंमनोमेव्यालोलंक्वचनगृहकृत्येनवलते॥ यथावाश्रीदशमे॥ तथाहमपितच्चित्तोनिद्रांचनलभेनिशि॥ वेदाहंरुक्मिणाद्वेषान्ममोद्वाहोनिवारितः॥ अथमानः॥ मानःप्रसिद्धएवात्र॥ यथाश्री

श्री॰

गीतगोविंदे॥ विहरतिवनेराधासाधारणप्रणयेहरौविगलितनिजोत्कर्षादीर्ष्यावशेनगतान्यतः॥ क्वचिदपिलताकुंजेगुंजन्मधुव्रतमंडलीमुखरशिखरेलीनादीनाप्युवाचरहःसखीं॥ प्रवासः॥ प्रवासःसंगविच्युतिः॥ यथापद्यावल्यां॥ हस्तोदरेविनिहितैककपोलपालेरश्रांतलोचनजलस्नपिताननायाः॥ प्रस्थानमंगलदिनावधिमाधवस्यनिद्रालवोकुतएवसरोरुहाक्ष्याः॥ तथाप्रह्लादसंहितायां उद्धववाक्यं॥ भगवानपिगोविंदःकंदर्पशरपीडितः॥ ननुंक्तेनस्वपितिचचिंतयन्नोह्यहर्निशं

९५

॥अथ संभोगः॥ द्वयोर्मिलितयोर्भोगः संभोग इति कीर्त्यते॥ यथा पद्यावल्यां॥ परमानुरागपरयाथ राध
या परिरंभकौशलविकासिभावया। स तया सह स्मरसभाजनोत्सवं निरवाहयच्छिखिशिखंडशेखरः॥
॥ ॥इति श्रीभक्तिरसामृतसिंधौ पश्चिमविभागे मुख्यभक्तिरसनिरूपणे मधुराख्यभक्तिरसलहरी॥ ॥
॥श्री॥ ॥गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी। तुष्यतु सनातनात्मा पश्चिमभागे रसांबुनिधेः
॥ ॥इति श्रीभक्तिरसामृतसिंधौ मुख्यभक्तिरसनिरूपणो नाम पश्चिमविभागस्तृतीयः॥ ॥श्रीमद्भा
गवताद्यर्हशास्त्रदर्शितयाद्दशा। इयमाविष्कृता मुख्या पंचभक्तिरसीमया॥ भक्तिभरेण प्रीतिं कलय
न्नुररीकृतव्रजासंगः। तनुतां सनातनात्मा भगवान्मयि सर्वदा तुष्टिं॥ रसामृताब्धेर्भागेऽत्र तुरीये तूत्तरा
भिधे। रससप्तविधो गौणो मैत्रीवैरस्थितिर्मितः॥ रसाभासश्च तेनात्र लहर्यो नव कीर्तिताः॥ प्रागत्रा
नियताधाराः कदाचित्क्वाप्युदित्वराः। गौणाभक्तिरसांसप्तलेख्या हास्यादयः क्रमात्। भक्तानां पंच
धोक्तानामेषां मध्यत एव हि॥ क्वापि कः क्वाप्यनेकश्च गौणेष्वालंबनो मतः॥ तत्र हास्यभक्तिरसः॥ व
क्ष्यमाणैर्विभावाद्यैः पुष्टिं हासरतिर्गता। हास्यभक्तिरसो नाम बुधैरेष निगद्यते॥ अस्मिन्नालंबनः

श्रीरसा०

कृष्णस्तथान्योपितदन्वयी।वृद्धाःशिशुमुखाःप्रायःप्रोक्ताधीरैस्तदाश्रयाः।विभावनादिवैशिष्ट्यात्प्रवराश्च
क्वचिन्मताः।तत्रकृष्णोयथा।।यास्याम्यस्यनभीषणस्यसविधंजीर्णस्यशीर्णाकृतेर्मातर्नेष्यतिमांपिधाय
कपटादाधारिकायामसौ।इत्युक्त्वाचकितान्तमद्भुतशिशावुद्वीक्ष्यमाणेहरौहासंतस्यनिरुन्धतोप्यति-
तरांव्यक्तंतदासीन्मुनेः॥अथतदन्वयी॥यद्वेष्टाकृष्णविषयाप्रोक्तःसोत्रतदन्वयी॥यथा॥ददामिदधि
फाणितंविवृणुवक्त्रमित्यग्रतोनिशम्यजरतीगिरंविवृतकोमलौष्ठेस्थिते।तयाकुसुममर्पितंनवमवे-
क्ष्यमुग्धानने।हरौजहसुरुद्धुरंकिमपिसुष्ठुगोष्ठार्भकाः॥यथावा॥अस्यप्रेक्ष्यकरंशिरोमुनिपतेरुपा

श्री०

मस्यमेकथ्यतांतत्कथंहन्तचिरायुरेषभविताकिंधेनुकोटीश्वरः।इत्युक्तेभगवन्मयाद्यपरितश्रीरेणाकिं
चारुणाद्रागाविर्भवदुद्धुरस्मितमिदंवक्त्रंत्वयारुध्यते॥उद्दीपनाहरेस्तादृग्वाग्वेशचरितादयः॥अ-
नुभावास्तुनासोष्ठगंडविस्पंदनादयः॥हर्षालस्यावहित्थाद्याविज्ञेयाव्यभिचारिणः॥साहासरतिरेवा-
त्रस्थायिभावतयोदिता॥ षोढाहासरतिःस्यात्स्मितहसितेविहसितावहसितेच।अपहसितातिह॥
सितकेज्येष्ठादीनांक्रमाद्द्वेद्वे॥विभावनादिवैचित्र्याद्युत्तमस्यापिकुत्रचित्।भवेद्विहसिताद्यंचनाव

ह्नैरितिनिगद्यते॥ तत्र स्मितं॥ स्मितं त्वलक्ष्यदशनं नेत्रगंडविकासकृत्॥ यथा॥ कुंजाभिजरतीखलाद
धिदूरं दधिचौर्यतःसौ प्रधावति जवेन मां सुबलमंजु रक्षां कुरु॥ इति स्खलदुदीरिते द्रवति कांदिशी केरु॥
रोविकस्वरमुखां वुजं कुलमनून्मुनीनां दिवि॥ हसितं॥ तदेव दरसंलक्ष्यदंताग्रं हसितं भवेत्॥ यथा॥
मद्वेशेन पुरःस्थितो हरिरसौ पुत्रो हमेवास्मितेपश्येत्यच्युत जल्पविश्वसिततया सं रंभरज्यद्दृशा॥ मामे
ति स्खलदक्षरे जटिलया व्याकुश्य निष्कासिते पुत्रे प्रांगणतः सखीकुलमनूदंतांशुधौताधरं॥ विहसि
तं॥ सस्वनं दृष्टदशनं भवेद्विहसितं तु तत्॥ यथा॥ मुषाण दधि मेदुरं विफलमंतराशंकसे स निश्वासितड
वरं जटिलयात्र निद्रायते॥ इति ब्रुवति केशवे प्रकटशीर्षदंतस्थलं कृतं हसितमुस्वनं कपटसुप्तया वृ
द्धया॥ अवहसितं॥ तच्चावहसितं फुल्लनासं कुंचितलोचनं॥ यथा॥ लग्नस्ते नितरां दृशोरपि युगे
किं धातुरागो घनः प्रातः पुत्र बलस्यवा किमसितं वासस्त्वयांगे धृतं॥ इत्याकर्ण्य पुरो व्रजेशगृहि
णीवाचं स्फुरन्नासिका दूती संकुचदीक्षणा वहसितं जातानरोद्धुं क्षमा॥ अपहसितं॥ तच्चापहसि
तं साश्रुलोचनं कंपितांसकं॥ यथा॥ उद्दस्य देवर्षिर्दिविदरततरं गंगु तातेशिरायदत्राणुर्दंडोदञ्चनद्दवि

(नयकृते) २

(वानर)

श्रीरसा०

निश्पांडुरयति। स्फुटं ब्रह्मादीनां नटयितरि दिव्ये व्रजशिशोऽङ्गरत्याः प्रसक्तो मानन्दयति तदनै
षीद्दृश्मसौ॥ अतिहसितं॥ सहस्ततालं क्षिप्तांगं तद्वातिहसितं विदुः॥ यथा। हृद्धे त्वं वलिता
ननासि वलिस्ति:प्रेंद्धयस्त्वयोग्यामतस्त्वामुद्वोढुमसौ वलीमुखवरो मांसाध्ययतुत्सुकः॥ आमि॥
विद्रुत धीर्इ्योनदिपरं त्वत्तो वलिध्वंसनादित्युज्जैर्मुखरागिराविजहसुः सोत्तालिकावालिकाः
॥ यस्य हासः सचेत्क्वापि साक्षान्नैवनिवध्यते। तथाप्येषविभावादिसामर्थ्यादुपलभ्यते॥ यथा॥

श्री०

शिंवीलं विकुचासि दद्दुरिवधूर्विसर्ज्जिनासाकृति स्त्वंडीर्यद्दुंडि दृष्टिरोष्टतुलितांगारा मृदंगोदरी॥
का त्वं तः कुटिलेपरास्तिजटिलापुत्रिद्दितौ सुंदरी पुण्येन व्रजसुभ्रुवां तवधृतिं हन्तुं नवंशीक्षमा॥ ए
षहास्यरसस्तत्र केशिकी वृत्तिविस्तृतौ। शृंगारादिरसोऽद्भेदाद्बकुधैवप्रपंचितः॥ ॥इतिश्रीभक्ति
रसामृतसिंधावुत्तरविभागेगौणभक्तिरसनिरूपणे हास्यभक्तिरसलहरी॥ ॥श्री॥ ॥अथाद्भुत
भक्तिरसः॥ आत्मोचितैर्विभावाद्यैः स्वाद्यत्वं भक्तचेतसि। साविस्मयरतिर्नीताऽद्भुतभक्तिरसो
भवेत्॥ भक्तः सर्वविधोप्यत्र घटते विस्मयाश्रयः॥ लोकोत्तरक्रियाहेतुर्विभावस्तत्र केशवः॥

(कपर्दी)

९७

स्रा

तस्य चेष्टाविशेषाद्यास्तस्मिन्नुद्दीपना: मता: ॥ क्रियास्तु नेत्रविस्तारस्तंभाश्रुपुलकादय: ॥ आवेगह
र्षजाड्याद्यास्तत्र स्युर्व्यभिचारिण: ॥ स्थायी स्याद्विस्मयरति: सालोकोत्तरकर्मत: ॥ साक्षादनुमितं
चेति तद्द्विविधमुच्यते ॥ तत्र साक्षात् ॥ साक्षादैंद्रियकं दृष्टं श्रुतं संकीर्त्तितादिकं ॥ तत्र दृष्टं य-
था । एकमेव विविधोद्यमभाजं मंदिरेषु युगपन्निखिलेषु । द्वारकामुनि समीक्ष्य मुकुंदं स्पंदनोज्झि
ततनुर्मुनिरासीत् ॥ यथा वा । क्व स्तन्यगंधि वदनेंदुरसौ शिशुस्ते गोवर्द्धन: शिखररुद्धघन: क्व चायं ।
नो: प्रशस्य सव्यकरकंदुकिताचलेंद्र: खेलन्निव स्फुरति हंत किमिंद्रजालं ॥ श्रुतं यथा ॥ यान्याक्षिपन्न
प्रहरणानि मया: सदेव: प्रत्येकमच्छिनदमूनि शरत्रयेण । इत्याकलय्य युधि कंसरिपो: प्रभावं ।
स्फारेक्षण: क्षितिपति: पुलकी तदासीत् ॥ संकीर्त्तितं यथा ॥ डिंभा: स्वर्णनिभांबरा: घनरुचो जाताश्च
तुर्बाहवो वत्साश्चेति वदन् कृतोस्मि विवश: स्तंभेन संप्रश्नत । आश्चर्यकथया मिव: श्रुणुत नो: प्रत्ये
कमेकैकश: स्तूयंते जगदंडवद्भिरमितैस्तैर्हंत पद्मासने: ॥ अनुमितं यथा ॥ उन्मील्य व्रजशिशवो
दृशं पुरस्ताद्भांडीरं पुनरतुलं विलोकयंत: । सात्मानं पशुपटली च तत्र दावादुन्मुक्ता मनसि चम

की ४

क्रियामवापुः॥ अप्रियादेः क्रियाकुर्यान्नालौकिक्यपि विस्मयं। असाधारण्यपि मनाक् करोत्येव प्रि
यस्य सा। प्रियात्प्रियस्य किमुत सर्वलोकोत्तरोत्तरा। इत्यत्र विस्मये प्रोक्तारत्यनुग्रहमाधुरी॥ ॥इ
ति श्रीभक्तिरसामृतसिंधावुत्तरविभागे गौणभक्तिरसनिरूपणे ऽद्भुतभक्तिरसलहरी॥ ॥श्री॥॥
॥अथ वीरभक्तिरसः॥ सैवोत्साहरतिः स्थायी विभावाद्यैर्निजोचितैः। आनीयमाना स्वाद्यत्वं वीरभ
क्तिरसो भवेत्॥ युद्धदानदयाधर्मैश्चतुर्धा वीर उच्यते। आलंबन इह प्रोक्त एष एव चतुर्विधः। तत्साहस्वे
षभक्तानां सर्वेषामेव संभवेत्। तत्र युद्धवीरः॥ परितोषाय कृष्णस्य दधद्युद्धोत्साहमाहवे। सखा वा बंधुविशे
षो वा युद्धवीर इहोच्यते॥ प्रतियोद्धा मुकुंदो वा तस्मिन्वा प्रेक्षके स्थिते। तदीयेच्छावशेनात्र भवेदन्यः
सुहृद्वरः॥ तत्र कृष्णो यथा॥ अपराजितमानिनं हठाद्युधि लब्ध्वा मत्तिभूयमाधवा। धिनु या मधुना सुहृ
द्गणं यदि नत्वं समरात्परांचसि। यथा वा। संरंभप्रकटीकृतप्रतिभटारंभश्रियोः साद्भुतं कालिंदीपुलिने
वयस्यनिकरैरालोक्यमानस्तदा। अभ्युत्थापितसख्ययोरपि वराहंकारविस्फूर्जितः श्रीदामश्च बकी
द्विषश्च समराटोपः परीयान्नभूत्॥ सुहृद्वरो यथा॥ सखि प्रकरमार्गणान्नगणितान् क्षिपन् सर्वतस्त॥

याद्धलगुडंक्रमाद्भ्रमयतिस्मदामाद्रुती।अमंस्तरचितस्तुतिर्व्रजपतेस्तनूजोप्यमुंसमृद्धपुलकोयथा
लगुडभंजरांतःस्थितं॥प्रायःप्रकृतिशूराणांस्वपक्षैरपिकर्हिचित्।युद्धकेलिसमुत्साहोजायतेप
रमाद्भुतः॥तथाचश्रीहरिवंशे।तथागांडीवधन्वानंविक्रीडन्मधुसूदनः।जिगायभरतश्रेष्ठंकुंत्याःप्रमु
खतोविभुः। कत्थितास्फोटविस्पर्द्धीविक्रमास्त्रग्रहादयः।प्रतियोधस्थिताःसंतोभवंत्युद्दीपनाइह।त
त्रकत्थितंयथा।पिंडीशूरत्वमिहसुबलकैतवेनावल्गंजित्वादामोदरयुधिष्ठिरथामाकृथाःकत्थि
तानि।माद्यन्नेषत्वदलघुभुजासर्पदर्पापहारीमंद्रध्वानोनटतिनिकटस्तोककृष्णःकलापी॥क
त्थिताद्याःस्वसंस्थाश्चेदनुभावाःप्रकीर्त्तिताः।तथैवाहोपुरुषिकाक्ष्वेडिताक्रोशवल्गनं॥असहाये
पियुद्धेच्छासमरादपलायनं।भीताभयप्रदानाद्याविज्ञेयाश्चापरेबुधैः॥तत्रकत्थितंयथा॥प्रोत्सा
हयस्यातितरांकिमिवाग्रहेणमांकेशिसूदनविदन्नपिभद्रसेन।योऽहंबलेनसममत्रसुदुर्बलेन
दिव्यागलाप्रतिभटस्त्वपतेभुजोमे।आहोपुरुषिकायथा॥ध्वांताराटोपेगोपेश्वरजलधिचंद्रेपरि
करंनिबध्नत्युल्लासाद्भुजसमरचर्यासमुचितं।सरोमांचंक्ष्वेडानिविडमुखविभ्रस्यन्नटतःसुदा।

२।४

श्रीरसा०

म्नःसोकंठंजयतिमुकुंदाद्योपुरुषिका॥चतुष्टयेपिवीराणांनिखिलाएवसात्विकाः॥गर्वविगद्धृतिव्री
डामतिहर्षावहित्थिकाः॥अमर्षोत्सुकतासूयास्मृत्याद्याव्यभिचारिणः॥युद्धोत्साहरतिस्तस्मिन्
स्थायिभावतयोदिता॥यास्वशक्तिसहायाद्यैराहार्यसहजापिवा॥जिगीषास्थेयसीयुद्धेसयुद्धो
त्साहईर्यते॥तत्रस्वशक्त्याआहार्योत्साहरतिर्यथा॥अनिष्ठुरप्यद्यपितुर्निदेशादाकृष्यमाणःपुरु
षोत्तमेन॥सस्तोककृष्णोधृतयुद्धकृत्यःप्रोद्यम्यदंडंभ्रमयांचकार॥स्वशक्त्यासहजोत्साहरतिर्यथा
॥शुंडाकारंप्रेक्षमेवाकृदंडंमात्वंन्नैषीःक्षुद्ररेभद्रसेन॥हेलारंभेणाद्यनिर्जित्यरामंश्रीदामाहंकृष्णमे
वाकृयामि॥यथावा॥वलस्यवल्लिनोवल्लाशुकृदनीकमालोडयन्पयोधिमिवमंदरःकृत्तमुकुं
दपक्षयत्नः॥जनविकटगर्जितैः[illegible]र्वधिरयन्नसधीरस्वरोहरेःप्रमदमेकलःसमितिभद्रसेनो
व्यधात्॥सहायेनाहार्योत्साहरतिर्यथा॥मयिवल्लातिभीमविक्रमेभजभंगंनहिसंगराद्दितः॥इ
तिमित्रगिरावरूथपःसविरूपंविरुवन्नहरिंययौ॥सहायेनसहजोत्साहरतिर्यथा॥संग्रामका
मुकभुजःस्वयमेवकामंदामोदरस्यविजयायकृतीसुदामा॥साहाय्यमत्रसुवलःकुरुतेवली

श्री०

युद्धे

९७

वेर्ज्जितोमणिर्जटिलितोवरहाटकेन।सुहृद्देवप्रतिभटोवीरेक्रूरस्यनन्दवरिः॥सभक्तक्रोन्मकारित्वाद्रौ
द्रेत्वालंवनोरसे।रागाभावोहृगादीनांरौद्रादस्यविभेदकः॥ अथदानवीरः॥ द्विविधोदानवीरः
स्यादेकस्तत्रवक्तुप्रदः।उपस्थितदुरापार्थत्यागीचापरउच्यते॥तत्रवक्तुप्रदः॥सहसादीयतेये
नस्वयंसर्वस्वमप्युत।दामोदरस्यसौख्यायप्रोच्यतेसवक्तुप्रदः॥संप्रदानस्यवीक्षाद्याअस्मिन्नुद्दी
पनामताः।वांछिताधिकदातृत्वंस्मितपूर्वाभिभाषणं।स्थैर्यदाक्षिण्यधैर्याद्याअनुभावाइहोदि
ताः।वितर्कौत्सुक्यहर्षाद्याविज्ञेयाव्यभिचारिणः॥दानोत्साहरतिस्त्वत्रस्थायिभावतयोदिता॥
प्रगाढास्थैर्यसीदिश्यादानोत्साहइतीर्यते।द्विधावक्तुप्रदोप्येषविद्वद्भिरिहकथ्यते।स्यादाभ्यु
दयिकस्त्वेकःपरस्तत्संप्रदानकः॥तत्राभ्युदयिकः।कृष्णस्याभ्युदयार्थंतुयेनसर्वस्वमर्प्य
ते।अर्थिभ्योब्राह्मणादिभ्यःसआभ्युदयिकोभवेत्॥यथा।व्रजपतिरिहसूनोर्जातकार्थेतथासौव्य
तरदमलचेताःसंचयंनैचकीनां।पृथुरपिनृगकीर्त्तिःसांप्रतंसंवृतासीदितिनिजगदुरुच्चैर्नू
सुरायेनन्दनाः॥अथतत्संप्रदानकः॥ज्ञातायहरयेस्वीयमहंताममतास्पदं।सर्वस्वंदीयतेयेनसस्यो

(सुवर्णेन) २

श्रीरसा०

त्तसंप्रदानकः। तद्दानं प्रीतिपूजाभ्यां निवेदितमुदितं द्विधा॥ तत्र प्रीतिदानं। प्रीतिदानं तु तस्मै यद्दद्या
दुद्धादिरूपिणे॥ यथा। वार्चिकीं वैजयंतीपटपुरुमुरटोज्ज्वासुरंगं भूषणानां श्रेणिं माणिक्यमानां गजर
थतुरगान् कर्बुरान् कर्बुरेण। दत्वा राज्यं कुटुंबं स्वमपि भगवते दिक्षुरथ्यान्यदुर्ज्ञैर्देयं कुत्राप्यदृष्ट्वा म
खसदसितदावाकुलः पांडवो भूत्॥ पूजादानं॥ पूजादानं तु तस्मै यद्विप्ररूपाय दीयते॥ यथा ऽष्टमे॥
यज्ञेति यज्ञक्रतुभिर्यमादृता भवंतमाम्नायविधानकोविदाः। स एष विष्णुर्वरदोस्तु वा परो दास्याम्यमुष्मै
क्षितिमीप्सितां मुने॥ यथा वा। दशरूपके॥ प्रियापयोधरोत्संगकुंकुमारुणितोदरैः। वलिनैव सयेना

श्री०

स्येनिद्रापात्रीकृतः करः॥ अथ उपस्थितदुरापार्थत्यागी॥ उपस्थितदुरापार्थत्यागस्सो येन नेष्यते। ह
रिणा दीयमानेपि वैरस्तुष्टेन दुर्लभः। पूर्वतोत्र विपर्यस्तकारकत्वं द्वयोर्भवेत्॥ अस्मिन्नुद्दीपनाः कुल्लरू
पालापस्मितादयः। अनुभावास्तदुत्कर्षवर्णनद्रढिमादयः॥ अत्र संचारिता भूमाद्धृतेरेव समीक्ष्यते॥
त्यागोत्साहरतिर्धीरैः स्थायीभावस्समोदितः। अलीवाशयता प्रौढात्यागोत्साहस्तदीर्यते॥ यथा हरिभ
क्तिसुधोदये॥ स्थाने नानिकामस्तपसि स्थितोहं त्वां दृष्टवान् साधुमुनीन्द्रगुह्य। काचं विचिन्वन्निव दिव्य

लक्ष्मी ६

१००

सार्वद्यादिस्तुषतावरः।

रत्नं स्वामिन् कृतार्थोस्मि वरं न याचे॥ यथा वा॥ तृतीये। नात्यंतिकं विगणयंत्यपि ते प्रसादं किं वन्यदर्पितम
यं भृवतन्न यैस्ते। येंगत्वदंघ्रिशरणाभवतः कथायाः कीर्त्तन्यतीर्थयशसः कुशला रसज्ञाः॥ अयमेव न
वनुद्धैः प्रोद्भाव विशेषभाक्। धुर्यादीनां तृतीयस्य वीरस्य पदवीं व्रजेत्॥ अथ दयावीरः॥ कृपार्द्रहृद
यत्वेन खंडशो देहमर्पयन्। कृपायाच्छन्नरूपाय दयावीर इहोच्यते॥ उद्दीपनाद्यस्तु प्रोक्तास्तदार्त्तिव्यंजना
यत्वेन खंडशोदेहमर्पयन्॥ ... आश्वासनोक्तयः स्थैर्यमित्याद्यास्तत्र विक्रियाः॥ औ
दयः॥ निजप्राणव्ययेनापि विपन्नत्राणशीलता। आश्वासनोक्तयः स्थैर्यमित्याद्यास्तत्र विक्रियाः॥ औ
सुक्यमतिहर्षाद्या ज्ञेयाः संचारिणो बुधैः॥ दयो सा हरति स्त्वत्र स्थायिभावतदीर्यते। दयोद्रेकमहुत्सा
हो दयो सा हर इहोदितः॥ यथा॥ वंदे कुड्मलितांजलिर्मुकुरहं वीरं मयूरध्वजं येनार्द्धकपटं द्विजाय वपुषः
कं सद्विषेदिस्सता। कष्टं गरुडदिकाकुलोस्मि कथनारत्नादहो धीमता सोल्लासं क्रकचेन दारितमभूत्यत्नी
सुताभ्यां शिरः॥ हरेश्चेत्तत्त्वविज्ञानं नैवास्य घटते दया। तदभावे वसो दानवीरेंतर्भवति स्फुटं॥ वे
स्लवत्वाद्गतिः कृष्णे कृयते नेन सर्वदा। कृतात्र द्विजरूपे चन्नक्तिस्तेनास्य नत्कृता॥ अंतर्भवं वदंतोस्य
दानवीरे दयात्मनः॥ वोपदेवादयो धीरा वीरमाचक्षते त्रिधा॥ अथ धर्मवीरः॥ कृष्णैकतोषणे धर्मेयः सदा

(इङ्के) ४

श्रीरसा०

परिनिष्ठितः प्रायेण धीरशांतस्तु धर्मवीरः स उच्यते ॥ उद्दीपना इह प्रोक्ताः सच्छास्त्रश्रवणादयः । अ
नुभावा नयास्तिक्यसहिष्णुत्वयमादयः । मतिस्मृतिप्रभृतयो विज्ञेया व्यभिचारिणः ॥ धर्मोत्साहरतिर्धी
रैः स्थायीभाव इहोच्यते । धर्मैकांतिनि निवेशास्तु धर्मोत्साहो मतः सतां ॥ यथा । वदान्निरतिर्दित्सून् कु
र्वता सर्वतंतून् पुरमनि पुरुहूतो नित्यमेवोपहूतः । दनुजदमन तस्याः पांडुपुत्रेण गंडः सुचिरमरवि
शच्याः सव्यहस्तांकशायी ॥ यज्ञः पूजाविशेषोस्य मुख्याद्यंगानि वैष्णवैः । ध्यात्वेंद्राद्याश्रयत्वेन यदे
ष्टाहुतिरर्प्यते । अयं तु साक्षात्तस्यैव निदेशात्कुरुते मखान् । युधिष्ठिरोम्बुनिधिः प्रेष्ठां महाभागवतोत्त
मः ॥ दानादित्रिविधं वीरं वर्णयंतः परिस्फुटं । धर्मवीरं न मन्यंते कति चिद्धनिकादयः ॥ ॥ इति श्रीभ
क्तिरसामृतसिंधावुत्तरविभागे गौणभक्तिरसनिरूपणे वीरभक्तिरसलहरी ॥ ॥ अथ करुणभ
क्तिरसः ॥ आत्मोचितैर्विभावाद्यैर्नीता पुष्टिं सतां हृदि । भवेच्छोकरतिर्भक्तिरसोयं करुणाभिधः ॥
अव्युच्छिन्नमहानंदोप्येष प्रेमविशेषतः । अनिष्टाप्तेः पदतया वेद्यः कृष्णोस्य च प्रियः । तथा ऽनवा
प्ततद्भक्तिसौख्यश्च स्वप्रियो जनः । इत्यस्या विषयत्वेन ज्ञेय आलंबनस्त्रिधा । तत्तद्वेदी च तद्भक्त आश्रय

(यज्ञाङ्ग) ४

श्री०

१०१

(धनिकादयः दशरूपकर्त्रादयः) ५

त्वेनचत्रिधा।सोप्यौचित्तेनविज्ञेयःप्रायःशांतादिवर्जितः॥तत्कर्मगुणरूपाद्याभवंत्युद्दीपनाइह।अ
नुभावामुखशोषोविलापःस्रस्तगात्रता।श्वासक्रोशनभूपातघातोरस्ताडनादयः॥अत्राष्टौसात्त्विका
जाड्यनिर्वेदग्लानिदीनताः।चिंता।विषादश्चौत्सुक्यचापलोन्मादमृत्यवः।आलस्यापस्मृतिव्याधि
मोहाद्याव्यभिचारिणः।हृदिशोकतयांशोनुगतापरिणतिंरतिः।उक्ताशोकरतिःसैवस्थायीभावइ
होच्यते॥तत्रकृष्णोयथा।श्रीदशमे।तंनागभोगपरिवीतमदृष्टचेष्टमालोक्यतत्प्रियसखाःपशुपाभृ
शार्त्ताः।कृष्णेर्पितात्मसुहृदर्थकलत्रकामादुःखानुशोकभयमूढधियोनिपेतुः॥यथावा।फणीन्द्रदम
वगाढेदारुणीपिंछचूडेस्खलदविरलबाष्पस्तोमधौतोत्तरीया।निखिलकरणवृत्तिस्तंभिनीमाललं
बेविषमगतिमवस्थांगोष्ठराजस्यराज्ञी॥तस्यप्रियजनोयथा।कृष्णप्रियाणामाकर्षशंखचूडेननिर्मि
ते।नीलांबरस्यवक्त्रेदुर्नीलिमानंमुकुंदधे॥स्वप्रियोयथा।हंसदूते।विराजंतेयस्यव्रजशिशुकुल
स्तेयविकलस्वयंभूचूडाग्रेलुलितशिखराःपादनखराः।क्वतानीयानालोक्यप्रकटपरमानंदवि
वशःसदेवर्षिर्मुक्तानपिमुनिगणान्शोचतिभृशं।यथावा।मातर्माद्रिगताकुतस्त्वमधुनाहाक्वासिपं

श्रीरसा०

डोपितैःसांद्रानंदसुधाब्धिरेषयुवयोर्भ्रूदृष्टांगोचरः। इत्युच्चैर्नकुलानुजो। विलपतिप्रेक्ष्यप्रमो
दाकुलो गोविंदस्यपदारविंदयुगलप्रोद्दामकांतिच्छटां॥ रतिंविनापिघटतेहासादेरुद्गमःक्वचि
त्। कदाचिदपिशोकस्यनास्यसंभावनाभवेत्। रतेर्भूम्नक्रशिम्नाचशोकोन्यानक्रशश्चसः। रत्या
सहाविनाभावाकाप्येतस्यविशिष्टता॥ अपिच। कृष्णैश्वर्याद्यविज्ञानंकृतंनैषामविद्यया। किंतु
प्रौढतरप्रेमविशेषेणैवतत्कृतं। अतःप्रादुर्भवन्शोकोलब्धोप्युद्भटतांमुहुः। दुरूहामेवतनुते
गतिंसौख्यस्यकामपि॥ ॥इतिश्रीभक्तिरसामृतसिंधावुत्तरविभागेगौणभक्तिरसनिरू
पणेकरुणभक्तिरसलहरी॥ ॥अथरौद्रभक्तिरसः॥ नीताक्रोधरतिःपुष्टिंविभावाद्यै
र्निजोचितैः। हृदिभक्तजनस्यासौरौद्रभक्तिरसोभवेत्॥ कृष्णोहितोऽहितश्चेतिक्रोधस्यविषय
स्त्रिधा। कृष्णेसखीजरत्याद्याःक्रोधस्याश्रयतांगताः। भक्ताःसर्वविधाएवहितेचैवाहितेतथा॥
तत्रकृष्णेसख्याःक्रोधः। सखीक्रोधोभवेत्सख्याःकृष्णादत्ताहितेसति॥ यथाविदग्धमाधवे
।अंतःक्लेशकलंकिताःकिलवयंयामोद्ययाम्यांपुरंनायंवंचनसंचयप्रणयिनंहासंतथाप्यु

श्री०

२२

१०२

ऊति। अस्मिन्संपुटिते गनीरकपटैरानीरपल्लीविटे हामेधाविनि राधिके तव कथं प्रेमागरीयान
नूनं॥ अथ तत्र जरत्याः क्रोधः॥ क्रोधो जरत्या वध्वादि सर्वं वधे प्रेक्षिते हरौ॥ यथा॥ अरे युवतितस्क
र प्रकटमेव वध्वाः पटस्त्वोरसि निरीक्ष्यते वतननेति किं जल्पसि। अहो व्रजनिवासिनः शृणुत
किं न विक्रोशनं व्रजेश्वर सुतेनमे सुतगृहे ग्निरुन्ध्यापितः॥ गोवर्द्धनं महामल्ल विना ऽन्येषां व्र
जौकसां। सर्वेषामेव गोविंदे रतिः प्रोढा विराजते॥ अथ हितः॥ हितस्त्रिधाऽनवहितः साहसी
चेर्ष्युरित्यपि॥ तत्रानवहितः॥ कृष्ण पालन कर्त्तापितकर्मानिनिवेशातः॥ क्वचित्तत्र प्रमत्तो यः
प्रोक्तो ऽनवहितो त्र सः॥ यथा॥ गत्रिष्टमूढे कुरु मा विलंबं त्वथेन वधिकूपं डितमानिनी त्वं। त्रुद्य
त्पलाशिद्वयमंतराते वद्धः सुतोसौ सखि वंत्र मीति॥ अथ साहसी। यः प्रेरको ऽन्यस्थाने साह
सी स निगद्यते॥ यथा। गोविंदः प्रियसुहृदां गिरैव जातस्तालानां विपिनमितिस्फुटं निशा॥
मान्त्रूने दस्यैपुटित दृष्टिरास्य मेषां डिंभानां व्रजपति गेहिनी ददर्श॥ अथेर्ष्युः॥ ईर्ष्युर्मानधना
प्रोक्ता प्रौढेर्ष्याक्रांतमानसा॥ यथा॥ दुर्मानमंथमथितकथया मिकिं ते दूरं प्रयाहि स विधेतव।

(नन्द) २

श्रीरसा०

जाह्वलीमि।ह्याधिकुप्रियेणचिकुरांचितपिंछकोद्या।निर्मछ्छिताग्रचरणाप्युरुणाननासि॥अथाहितः।
।अहितः स्याद्द्विधा स्वस्य हरेश्चेति प्रभेदतः।तत्र स्वस्याहितः।अहितः स्वस्य सस्याद्यः कृष्णसंबंधवाध॥
कः॥यथा॥कृष्णमुज्झन्नकरुणवलाज्जोष्टतो निष्ठुरस्त्वमामर्यादीयदुकुलन्नुवांन्निधिं रेगांदिनेया।प॥
त्रपाभ्यर्णे त्वयि रथमधिष्ठाय यात्रां विधित्सौ स्त्रीणांप्राणेरपिनियुतशोद्गतयात्राव्यधायि॥अथहरे
रहितः॥अहितस्तु हरेस्तस्य वैरिपक्षो निगद्यते।यथा।हरौश्रुतिशिरःशिखामणिमरीचिनीराजितस्फुर
च्चरणपंकजेप्यवमतिंव्यनक्त्यत्रयः।अयंक्षिपतिपांडवःशमनदंडघोरंहठात्रिरस्यमुकुटोपरिस्फु
टमुदीर्यसव्यंपदं।सोल्लुंठहासवक्रोक्तिकटाक्षानादरादयः।कृष्णाहितहितस्याःस्युरमीउद्दीपना
इह॥हस्तनिष्पेषणंदंतघट्टनंरक्तनेत्रता।दष्टौष्ठतातिभ्रुकुटीभुजास्फालनताडनाः॥तूष्णीकतान
तास्यत्वंनिःश्वासोनुनम्रदृष्टिता।नर्त्सनंमूर्द्धविधुतिर्दृगंतेपाटलच्छविः।अनेदाधरकंपाद्याअनुभा
वाइहोदिताः।अत्रस्तंभादयःसर्वेप्राकदृश्यांतिसात्विकाः।आवेगोजडतागर्वोनिर्वेदोमोहचाप
ले।असूयौग्र्यंतथामर्षश्रमाद्याव्यभिचारिणः।अत्रक्रोधरतिःस्थायीसतुक्रोधस्त्रिधामतः॥

श्री०

१०३

103

(लांगले) ४ (अंगार) ४

कोपोमन्युस्तथारोषस्तत्रकोपस्तुशत्रुगः॥मन्युर्मैत्र्यंधुषुतेपूज्यसमन्यूनास्त्रिधोदिताः॥रोषस्तुदयि
तेस्त्रीणामतोव्यात्तिश्वरत्यसौ।हस्तपेषादयःकोपेमन्यौतूष्णीकतादयः।हृगंतपाटलत्वाद्यारो
षेतुकथिताःक्रियाः॥तत्रवैरिणियथा।निरुध्यपुरमुन्मदेहरिमगाधसत्वश्रियंमृधेमगधभू
पतौक्रिमपिवक्रमाक्रोशति।दृशीकवलितद्विषद्विसरजोगलैर्नुनोदहृदिगलत्प्रवल्लेप्रव
लपिंगलांलांगली॥पूज्येयथा।विदग्धमाधवे॥क्रोशंत्यांकरपल्लवेनवलवान्सद्यःपिध
त्तेमुखंधावंत्यांभयभाजिविस्तृततनुजोरुंधेपुरःपद्धतिं।पादांतेविलुठत्यसौमयिमुकुंदद्ष्टाध
रायांरुषामातश्चंडिमयाशिखंडमुकुटादात्मान्निरद्धःकथं॥समेयथा।ज्वलतिदुर्मुखिमर्मति
र्मुमुरस्तवगिराजटिलेनिटिलेचमे।गिरिधरस्पृशतिस्मकदामदाद्दुहितरंड्वहितुर्ममपामरि
॥न्यूनेयथा।हृतस्वकीयकुचमूर्द्धिमनोहरायहारश्चकास्तिहरिकंठतटीचरिष्णुः॥ना॥प्यत्रपत
स्वकुलकज्जलमंजरीयंकूटेनमांतदपिवंचयतेवधूटी॥अस्मिन्नतादृशोमन्यौवर्त्ततेरत्यनु
ग्रहः॥उदाहरणमात्रायतथाप्येषनिर्शितिः॥क्रोधाश्रयाणांशत्रूणांचैद्यादीनांस्वभावतः॥

(रक्ता) ५

(तुमाग्निः) ४

(वीरास) ८

श्रीरसा०

क्रोधोरतिविनाभावान्भक्तिरसतांव्रजेत्॥ ॥इतिश्रीभक्तिरसामृतसिंधावुत्तरविभागेगौणभक्तिर
सनिरूपणेरौद्रभक्तिरसलहरी॥ ॥अथभयानकभक्तिरसः॥ वक्ष्यमाणैर्विभावाद्यैःपुष्टिंभयर
तिर्गता।भयानकाभिधोभक्तिरसोधीरैरुदीर्यते॥कृष्णश्चदारुणाश्चेति तस्मिन्नालंबनाद्विधा।
अनुकंप्येसुसागःसुकृष्णस्तस्यतुबंधुषु॥दारुणाःस्नेहतःशश्वत्तन्निष्ठाभिदर्शिषु।दर्शनाच्छ्रव
णाच्चैतेस्मरणाच्चप्रकीर्त्तिताः॥तत्रानुकंप्येषुकृष्णोयथा॥किंश्रुत्वाकृद्दनोसिमुंचस्वचितंचित्ते
पृथुंवेपथुं।विश्रम्यप्रकृतिंभजस्वनमना गण्यास्तिमंतुस्तव।कृष्णंप्रक्षितमृत्तराजरभसाद्धिस्त्री
र्यवीर्यंत्वयापृथ्वीप्रत्युतयुद्धकौतुकमयीसेवैवमेनिर्मिता॥यथावा।मुरुमथनपुरस्तेकोभुजं
गस्तपस्वीलघुरहमितिकार्षीमस्मदीनायमन्यं गुरुरयमपराधस्तथ्यमज्ञानतोभूदशरण
मतिमूढंरक्षरक्षप्रसीद॥वंधुषुदारुणादर्शनाद्यथा।हाकिंकरोमितरलंभवनांतरालेगो
पेंद्रगोपयवलादुपरुध्यवाले।क्ष्मामंडलेनसहचंचलयन्मनोमेशृंगाणिलंघयतिप
श्यतुरंगदैत्यः॥श्रवणाद्यथा।श्रुत्वातीतुरगदानवंरुषागोकुलंकिलविशांतमुद्धुरं॥व्रागमूत्तनय

श्री०

(अपराधः)९

१०४

रक्षणाकुलाश्रुषदास्यजलजाक्षाव्रजेश्वरी॥स्मरणाद्यथा।विरमविरममातःपूतनायांप्रसंगात्तनुमिय
मधुनापिस्मर्यमाणाधुनाति।कवलयितुमिवांकीकीकृत्यवालंघुरंतीवपुरतिपरुषंयाघोरमाविश्च
कार॥विभावस्यत्रुकुद्याद्यातस्मिन्नुद्दीपनामताः॥मुखशोषणमुच्छ्वासःपराहत्यवलोकनं।स्वसंगो
पनमुद्घूर्णंशरणान्वेषणंतथा।क्रोशनाद्याःक्रियाश्चात्रसात्विकाश्चाश्रुवर्जिताः॥इहसंत्राससमरणवा
पल्लावेगदीनताः।विषादमोहापस्मारशंकाद्याव्यभिचारिणः॥अस्मिन्भयरतिःस्थायीभयंस्यादप
राधतः।भीषणेभ्यश्चतत्रस्याद्बुद्ध्यैवापराधिता।भक्तानामपरत्रस्यादनुग्राह्यजनान्विना।आकृ॥
त्याचप्रकृत्याचप्रभावेनचभीषणाः।एतदालंबनाभीतिःकेवलप्रेमशालिषु।नारीबालादिषुतथा
प्रायेणात्रोपजायते॥आकृत्यापूतनाद्याःस्युःप्रकृत्याकेशिमुख्यकाः।भीषणास्तुप्रभावेनविरिंचिवि
गिरिशादयः॥सदाभगवतोभीतिंकगताअत्यंतिकीमपि।कंसाद्यारतिशून्यत्वादत्रनालंबनामताः॥॥
॥इतिश्रीभक्तिरसामृतसिंधावुत्तरविभागेगौणभक्तिरसनिरूपणेभयानकभक्तिरसलहरी॥॥
॥श्री॥ ॥अथवीभत्सभक्तिरसः॥॥पुष्टिंनिजविभावाद्यैर्जुगुप्सारतिरागता।असौभक्तिरसोधी

रैवीन्नसाख्यइतीर्यते॥ अस्मिन्नाश्रितशांताद्याधीरैरालंवनामताः॥ यथा॥ पांडित्यं रतैर्हिंडकाध्वनिगतो
यः कामदीक्षाव्रतीकुर्वन्नूपूर्वमशेषषिंङ्गनगरीसाम्राज्यचर्यामनूत्। चित्रं सोयमुदीरयन्हरिगुणा
नुद्वाष्पदृष्टिर्जनोदृष्टेस्त्रीवदनेविकूणितमुखोविष्टम्यनिष्ठीवति॥ अत्रनिष्ठीवनंवक्त्रकूणनंघ्राणसं
वृतिः। धावनंकंपपुलकप्रस्वेदाद्याश्चविक्रियाः॥ इह ग्लानिश्रमोन्मादमोहनिर्वेददीनताः। विषा
दश्चापलावेगजाड्याद्याव्यभिचारिणः। जुगुप्सारतिरत्रस्यात्स्थायीसावविवेकजा। प्रायिकीचेति
कथिताजुगुप्साद्विविधाबुधैः॥ तत्रविवेकजा॥ जातव्यलरतेर्भक्तस्थिरोषस्यतुकस्यचित्। विवेकोत्था
त्तुदेहादौजुगुप्सास्याद्विवेकजा॥ यथा॥ घनरुधिरमयेत्वचापिनद्धेपिसितविमिश्रितविस्रगंधभा
ज्जि। कथमिह रमतांबुधः शरीरेभगवतिदृप्तरतेर्लवेप्युदीर्णे॥ ॥अथप्रायिकी॥ अमेध्यपूत्यनुभ
वाज्जसर्वेषामेवसर्वतः। याप्रायोजायतेसेयंजुगुप्साप्रायिकीमता॥ यथा॥ अस्टक्सूत्राकीर्णेघनशम
लपंकव्यतिकरेवसन्नेषक्लिन्नोजडतनुरहमातुरुदरे। लभेचेतः क्षोभंतवभजनकर्मक्षमतयातदास्मिन्नू
कंसारेकुरुमयिकृपासागरकृपां॥ यथावा॥ घ्राणोद्घूर्णकपूतिगंधविकटेकीटाकुलेदेहलीस्वस्तव्याधि

तयूथगूथघटनानिर्धूतनेत्रायुषि।कारानामनिर्दतमागधयमेनामीवयंनारकोद्विशास्तेस्मृतिमाकलय्य।
नरकध्वंसिन्निरुप्राणिमः॥ लब्धकृष्णरतेरेवसुष्टुपूतंमनस्तदा।त्वन्यत्यन्नद्यलेशोपितनोस्यांरत्यनुग्रहः
।हास्यादीनांरसत्वंयद्गौणत्वेना।पिकीर्त्तितं।प्राचांमतानुसारेणतद्विज्ञेयंमनीषिभिः॥ अमीपंचैव।
शांताद्याह्वरेर्भक्तिरसामताः॥ एवंहासादयःप्रायोबिभ्रतिव्यत्निवारितां॥ ॥इतिश्रीभक्तिरसा
मृतसिंधावुत्तरविभागेगौणभक्तिसनिरूपणेवीभत्सभक्तिरसलहरी॥ ॥अथरसानांमैत्री
वैरस्थितिः॥ अथामीषांक्रमेणैवशांतादीनांपरस्परं।मित्रत्वंशात्रववत्वंचरसानामभिधीय
ते॥शांतस्यप्रीतवीभत्सधर्मवीराःसुहृद्वराः॥ अद्भुतश्चैषविज्ञेयःप्रीतादिषुचतुर्ष्वपि।द्विषं
नस्यशुचिर्युद्धवीरोरौद्रोभयानकः॥सुहृत्प्रीतस्यवीभत्सःशांतोवीरद्वयंतथा।वैरीशुचिर्युद्धवीरोरौद्रस्त्वे
कविभावकः॥प्रेयसस्तुशुचिर्हास्योयुद्धवीरःसुहृद्वराः॥द्विषोवत्सलवीभत्सरौद्राभीष्मश्चपूर्ववत्॥वत्सल
स्यसुहृद्धास्यःकरुणोभीषणस्तथा।शत्रुःशुचिर्युद्धवीरःप्रीतोरौद्रश्चपूर्ववत्॥शुचेर्हास्यस्तथाप्रेयान्सु
हृदस्यप्रकीर्त्तितः॥द्विषोवत्सलवीभत्सशांतरौद्रभयानकाः॥प्राक्षरेकेस्यसुहृदंवीरयुग्मंपरेरिपुं॥मित्र

शृंगारः। ४

श्रीरसा०

हास्यस्यवीभत्सः शुचिप्रेयान्सवत्सलः। प्रतिपक्षस्तुकरुणस्तथाप्रोक्तोभयानकः॥ अद्भुतस्यसुहृद्वीरः पंच
सांतादयस्तथा। प्रतिपक्षोभवेदस्यरौद्रोवीभत्सएवच। वीरस्यत्वद्भुतोहास्यः प्रेयान्प्रीतस्त
थासुहृत्॥ भयानकोविपक्षोऽस्यकस्यचिच्छांतएवच। करुणस्यसुहृद्रौद्रोवत्सलश्चविलोक्यते। वैरीहास्यो
ऽस्यसंभोगशृंगारश्चाद्भुतस्तथा। रौद्रस्यकरुणः प्रोक्तोवीरश्चापिसुहृद्वरः। प्रतिपक्षस्तुहास्योऽस्यशृंगारो
भीषणोऽपिच॥ भयानकस्यवीभत्सः करुणश्चसुहृद्वरः। द्विषस्तुवीरशृंगारहास्यरौद्राः प्रकीर्तिताः। वीभ

श्री०

त्सस्यभवेच्छांतोहास्यः प्रीतस्तथासुहृत्। शत्रुः शुचिस्तथाप्रेयान्ज्ञेयायुक्त्यापरेचते। कथितेभ्यः परे
येसुस्तेतटस्थाः सतांमताः॥ तत्रसुहृत्कृतौ॥ सुहृदामिश्रणंसम्यगास्वाद्यंकुरुतेरसं। द्वयोस्तुमिश्रणे
साम्यंदुःशाकंस्यात्तुलाधृते। तस्मादंगांगित्वेनमेलनंविदुषांमतं। भवेन्मुख्योऽथवागौणोरसोंऽगी
किलयत्रयः। कर्तव्यंतत्रतस्यांगिसुहृदेवरसोबुधैः॥ अथांगित्वंप्रथमतोमुख्यानामिहलिख्यते। अं
गतांयत्रसुहृदोमुख्यागौणाश्चवित्रजंति॥ तत्रशांतेऽङ्गिनिप्रीतस्यांगतायथा। जीवस्फुलिंगवह्नेर्मह
सोघनचित्स्वरूपस्य। तस्यपदांबुजयुगलंकिंवासंवाहयिष्यामि॥ अत्रमुख्येऽङ्गिनिमुख्यस्यांगता॥

१०६

१(नर्मपृष्ठके)(शांती)२

तत्रैववीभत्सस्ययथा॥अहमिहकफशुक्रशोणितानांपृथुकुतुपेकुतुकीरतःशरीरे।शिवशिवपरमात्म
नोदुरात्मासुखवपुषःस्मरणेपिमंथरोस्मि॥अत्रमुख्यएवगौणस्य॥तत्रैवप्रीतस्याद्भुतवीभत्सयोश्चयथा॥
छित्वास्मिन्पिशितोपनद्धरुधिरक्लिन्नेमुदंविग्रहेप्रीत्युत्सिक्तमनाःकदाहमसकृद्दुस्तर्कचर्यासदं।आ
सीनंपुरटासनोपरिपरंब्रह्मांवुदश्यामलंसेविष्येचलचारुचामरमरुत्संचारचातुर्यतः।अत्रमुख्यएवमु
ख्यस्यगौणयोश्च।अथप्रीतेश्शांतस्ययथा॥निरविद्यतयासपद्यहंनिरवद्यःप्रतिपद्यमाधुरी।अरविंद
विलोचनंकदाप्रभुमिंदीवरसुंदरंनजे॥अत्रमुख्योमुख्यस्य॥तत्रैववीभत्सस्ययथा।हृणीयमानोक्षीणः
सन्स्मरणेहरिणीदृशां।प्रभोदेवजयेत्युद्धैर्नटन्नटतिवैष्णवः॥अत्रमुख्यगौणस्य॥तत्रैवशांतवीरवीभ
त्सानांयथा।तनोतिमुखविक्रियांयुवतिसंगरंगोदयेनत्वपातिनसर्वतःसुखमयेसमाधावपि।नसिद्धि
षुचलालसांवहतिदीयमानास्वपिप्रभोतवपदार्चनेपरमुपेतितृष्णांमनः।अत्रमुख्योमुख्यस्यगौणयो
श्च।अथप्रेयसिशुचेःयथा॥धन्यानांकिलमूर्द्धन्याःसुवलामूर्द्ध्नावलाः।अधरंपिंछचूलस्यचलाश्चुलु
कयंतियाः॥अत्रमुख्योमुख्यस्य।तत्रैवहास्यस्ययथा।दृशास्तरलितेरलंव्रजनितंबमुग्धेव्रजंवितर्कयसि

प्र श्रीरसा०

(अशोक) २

ल

मांयथानहितथास्मिकिंनुहरिणा।इतीरयतिमाधवेनवविलासिनीछद्मन्मनाददर्शसुवलोवशांद्धिक
चद्दृष्टिरस्याननं॥अत्रमुख्येगौणस्य॥तत्रैवशुचिहासयोर्यथा।मिहिरदुहितुरुच्चैर्द्दुकूलमंशुतीरं प्र
विशतिसुवलोयंराधिकावेशगूढः।सरसतमलिपश्यनर्मभिरम्युत्थितैर्मेस्मितविकसितगंडस्थी
यमास्यंवृणोति॥अत्रमुख्येमुख्यगौणयोः॥अथवत्सलेकरुणस्य।निरातपत्रकांतारेसंततंमुक्तपादुकः
।वत्सान्नरतिवत्सोमेहंतसंतप्यतेमनः॥अत्रमुख्येगौणस्य॥तत्रैवहासस्ययथा॥पुत्रस्तेनवनीतपिंड
मतनुमुञ्चन्ममांतर्गृहाच्छिन्यस्यापससारतस्यकणिकांनिद्राणडिंभानने।इत्युक्त्वाकुलवृद्धयासुतमु
खेदृष्टिंविभुग्नभ्रुणिस्मेरांनिदधतीसदानवतुवःक्षेमायगोष्ठेश्वरी॥अत्रापिमुख्येगौणस्य॥तत्रैव
नयानकाद्भुतहासकरुणानांयथा।कंप्रास्वेदिनिचूर्णकुंतलतटेस्फारेक्षणातुंगितेसव्यदोष्णिवि
कासिगंडफलकालीलास्यनंगीशाते।विन्नाणस्यहरेर्गिरिंद्रमुदयद्बाष्पाविरोद्धुस्थितोपातुप्र
स्नवसिच्यमानसिचयाविश्वंव्रजाधीश्वरी॥अत्रमुख्येचतुर्णांगौणानां॥केवलेवत्सलेनास्तिमुख्य
स्यखलुसौहृदं।अतोत्रवत्सलेतस्यनितरांलिखितांगता॥अथोज्ज्वलेप्रेयसः।यथा।मद्वेषश्रीलि
तनोःसुवलस्यपश्यविन्यस्यमंक्षुन्नवमूर्द्धिनिभुजंमुकुंदः।रोमांचकंचुकजुषःस्फुटमस्यकर्णेसंदे

श्री०

१०७

२ कृष्णागि

शामर्पयतितन्विमदर्थमेव॥अत्रमुख्येमुख्यस्य॥तत्रैवहास्यस्ययथा॥स्वस्मास्मितवनिर्दयपरिचिनोषि
नत्वंकुतःकुरुप्रणयनिर्भरंममसुंकंठिकंठग्रहं॥इतिब्रुवतिपेशालंयुवतिवेशगूढेहरौकृतस्मित
मन्निजयागुरुप्रुरस्तदाराधया॥अत्रमुख्येगौणस्य॥तत्रैवप्रेयोवीरयोर्यथा॥मुकुंदोयंवंदाव
लिवदनचंद्रेचटुलन्नेस्मरस्मेरामाराद्दृशामसकलामर्पयतिच॥भुजामंसेसख्युःपुलकिनिदधा
नःफणिनिनाम्निनाश्क्ष्वेडाग्निर्द्विषदनुजमुधोजयतिच॥अत्रमुख्येमुख्यगौणयोः॥अथगौणानामं
गिता॥हास्यादीनांतुगौणानांयदुदाहरणीकृतं॥तेषामंगितावक्तामुख्यानांचतथांगता॥तथ
प्यल्पविशेषायकिंचिदेवविलिख्यते॥अथहास्यंगिनिशुचेरंगता॥यथा॥मदनाञ्चितयात्रिव
क्रयाप्रसन्नंपीतपटांचलेधृते॥अदधाद्विनतंजनाग्रतोहरिरुत्फुल्लकपोलमाननं॥अत्रगौणेंगि
निमुख्यस्यांगता॥वीरेप्रेयसोयथा॥सेनान्यंविजितमवेक्ष्यतद्रसेनंमांयोद्धुंमिलसिपुरःकथंवि
शाल॥रामाणांशतमपिनोद्भटोरुधामाश्रीदामागणयतिरत्वमत्रकोसि॥अत्रापिगौणेंगिनिमु
ख्यस्य॥रौद्रेप्रेयोवीरयोर्यथा॥यदुनंदननिंदनोद्धतंशिशुपालंसमरेजिघांसुभिः॥अतिलोहितलो

श्रीरसा०

वनोत्पलैर्जगृहे पांडुसुतैर्वरायुधं॥ अत्र गौणे मुख्यगौणयोः॥ अद्भुते प्रेयो वीरहास्यानां यथा॥ मित्रानी
कहतं गदायुधि गुरूं मन्यं प्रलंबद्विषि यष्ट्याद्दुर्वल्लया विजित्य पुरतः सोल्लुंठमुद्गायतः श्रीदाम्नः शकि
लवीक्ष्य केलिसमराटोपोत्सवे पाटवं कृष्णः फुल्लकपोलकः पुलकवान् विस्फारदृष्टिर्बभौ॥ अ
त्र गौणे मुख्यस्य गौणयोश्च॥ एवमन्यस्य गौणस्याङ्गेया कविभिरिंगिता॥ तथात्र मुख्यगौणानां रसा
नामंगतापि च॥ सोंगी सर्वातिगो यः स्यान्मुख्यो गौणोथवा रसः॥ स एवांगं भवेदंगिपोषी संचारितां व्रज
न्॥ तथा च नाट्याचार्याः पठंति॥ एक एव भवेत्स्थायी रसो मुख्यतमो ह्रियः॥ रसास्तदनुयायित्वादन्य

श्री०

स्तु व्यभिचारिणः॥ श्रीविष्णुधर्मोत्तरे च॥ रसानां समवेतानां यस्य रूपं भवेद्बहु॥ समंतव्यो रसः स्था
यी शेषाः संचारिणो मता इति॥ स्तोकाद्विभावनाज्जातः संप्राप्य व्यभिचारितां॥ पुष्णन्निजप्रभुं मुख्यं गौ
णस्तत्रैव लीयते॥ प्रोद्यन्विभावनोत्कर्षात्पुष्टिं मुख्येन लंभितः॥ कुंचता निजनाथेन गौणोप्यंगि
त्वमश्नुते॥ मुख्यस्त्वंगत्वमासाद्य पुष्णन्निंद्रमुपेंद्रवत्॥ गौणमेवांगिनं कृत्वा सिगूढनिजवैभवः॥
अनादिवासनोद्भासवासिते भक्तचेतसि॥ भात्येव न तु लीयेंत गौणो व्यभिचरन्निव॥ अंगी मुख्यः स्व

१०८

(सर्वातिगो)८

[illegible] स्यादेकसंचारिगौणवत्॥ १

मात्मानन्नावेस्तौरन्निवर्द्धयन्।सज्जातीयविजातीयैःस्वतंत्रःसन्विराजते।यस्यमुख्यस्ययोभक्तो
भवेन्नित्यनिजाश्रयः॥अंगीसएवतत्रस्यान्मुख्योप्यन्योंगतांव्रजेत्।किंच।आस्वादोद्रेकहेतुत्वमंग
स्यांगत्वमंगिनि।तद्विनातस्यसंपातोवैफल्यायैवकल्पते।यथामृष्टरसालायांयवसादेःकथंचन
।तज्जर्वणेभवेदेवसत्तृणाभ्यवहारिता॥अथवैरिस्थिती॥जनयत्येववैरस्यंरसानांवैरिणायुतिः।सुमृ
ष्टपानकादीनांक्षारतिक्तादिनायथा॥तथाहि।ब्रह्मज्ञायानिष्कलंमेव्यतीतःकालोभूयान्महासमा
धिव्रतेन।सांद्रानंदंतन्मयाब्रह्ममूर्त्तेकोणेनाक्ष्णःसंप्रक्षाविसव्यस्यनेष्टि।अत्रशांतस्योज्ज्वलेनवैर
स्यं॥क्षणमपिपिष्टकोटिवत्सलेतंसुरमुनिवंदितपादमिंदिरेशं।अनिलषतिवरांगनानखांकस्फु
रिततनुंप्रतनुमीक्षितुंमनोमे॥अत्रप्रीतस्योज्ज्वलेनैव॥दोर्भ्यामर्गलदीर्घाभ्यांसखेपरिरभस्वमां।शि
रःकृष्णतवाघ्रायविहरिष्येततस्त्वया।अत्रप्रेयसोवत्सलेन॥यंसमस्तनिगमाःपरमेशंसात्वता
स्तुभगवंतमुशंति।तंसुतेतिवतसाहसिकीत्वांव्याजिहीर्षतुकथंममजिह्वा॥अत्रवत्सलस्यप्रीतेन
।तडिद्विलासतरलानवयौवनसंपदः।अद्यैवहृतितेनत्वंमयारमयमाधवं॥अत्रोज्ज्वलस्यशां।

श्रीरसा०

तेन॥चिरंजीवेतिसंयुज्यकाचिदाशीर्निरच्युतं।केलिसस्थाविलासेनकामुकीपरिषस्वजे॥अत्रश्रु-
चेर्वत्सलेन॥श्रुचेःसंबंधगंधोपिकेवलेयदिवत्सले।क्वचिद्भवेत्ततःसुष्टुवैरस्यायैवकल्पते॥पि-
शितास्वमयीनाहंसत्यमस्मितवोचिता।स्वापांगविद्धांश्यामांगरूपयांगीकुरुष्वमां॥अत्रश्रुचेर्वीभ-
त्सेन॥एवमन्येपिविज्ञेयाप्राज्ञैरसविरोधिता।प्रायेणयंरसाभासकक्षायांपर्यवस्यति।किंच॥
द्वयोरेकतरस्येष्टवाध्यत्वेनोपवर्णने॥स्मर्यमाणतयाप्युक्तौसाम्येनरचनेपिच।रसांतरेणवां-
तद्वैंतिटस्थेनप्रियेणवा॥विषयाश्रयनैक्येचगौणेनद्विषतासह।इत्यादिषुनवैरस्यंवैरिणो-
र्जनयेद्युतिः॥तत्रैकतरस्यवाध्यत्वेनवर्णने॥यथाविदग्धमाधवे॥प्रत्याहृत्यमुनिःक्षणंविष-
यतोयस्मिन्मनोधित्सतेवालासौविषयेषुधित्सतिततःप्रत्याहरंतीमनः।यस्यस्फूर्त्तिलवाय
हृतहृदयेयोगीसमुत्कंठतेमुग्धेयंकिलतस्यपश्यहृदयान्निष्क्रांतिमाकांक्षति॥वाध्यत्वमत्र
शांतस्यश्रुचेरुत्कर्षवर्णनात्।स्मर्यमाणत्वेयथा॥सएषवैहासिकताविनोदैर्व्रजस्यहृद्यमसीवि-
धाता।फणीश्वरेणाद्यविकृष्यमाणस्तनोतिहानःपरिदेवनानि॥साम्येनरचनेयथा॥विश्रांत-

श्री०

१०९

हास्य २

षोडशकला निर्विकल्पा निरावृत्तिः सुखात्मा नवती राधेमुक्तिश्रीरिव राजते ॥ यथा वा राधाशां
तिरिवोन्निद्रं निर्निमेषेक्षणं च मां । कुर्वती ध्यानलग्नं च वासयत्यद्रिकंदरे ॥ रसांतरेणांतर्द्धे यि
था । कर्णामृते ॥ विचित्रपत्रांकुरशालिबालास्तनांतरं यामवनांतरं वा ॥ अपास्य वृंदावनपाद
लास्यमुपास्यमन्यन्न विलोकयामः ॥ त्वं कासि शांता किमिलांतरिक्षे द्रष्टुं परं ब्रह्म कुतस्तता
क्षी । अस्याति रूपा किमिवाकुलात्मा रत्नेः समारं ननिदास्मरेण ॥ अत्राद्भुतेनांतर्द्धिः ॥ विषयनि
न्नत्वे यथा श्रीदशमे ॥ त्वक्श्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफपित्त
वातं । जीवच्छवं भजति कांतमतिर्विमूढा या ते पदाब्जमकरंदमजिघ्रती स्त्री ॥ यथा वा विदग्धमा
धवे ॥ तस्याः कांतद्युति निवदने मंजुलेयाद्वितीयुमग्मे तत्रास्माकं यदवधि सखे दृष्टिरेषा नि
विष्टा । सत्यं ब्रूमस्तदवधि नवेदिंदुमिंदीवरं च स्मारं स्मारं मुखकुटिलताकारिणीयं द्विणी ॥
या । रत्नयत्र श्रुचिवीनस्य योः आश्रयभिन्नत्वे यथा ॥ विजयिनमजितं विलोक्य रंगस्थलमनु
विसंभृतसांयुगीनलीलं । पशुपसवयसां वपूंषि नेजः पुलककुलं द्विषतां तु कालिमानं ॥ अ

त्रवीरभयानकयोः। विषयाश्रयभेदेपि मुख्येन द्विषता सता संगतिः किल मुख्यस्य वैरस्या-
यैव जायते॥ तत्र विषयभेदे यथा। विमोचयार्गलावंधं विलंवं तातनाचर। यामि काश्यगृहे
सूना मनः श्यामेन मे हृतं। अत्र शुचेः प्रीतेन॥ आश्रयभेदे यथा॥ रुक्मिणीकुचकाश्मीरपंकिलो-
रः स्थलं कदा। सदानंदं परं ब्रह्म दृष्टास्मि विश्पते मया। अत्र शांतस्य शुचिना अनुरक्तधियो भक्ताः
केचन ज्ञानवर्त्मनि। शांतस्याश्रयभिन्नत्वे वैरस्यं नानुमन्वते। किंच। भृत्ययोर्नायकस्यैव नि-
सर्गद्विषिणोरपि। अंगयोरंगिनः पुष्टो नवृंदे कत्र संगतिः॥ यथा। कुमारस्ते मल्लीमुकुलसुकुमा-
रः प्रियतमे गरिष्ठोयं केशीगिरिवदितिमे वेल्लति मनः। शिवं भूयात्यश्यान्नमित तनुजमेधिर्भुजु-
रमुं खलं चुंदन्न कुर्यी वृजमति तरांशालिनमहं। अत्र मिथो द्विषौ वीरभयानकौ वत्सलं पुष्णीतः॥
यथा वा। कंप्रास्वेदिनि चूर्णकुंतल तटे इत्यादि॥ अत्र हास्यकरुणौ वत्सलमेव पुष्णीतः॥ अधि-
रूढे महाभावे विरुद्धैर्विरसायुति। न स्यादित्युज्ज्वले राधाकृष्णयोर्दर्शितं पुरा। क्वाप्यचिंत्यम-
हाशक्तौ महापुरुषशेखरे। रसावलि समावेशः स्वादायैवोपजायते॥ तत्र रसानां विषयत्वे

श्री०

११०

कंपते। ५

यथाल्लल्लितमाधवे॥ दैत्याचार्यास्तथौदास्यविकृतिमरुणतांमल्लवर्याः सखायोगंडोन्नत्यंखले
न्द्राः प्रलयमृषिगणाध्यानमुष्णाश्रुमंबाः। रोमांचं सांयुगीनाः कमपिनवचमत्कारमंतः सुरे
न्द्रालास्यंदास्याः कटाक्षंययुरसि तदृशाः प्रेक्ष्यरंगेमुकुंदं॥ आश्रयत्वेयथा॥ स्वस्मिन्धुर्यप्रमानी
त्रिशुगिरिधृतावुद्यतेषुस्मितास्यस्थूत्कारीदध्निविस्वेप्रणयिषुविवृतप्रोढिरिंद्रेरुणाक्षः। गो
ष्ठेसाश्रुर्विहिनेगुरुषुहरिमखप्रास्यकंपः सपायादासारेस्फारदृष्टिर्युवतिषुपुलकीविभ्रद
र्द्धिर्विभुर्वः॥ ॥इतिश्रीभक्तिरसामृतसिंधावुत्तरविभागेरसानांमैत्रीवैरस्थितिलहरी॥ ॥
॥अथरसाभासाः॥ पूर्वमेवानुशिष्टेनविकलारसलक्षणा। रसाएवरसाभासारसज्ञैरनुकीर्त्ति
ताः॥ स्युस्त्रिधोपरसाश्चानुरसाश्चापरसाश्चते। उत्तमामध्यमाः प्रोक्ताः कनिष्ठाश्चेत्यमीक्रमात्॥ त
त्रोपरसाः॥ प्राप्तैःस्थायिविभावानुभावाद्यैस्तुविरूपतां॥ शांतादयोरसाएवद्वादशोपरसामताः
॥तत्रशांतोपरसः॥ ब्रह्मभावात्परब्रह्मण्यद्वैताधिक्ययोगतः। तथावीभत्सभूम्नादेःशांतो
ह्युपरसोभवेत्॥ तत्राद्यंयथा॥ विज्ञानसुषमाधौतेसमाधौयदुदंचति। सुखंदृष्टेतदेवाद्यपुरा

(विश्वासमन्थनादेश्च)१

श्रीरसा०दी०

णपुरुषत्वयि॥द्वितीयंयथा॥यत्रयत्रविषयेममदृष्टिस्तंतमेवकलयामिभवंतं।यन्निरंजनपरा
परवीर्यत्वांविनाकिमपिनापरमस्ति॥अथप्रीतोपरसः॥कृष्णस्याग्रेतिधार्ष्ट्येनतदङ्केष्ववे
लया।स्वाभीष्टदेवतोऽन्यत्रपरमोत्कर्षमीक्षया॥मर्यादातिक्रमाद्यैश्चप्रीतोपरसतामता।तत्रा

व=

द्यंयथा॥प्रथयन्वपुर्विशालंतांसतांकुलैरवधीर्यमाणनटनोप्यनर्गलः॥विकिरन्प्रनोदरामदेत्यकुं
ठवाकुचटुलोवटुर्वर्वर्णुतात्मनोरतिं॥अथप्रेयउपरसः॥एकस्मिन्नेवसख्येनहरिमित्राद्यवज्ञ

॥१॥

श्री०

या॥युद्धनर्मादिनाचापिप्रेयानुपरसोभवेत्॥तत्राद्यंयथा॥सुहृदित्युदितोभियाचकंपेचलितोन
मगिरास्तुतिंचकार।सन्नपःपरिरम्भितोभुजाभ्यांहरिणादंडवदग्रतःपपात॥अथवत्सलोपर
सः॥सामर्थ्याधिक्यविज्ञानाल्लालनाद्यप्रयत्नतः॥करुणस्यातिरेकादेस्तुर्यश्चोपरसोभवेत्॥
तत्राद्यंयथा।मल्लानांयदवधिपर्वतोद्भटानामुन्माथीसपदितवान्मजाद्यपश्यो॥नोद्वेगंतदवधि ११

यामियामितस्मिन्द्राघिष्ठामपिसमितिंप्रपद्यमाने॥अथशृंगारोपरसः॥तत्रस्थायिवैरूप्यं
।द्वयोरेकतरस्यैवरतिर्याखलुदृश्यते।याऽनेकत्रतथैकस्यस्थायिनःसाविरूपता॥विभावस्यैववै

(देवगिनि)१२

श्री

रूपंस्थायिन्यत्रोपचर्यते॥ तत्रैकत्ररतिर्यथाललितमाधवे। मंदस्मितंप्रकृतिसिद्धमपिव्युदस्तंसंगो
पितश्चसरुजो पिहितोस्तरंगः। धूमायितेद्विगुणवधूमदनात्रिविज्ञावज्ञायकापिगतिरंकुरितामया
सीत्॥ अत्रतंताभावएवात्ररतेः खलुविवक्षितः। एतस्याः प्रागभावेतुशुचिर्नोपरसोऽभवेत्॥ अनेकत्र
रतिर्यथा। वीक्ष्योरगेंद्रपतिमत्रयानेतथाधरण्यांसखिकामपाली। आकर्णयंतीचमुकुंदवेणुं
निनाद्यसाध्विस्मरतोद्विधासि॥ केचित्तुनायकस्यापिसर्वथातुल्यरागतः। नायिकास्वप्यनेका
सुवदन्त्युपरसंशुचिं॥ विभाववैरूप्यं॥ वैदग्ध्योज्ज्वल्यविरहोविभावस्यविरूपता। लतापशुपु
लिंदीषुवृद्धास्वपिसवर्त्तते। तत्रलतायथा। सखिमधुकिरतीनिशम्यवंशीमधुमथनेनकटाक्षिता
थमृद्वी। मुकुलपुलकितालतावलीयंरतिमिहपल्लवितांहृदिव्यनक्ति॥ पशुर्यथा। पश्याद्भुतास्त्रु
गमुदः कुरंगीः पतंगकन्यापुलिनेऽद्यधन्याः। याः केशवांगेतदपांगपूताः सानंगरंगांदृशमा
पर्यंति॥ पुलिंदीयथा। कालिंदीपुलिनेपश्यपुलिंदीपुलकांचिता। हरेर्दृक्चापलंप्रेक्ष्यसदृशी
जा विघूर्णति॥ वृद्धायथा। कज्जलेनकृतकेशकालिमाबिल्वयुग्मरचितोन्नतस्तनी। पश्यगो

(उज्ज्वल

श्रीरसा०

रिकिरतीहृगंचलं स्मेरयत्यघहरं डरत्यसौ ॥ स्थायिनोत्र विरूपत्वमेकरागतयापि चेत् । घटेता
सौ विभावस्य विरूपत्वोप्युदाहृतिः । शुचित्वौज्ज्वल्यवैदग्ध्यासुवेषत्वाद्य कथ्यते । शृंगारस्य ॥
विभावत्वमन्यत्राभासतां ततः ॥ अथानुभाववैरूप्यं । समयानां व्यतिक्रांतिर्ग्राम्यत्वं धृष्टता
दिच । वैरूप्यमनुभावादेर्मनीषिभिरुदीरितं ॥ तत्र समयव्यतिक्रांतिः ॥ समयाः खंडितादीनां
प्रियेरोषोदितादयः । पुंसः स्मितादयश्चात्र प्रिययाताडनादिषु । एतेषामन्यथाभावः समयानां
व्यतिक्रमः ॥ तत्राद्यं यथा । कांतानखांकितोप्यद्य परिहृत्य हरे प्रियं । कैलासवासिनीदासीकु

श्री०

पाद् दृष्ट्वा न डस्व मां ॥ अथ ग्राम्यत्वं ॥ वालशब्दाद्युपन्यासो विरसो क्लिष्टपंचनी । कटिकं डूतिरित्या
द्यं ग्राम्यत्वं कथितं बुधैः ॥ तत्राद्यं यथा ॥ किंनः फलिनिकिशोरीणां त्वं पुष्कर सदां सदा । मुरलीध्वनिनानी
विंगोपवालविलुंपसि ॥ अथ धृष्टता ॥ प्रकटप्रार्थनादिः स्यात्संभोगादेस्तु धृष्टता ॥ यथा ॥ कांतः कै ॥
लासकुंजोयं रम्याहं नवयौवना । त्वं विदग्धोसि गोविंद किं वा वाच्यमतः परं ॥ एवमेव तु गौणानां
हासादीनामपि स्वयं । विज्ञेयोपरसत्वस्य मनीषिभिरुदाहृतिः ॥ अथानुरसाः ॥ भक्तादिभिर्वि

(आकाशस्थानां) ८

श्रीरस

भावाद्यैः कृष्णसंबंधवर्ज्जितैः रसा हास्यादयः सप्त शांतश्चानुरसा मताः॥ तत्र हास्योनुरसः॥ भां
डीरके देवकृष्णाधावितं डांवे दांततंत्रे शुक्रमंडलस्य। आकर्ण्य न्निर्निमिषाक्षिपक्ष्मा रोमांचितांग
श्च सुरर्षिरासीत्॥ एवमेवात्र विज्ञेयावीरादेरप्युदाहृतिः॥ अष्टावमी तटस्थेषु प्राकट्यं यदि वि
भ्रति। कृष्णादिभिर्विभावाद्यैस्तदाप्यनुरसा मताः॥ अथापरसाः॥ कृष्ण तत्प्रतिपक्षाश्चेद्विषया
श्रयतां गताः॥ हासादीनां तदासौ तत्र प्राज्ञैरपरसा मताः॥ तत्र हास्यापरसः॥ पलायमानमुद्वी
क्ष्य चपलायतलोचनं। कृष्णमाराज्जरासंधः॥ सोल्लुंठमहसीन्मुहुः॥ एवमन्येपि विज्ञेया
स्तेवीरापरसादयः॥ उत्तमास्तु रसाभासाः केश्चिद्रसतयोदिताः॥ तथाहि। भावाः सर्वे तदा
भासा रसाभासाश्च केचन। अमी प्रोक्ता रसाभिज्ञैः सर्वेपि रसनाद्रसाः॥ भारत्याद्याश्च
तस्य स्तु रसावस्थानसूचिकाः॥ वृत्तयो नात्र मात्रत्वादुक्ता नाटकलक्षणे॥ ॥इति रसामृतसिंधावुत्त
रविभागे रसाभासलहरी॥ ॥ग्रंथस्य गौरवभयाद्यावन्ति रसश्रियः॥ समाहृतिः समासेन मयासे
यं विनिर्मिता॥ ॥गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी। तुष्यतु सनातनोस्मिन्नुत्तरभागे